

# अष्टावक्रगीता

# ASHTAVAKRAGITA

णमोत्थु णं समणस्स भगवओ महावीरस्स

શ્રીપ્રેમ-ભુવનભાનુ-પદ્મ-જયઘોષસૂરિસદ્‌ગુરુભ્યો નમઃ

શ્રી ભુવનભાનુસૂરિ જન્મશતાબ્દીએ નવલું નજરાણું-૩૬

नवनिर्मित-ज्ञानोपनिषद्-वृत्तिविभूषिता

# ॥ अष्टावक्रगीता ॥

(માત્ર બહુશ્રુત આત્માઓ માટે)

: संस्कृतवृत्तिनवसर्जनम् + सम्पादनम् :

प्राचीनश्रुतोद्धारक प.पू. आचार्यदेव-श्रीमद्विजयहेमचन्द्रसूरीश्वरशिष्या

आचार्यविजयकल्याणबोधिसूरीश्वराः

જ્ઞાનરહસ્યપરિપૂર્ણ

જનકવિદેહી અને

અષ્ટાવક્રમુનિનો

સંવાદ

: प्रकाशक :

श्री जिनशासन आराधना ट्रस्ट

- મૂળ કૃતિ : અષ્ટાવક્રગીતા
- નવનિર્મિત સંસ્કૃત વૃત્તિ : જ્ઞાનોપનિષદ્
- વૃત્તિસર્જન+સંપાદન : પ.પૂ. વૈરાગ્યદશનાદક્ષ આચાર્યદેવ **શ્રીમદ્વિજયહેમચન્દ્રસૂરીશ્વરજી મહારાજાના** શિષ્ય પ.પૂ. આચાર્યદેવ **શ્રીમદ્વિજયકલ્યાણબોધિસૂરીશ્વરજી મહારાજ.**
- વિષય : જ્ઞાનનય-શુદ્ધનયને આધારે જીવન્મુક્તિનો સાક્ષાત્કાર
- પઠન-પાઠનના અધિકારી : નયવાદવિજ્ઞાતા ગીતાર્થગુરુ-અનુજ્ઞાત બહુશ્રુત આત્મા.


- વિ.સં. ૨૦૬૭ • **પ્રતિ : ૫૦૦** • **આવૃત્તિ : પ્રથમ** • મૂલ્ય : રૂા. ૨૨૫.૦૦

આ પુસ્તક જ્ઞાનદ્રવ્યથી પ્રકાશિત થયું છે. માટે ગૃહસ્થે મૂલ્ય ચૂકવીને માલિકી કરવી.

- પ્રકાશક : શ્રી જિનશાસન આરાધના ટ્રસ્ટ

E-mail : jinshasan108@gmail.com



Copyright held by Shree Jinshasan Aradhana Trust under Indian Copyright Act, 1957. http://copyright.gov.in/documents/copyright rules 1957, pdf.

Note : Unauthorised usage, whether uploading on any website or printing in a book or forwarding to others on the internet or putting u on a blog is prohibited. Reproduction of this text by any means whether in part or in full, cannot be made unless express written consent obtained from shree Jinshasan Aradhana Trust. Any violation of this shall be deemed a violation of the intellectual rights of the publisher & of the copyright act, 1957.



**મુદ્રક : ભરત ગ્રાફિક્સ,** ન્યુ માર્કેટ, પાંજરાપોળ, રિલીફ રોડ, અમદાવાદ-૧.
Ph. : 079-22134176, M : 9925020106, E-mail : bharatgraphics1@gmail.com



चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



अनन्तलब्धिनिधानः श्रीगौतमस्वामी



पञ्चमगणधरः श्रीसुधर्मास्वामी

# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર

**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ

**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# સુકૃત સહયોગી

અનુમોદના... અભિનંદન... ધન્યવાદ... અનુમોદના... અભિનંદન... ધન્યવાદ... અનુમોદના... અભિનંદન... ધન્યવાદ...

# શ્રી અઠવાગેટ જૈન સંઘ

## સુરત

**જ્ઞાનનિધિના સદ્‌વિનિયોગ બદલ**
**શ્રીસંઘ તથા ટ્રસ્ટીઓની**
**ભૂરિ ભૂરિ અનુમોદના**

- **પ્રાપ્તિસ્થાન : શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

મુંબઈ : શ્રી ચંદ્રકુમારભાઈ બી. જરીવાલા,
દુ.નં. ૬, બદ્રીકેશ્વર સોસાયટી, મરીન ડ્રાઈવ 'ઈ' રોડ,
નેતાજી સુભાષ માર્ગ, મુંબઈ. ફોન : ૨૨૮૧૮૩૯૦

શ્રી અક્ષયભાઈ જે. શાહ
૫૦૬, પદ્મએપાર્ટમેન્ટ, જૈન દેરાસરની સામે,
સર્વોદયનગર મુલુંડ (વે.) મુંબઈ-૪૦૦૦૮૦. ફોન : ૨૫૬૭૪૭૮૦

પાટણ : શ્રી ચંદ્રકાંતભાઈ એસ. સંઘવી
૬-બી, અશોકા કોમ્પલેક્ષ, જનતા હોસ્પિટલ પાસે,
પાટણ-૩૮૪૨૬૫, ઉ.ગુ. ફોન : ૯૯૦૯૪ ૬૮૫૭૨

અમદાવાદ : શ્રી બાબુભાઈ સરેમલજી બેડાવાળા
સિદ્ધાચલ બંગલોઝ, સેન્ટ એન. સ્કુલ પાસે, હીરા જૈન સોસાયટી,
સાબરમતી, અમદાવાદ-૫. ફોન : ૨૭૫૦૫૭૨૦, ૨૨૧૩૨૫૪૩

# નમો નમો નાણદિવાયરસ્સ

દાદા ગુરુદેવ શ્રી ભુવનભાનુસૂરીશ્વરજી મ.સા. પાસે એક છોકરો આવ્યો. ઈંગ્લીશ મિડિયમમાં ભણતો એ હોંશિયાર છોકરો... ગુરુદેવે તેને ખાલી જગ્યા પૂરવા કહ્યું- They is _____ છોકરો કહે, "આ વાક્ય જ ખોટું છે. They પછી તો Are જ આવે." ગુરુદેવે સ્મિત કરીને તેને કહ્યું, "તું ખાલી જગ્યામાં એવો શબ્દ મુક, કે જેનાથી આ વાક્ય સાચું થઈ જાય." ઘણું વિચાર્યા પછી છોકરાએ હાર કબૂલી લીધી. ગુરુદેવે ખાલી જગ્યા પૂરી - They is a pronoun. છોકરો આફરીન થઈ ગયો. પાછળથી એણે દીક્ષા પણ લીધી.

સ્યાદ્વાદદર્શન કહે છે કે ખોટું કાંઈ હોતું જ નથી. હા, જે રીતે એ સાચું છે એ અપેક્ષા તમારે શોધી કાઢવી પડે. વળી બધું સાચું હોવા છતાં પણ જે અપેક્ષા આપણા હિતમાં હોય, એને જ વિશેષ ધ્યાનમાં રાખવી પડે. ક્રિયાનય અને જ્ઞાનનય બંને સાચા છે, જ્યારે આત્મા ક્રિયાનય પ્રત્યે ખૂબ ઢળી જાય, જ્ઞાનનયની ઉપેક્ષા સેવે, ક્રિયાજનિત અહંકાર આદિનો ભોગ બને, ત્યારે તેને જ્ઞાનનયની અપેક્ષા તરફ વાળી સમતોલ કરવો જરૂરી બને છે.

ક્રિયા એટલે પ્રતિક્રમણાદિ અને જ્ઞાન એટલે સ્વાધ્યાયાદિ. આ સ્થૂલ વ્યાખ્યા છે. વાસ્તવમાં તો પ્રતિક્રમણાદિમાં પણ આત્માનો જે ઉપયોગ એ જ્ઞાન છે અને વાંચન-લેખનાદિ કરવું એ ક્રિયા છે.

કોઈ સ્વાધ્યાય કરે, કોઈ વ્યાખ્યાન આપે, કોઈ સેવા કરે, કોઈ અનુષ્ઠાનો કરે-કરાવે, કોઈ ચોપડી લખે, કોઈ તીર્થાદિનું નિર્માણ કરાવે... આવી અનેકાનેક સાધનાઓ અનેકત્ર સોળે કળાએ ખીલી ઉઠી હોય, એવું જોવા મળે છે. સાધનાનું સંપૂર્ણ ફળ ત્યારે જ મળે જ્યારે તેમાં જ્ઞાન

ભળે, એટલે કે જ્ઞાનપરિણતિરૂપ ઔચિત્ય, વિવેક, નિરહંકારતા, નિર્લોભતા, ઔત્સુક્યરહિતતા, ગંભીરતા, સ્વસ્થતા વગેરે ગુણો ભળે. અન્યથા તે સાધના વાસ્તવમાં સાધના જ ન બને, ઉલ્ટુ મોહવૃદ્ધિ કરવા દ્વારા અનર્થ કરે. માટે જ પૂ. હરિભદ્રસૂરિ મહારાજાએ શાસ્ત્રવાર્તા-સમુચ્ચયમાં કહ્યું છે -

अत एवागमज्ञस्य या क्रिया सा क्रियोच्यते ।
आगमज्ञोऽपि यस्तस्यां यथाशक्त्या प्रवर्तते ॥११-४३॥

જ્ઞાનીની જે ક્રિયા છે તે જ સાચી ક્રિયા કહેવાય છે અને જ્ઞાની પણ તે જ છે કે જે યથાશક્તિ ક્રિયામાં પ્રવૃત્તિ કરે છે.

જ્ઞાનનયની પરિણતિના વિકાસ માટે એક અદ્‌ભુત આલંબન એટલે જ અષ્ટાવક્રગીતા. કહેવાય છે કે આ ગ્રંથ અષ્ટાવક્રમુનિ તથા જનક રાજાના સંવાદભૂત છે. અષ્ટાવક્ર મુનિ માટે એવી કિંવદન્તી સાંભળવા મળે છે કે તેઓ જ્યારે ગર્ભમાં હતાં ત્યારે તેમને પૂર્વભવમાં ભણેલા વેદો યાદ હતા અને વેદપાઠ કરતા પોતાના પિતાની તેઓ ભૂલ કાઢતા હતાં. ક્રોધે ભરાઈને પિતાએ તેમને શાપ આપ્યો કે તારા આઠે અંગ વાંકા થઈ જાઓ. શાપ સાકાર થયો. એવી જ સ્થિતિમાં બાળકનો જન્મથયો, તેથી જ નામપડ્યું અષ્ટાવક્ર.

જ્ઞાનનય કહો, નિશ્ચયનય કહો કે શુદ્ધનય કહો, આ ગ્રંથમાં તેની પરાકાષ્ઠા જોવા મળે છે. યોગ્ય આત્માઓ આ ગ્રંથના તાત્પર્યને પામીને પોતાની નિર્વાણયાત્રા વેગીલી બનાવે એ ભાવનાથી આ ગ્રંથ પર રચેલી સંસ્કૃત વૃત્તિ એટલે જ જ્ઞાનોપનિષદ્. ઉપનિષદ્ એટલે રહસ્ય. મૂળ ગ્રંથના અનુસારે આ વૃત્તિમાં જ્ઞાનનું રહસ્ય પીરસ્યું છે.

કદાચ કોઈને પૂછવાનું મન થાય કે આપણા આટલા આગમો છે, શાસ્ત્રો છે, તો પછી તમે જૈનેતર ગ્રંથ પર કેમવૃત્તિ લખી ? મારો જવાબ એ છે કે મેં જૈન ગ્રંથ પર જ વૃત્તિ રચી છે. કારણ કે કથંચિત્ જૈન ન

હોય એવો કોઈ ગ્રંથ છે જ નહીં. બીજા શબ્દોમાં કહીએ તો સ્યાદ્વાદની ડિક્શનેરીમાં જૈનેતર શબ્દ જ નથી. સાચું એ બધું જૈન છે અને શરૂઆતમાં જ કહ્યું એ મુજબ સ્યાદ્વાદની દૃષ્ટિએ પ્રત્યેક વાક્ય કથંચિત્ સાચું છે. આવશ્યકતા છે યથોચિત અપેક્ષાના અન્વેષણની.

પૂ. હરિભદ્રસૂરિ મહારાજાએ ષોડશક પ્રકરણમાં કહ્યું છે -

तत्रापि च न द्वेषः कार्यो विषयस्तु यत्नतो मृग्यः ।

तस्यापि न सद्वचनं सर्वं यत्प्रवचनादन्यत् ॥१६-३॥

પરદર્શનના શાસ્ત્ર પર પણ દ્વેષ ન કરવો જોઈએ, પણ પ્રયત્નપૂર્વક તેનો વિષય શોધવો જોઈએ કે કઈ અપેક્ષાએ આ વચન કહ્યું છે. પરદર્શનના શાસ્ત્રમાં પણ જે સમ્યક્વચન છે, તે જિનવચન જ છે.

છંદોનુશાસનમાં કલિકાલસર્વજ્ઞ કહે છે - न हि सूक्तं किञ्चिदर्हता-मुपदेशमन्तरेण जगत्यस्ति । અરિહંતોના ઉપદેશ સિવાય જગતમાં કોઈ સમ્યક્વચન છે જ નહીં.

ઉપદેશપદમાં પૂ. હરિભદ્રસૂરિ મહારાજાએ કહ્યું છે -

जं अत्थओ अभिण्णं अण्णत्था सद्दओ वि तह चेव ।

तम्मि पओसो मोहो विसेसओ जिणमयठियाणं ॥

सव्वप्पवायमूलं दुवालसंगं जओ समक्खायं ।

रयणागरतुल्लं खलु तो सव्वं सुंदरं तम्मि ॥६९३-६९४॥

પરશાસ્ત્રનું જે વચન અર્થથી જિનવચન જ છે અને અન્વર્થથી શાબ્દિક રીતે પણ જિનવચન જ છે. તેમાં પ્રદ્વેષ કરવો એ મોહ છે, એમાં ય જેઓ જિનવચનને સ્વીકારે છે, તેમના માટે તો એ વિશેષથી મોહ છે. દ્વાદશાંગી સર્વ દર્શનોનું મૂળ છે એવું કહ્યું છે. આ એવો રત્નાકર છે કે જેમાં સર્વદર્શનોરૂપી નદીઓ આવીને મળે છે, માટે એમાં રહેલું સર્વ સુંદર છે.

માટે જ્યાં સુધી સ્વીકૃત અપેક્ષાનો કદાગ્રહ ન આવે ત્યાં સુધી સર્વ નયો સ્યાદ્વાદને માન્ય જ છે. પરદર્શનના શાસ્ત્રના વચનો પણ યોગ્ય અપેક્ષાથી ગ્રહણ કરાય, અને તેનો એકાંત ન સેવાય, તો એ વચનો પણ સાચા જ છે, અને જો જિનાગમનું વચન પણ જો કોઈ એકાંતે ગ્રહણ કરે, તો તે વચન તેની અપેક્ષાએ ખોટું છે. પૂ. સિદ્ધસેનદિવાકરસૂરિ મહારાજાએ સન્મતિતર્કમાં કહ્યું છે -

निययवयणिज्जसच्चा सव्वणया परवियालणे मोहा ।

ते पुण अदिट्ठसमओ विभयइ सच्चे व अलिए व त्ति ॥१-२८॥

સર્વ નયો પોતાની અપેક્ષાએ સાચા છે, પણ જ્યારે પોતાની અપેક્ષાના કદાગ્રહથી બીજા નયોનો પ્રતિક્ષેપ કરે ત્યારે ખોટા છે. આ રીતે સ્વરૂપથી કોઈ નયો સાચા કે ખોટા નથી. જેણે આવું આગમનું તાત્પર્ય જાણ્યું નથી, તે જ તેમના 'આ સાચા અને આ ખોટા' એવા વિભાગ કરે છે.

આ દૃષ્ટિએ જૈન-જૈનેતર શ્રુત સમાન છે. પણ તેમાં સમાન પ્રવૃત્તિ કરતાં પૂર્વે સમ્યક્ત્વની સ્થિરતા મેળવવી જરૂરી છે. તો જ એ વચન વાચકની અપેક્ષાએ સમ્યક્ વચન બની શકે. વિશેષાવશ્યક ભાષ્યમાં કહ્યું છે - सम्मत्तपरिग्गहियं सम्मसुयं ॥૫૨૮॥ સમ્યગ્દૃષ્ટિ જે શ્રુતનું ગ્રહણ કરે તે સમ્યક્ શ્રુત છે.

તેમાં પણ પ્રસ્તુત ગ્રંથના અધ્યયનનો અધિકારી તો સુનિશ્ચલસમ્યક્ત્વધારક નયવાદવિશારદ બહુશ્રુત આત્મા જ છે. કારણ કે શુદ્ધનયનું વક્તવ્ય બીજા જીવો માટે પ્રાયઃ અહિતકર થાય છે. જેને રોટલી પણ માંડ પચતી હોય, તે ચક્રવર્તીનું ભોજન ખાઈ લે તો તેની શું દશા થાય ? જે હજી વ્યવહારમાં નિષ્ણાત નથી અને નિશ્ચયને જાણવા ઈચ્છે છે, તે તળાવ તરવામાં ય સમર્થ ન હોવા છતાં સમુદ્ર તરવાની ઈચ્છા કરે છે. મહોપાધ્યાયજીએ આ વાસ્તવિકતાને વ્યક્ત કરીને અયોગ્ય જીવોને આવું જ્ઞાન આપવાનો સ્પષ્ટ નિષેધ કર્યો છે. (અધ્યાત્મસાર ૧૮/૧૯૩-

૧૯૭) અને કહ્યું છે કે નિર્વિકલ્પ સમાધિ (આદિ શુદ્ધનય)નો ઉપદેશ અત્યંત પરિપક્વ જ્ઞાન ધરાવતા શ્રોતાને જ આપવો, અર્ધજ્ઞાનીને નહીં. બીજાઓએ પણ કહ્યું છે કે પહેલા કષાયોપશમ, ઈન્દ્રિયદમન વગેરે ગુણોનો ઉપદેશ આપવો. પછી તેને એમકહેવું કે 'આ બધું બ્રહ્મ છે.' 'તું શુદ્ધ છે.' જે અજ્ઞાની-અર્ધજ્ઞાનીને એમકહે કે 'બધું બ્રહ્મા છે.' તે તેને મહાનરકમાં પાડે છે.

બિચારો પહેલા પગથિયાવાળો... સીધો એકવીશમા પગથિયે ચડવા જાય, તો પહેલા પગથિયાનો પણ ન રહે ને ? માટે સૌ પ્રથમવ્રતો વગેરેથી ચિત્તની શુદ્ધિ કરવી પડે. જોઈએ છે તો શુદ્ધસ્વરૂપ. પણ તેના માટે પહેલા પ્રશસ્તતત્ત્વ ભેળવવું પડશે. તેનાથી જ અપ્રશસ્ત તત્ત્વનો નિકાલ થશે. પછી તો પ્રશસ્ત તત્ત્વ પણ પોતાની મેળે જ જતું રહેશે અને શુદ્ધ તત્ત્વની પ્રાપ્તિ થશે. (અધ્યાત્મોપનિષદ્ ૨/૪૮-૫૬)

આ રીતે પ્રસ્તુત ગ્રંથનો અધિકારી પૂર્વોક્ત અત્યંત વિશિષ્ટ-મર્યાદિત વર્ગ જ છે. તેથી જ આ ગ્રંથનો સટીક અનુવાદ કરવાની ભાવના પડતી મૂકી છે. જેથી કોઈના અહિતમાં હું નિમિત્ત ન બનું. સંસ્કૃતભાષાના જાણકારોને પણ મારી વિનંતિ છે કે બહુશ્રુતત્વાદિ પૂર્વોક્ત યોગ્યતા પ્રાપ્ત ન થાય ત્યાં સુધી આ ગ્રંથનું અધ્યયન ન કરે.

વાચકો એમન સમજે કે આ ગ્રંથ પર મેં ટીકા લખી છે, એટલે આ ગ્રંથમાં વર્ણવેલી દશા મને પ્રાપ્ત થઈ છે. કારણ કે એ દશાની પ્રાપ્તિ સાથે તો આ ટીકાલેખન પણ શક્ય નથી. અરે, આ ગ્રંથરચના પણ કથંચિત્ સ્વવચનવિરોધ જેવી છે. ક્યાં સમાધિ અને જીવન્મુક્તિ પ્રત્યે પણ ઉપેક્ષાભાવ ! ક્યાં સંસાર અને મોક્ષ પ્રત્યે ય સમભાવ ! ક્યાં સમતા અને વિષમતા પ્રત્યે ય સમતા ! ક્યાં સર્વોપરમનો સાક્ષાત્કાર ! અને ક્યાં છંદોમય લાલિત્યસભર વચનવિલાસ ! પણ તો ય ગીતાકારે આપણા ખાતર સ્વવચનવિરોધ વહોરી લીધો અને આ અદ્ભુત અધ્યાત્મામૃત આપણને પીરસ્યું.

પ્રસ્તુત ગ્રંથમાં એક વાત ખટકે છે, કે તેના વીશ પ્રકરણોમાં પરસ્પરનું અનુસંધાન થાય તેવી પંક્તિ પ્રકરણોની શરૂઆતમાં કે અંતમાં હોય એવી અપેક્ષા રહે છે. એના વિના આ વચન અષ્ટાવક્રમુનિ બોલે છે, કે જનકરાજા ? તેનો પણ સહેલાઈથી ખ્યાલ આવતો નથી. અષ્ટાવક્ર ગીતાના અનેક પુસ્તકોને જોવા છતાં એવી પંક્તિ જોવા ન મળી. પ્રસ્તુત નવનિર્મિત ટીકામાં તો અવતરણિકા આદિ દ્વારા એ અપેક્ષા સંતોષી જ છે. પણ ટીકાના સર્જન બાદ એક ગ્રંથના દર્શન થયા. જેનું નામછે 'અષ્ટાવક્ર વેદાંત'. આ ગ્રંથ શબ્દશઃ અષ્ટાવક્રગીતાને મળતો આવે છે. ફરક એટલો છે કે આમાં ઉપરોક્ત અપેક્ષાને સંતોષતા શ્લોકો તથા પંક્તિઓ પ્રકરણની આદિ તથા અંતમાં દૃષ્ટિગોચર થાય છે. એ ઉપરાંત આમાં પ્રસ્તુતગ્રંથના પ્રકરણોના નામઅને શ્લોકસંખ્યાનો સંગ્રહ કરતું ૨૧મું પ્રકરણ પણ છે.

'અષ્ટાવક્ર વેદાંત'નું એ પુસ્તક પ્રાયઃ ૧૫૦-૨૦૦ વર્ષ જુનું હતું. તેમાં અમુક પાના પણ ખૂટતા હતા. શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા)માંથી તેની હસ્તપ્રત મેળવી તેના દ્વારા સંશોધિત કરીને પ્રસ્તુત પ્રબંધમાં તે તે શ્લોકો-પંક્તિઓ યથોચિત સ્થાને કૌંસ () માં મુકવામાં આવ્યા છે. ઉક્ત હસ્તપ્રતનું સૌજન્યસભર પ્રદાન કરનાર શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા)નો હું આભારી છું.

અધિકારી અધ્યેતાવર્ગ આ ગ્રંથનું ખૂબ પારાયણ કરે, તેના પર ગંભીર ચિંતન કરે અને અધ્યાત્મના આનંદાદ્વૈતનો ભોક્તા બને, તો આ પ્રયાસ સાર્થક થશે. પૂર્વે કહ્યું તે મુજબ બાહ્ય ક્રિયાઓ વ્યર્થ નથી, આવશ્યક જ છે. અને તે ક્રિયાઓમાં ચોતરફ ભરતી દેખાય છે. જરૂર છે ખૂટતી કડીની પૂર્તિની. મહોપાધ્યાયજી કહે છે -

અધ્યાતમવિણ જે ક્રિયા, તે તનુમલ તોલે
મમકારાદિકયોગથી, એમજ્ઞાની બોલે
હું કર્તા પરભાવનો, એમજિમજિમજાણે
તેમતેમઅજ્ઞાની પડે, નિજ કર્મને ઘાણે.

અહંકાર, મમકાર, કર્તૃભાવ આ બધા દોષોને ભસ્મીભૂત કરી દેવાનું સામર્થ્ય પ્રસ્તુત ગ્રંથમાં છે, એની પ્રત્યેક પંક્તિમાં છે. શ્રીસંઘના કરકમલમાં આ ગ્રંથનું નજરાણું ધરતા ધન્યતા અનુભવું છું.

ચરમતીર્થપતિ શ્રી મહાવીરસ્વામિભગવાનના શાસનમાં, શ્રી ગોડી પાર્શ્વનાથની (સિરોડી-રાજસ્થાન) પવિત્ર છાયામાં, કરુણાસાગર શ્રી મુનિસુવ્રત સ્વામિભગવાનના સાન્નિધ્યમાં શ્રી કેવલબાગ તીર્થમાં આ ટીકાનું સર્જન થયું છે. સર્જન દરમિયાન અનંતોપકારી ગુરુદેવ શ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજાની કૃપા અનરાધાર વરસતી રહી છે. આ ગ્રંથના મૂલાધાર છે- **શ્રી કૃપારત્નવિજયજી મ.સા.**, મુનિ **જિનપ્રેમવિ.** અને અનન્ય સહયોગી છે મુનિ **ભાવપ્રેમ વિ.** તથા મુનિ **રાજપ્રેમ વિ.** તેમજ અમદાવાદ-ભરત ગ્રાફિક્સનો સહયોગ પણ અવિસ્મરણીય બન્યો છે.

જિનાજ્ઞા વિરુદ્ધ લખાયું હોય તો મિચ્છામિદુક્કડમ્. ક્ષતિનિર્દેશ કરવા બહુશ્રુતોને નમ્ર પ્રાર્થના. शिवमस्तु सर्वजगतः ।

પોષ વદ-૭,<br>
વિ.સં. ૨૦૬૬,<br>
શ્રી કેવલબાગ તીર્થ,<br>
સિરોડી, રાજસ્થાન.

પરમ પૂજ્ય વૈરાગ્યદેશનાદક્ષ આચાર્યદેવ<br>
શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી મહારાજા**નો<br>
ચરણસેવક આચાર્ય **વિજયકલ્યાણબોધિસૂરિ**

# પ્રતિપરિચય

પ્રસ્તુત પ્રબંધનું સર્જન પૂર્ણ થયું ત્યાં સુધી હસ્તાદર્શોનો ઉપયોગ કરવામાં આવ્યો ન હતો. પ્રસ્તાવનામાં જણાવ્યું છે તે મુજબ સર્જન થયા બાદ અષ્ટાવક્રવેદાંત નામના ગ્રંથમાંથી પ્રસ્તુત પ્રબંધમાં ઉપયોગી અંશો લેવામાં આવ્યાં. આ કાર્યમાં હસ્તાદર્શો ઉપયોગી થયાં. અષ્ટાવક્ર ગીતા તેમજ અષ્ટાવક્ર ટીકા નામના ગ્રંથોની હસ્તપ્રતિઓમાં પણ તે અંશો દૃષ્ટિગોચર થયા. આ હસ્તાદર્શોના પ્રથમઅને અંતિમપત્રો અત્રે પ્રસ્તુત કરીએ છીએ અને સાથે સાથે જ આ હસ્તાદર્શોની નકલ પાઠવવાનું સૌજન્ય દાખવનાર શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા-ગાંધીનગર) અને આ ગૌરવવંતી સંસ્થાના પ્રેરક રાષ્ટ્રસંત પ.પૂ.આ.દે. શ્રીમદ્ પદ્મસાગરસૂરીશ્વરજી મહારાજા પ્રત્યે કૃતજ્ઞતાની અભિવ્યક્તિ કરીએ છીએ.

## અધ્યાત્મપ્રદીપિકા નામની પ્રાચીન વૃત્તિ સાથે અષ્ટાવક્ર વેદાંત ગ્રંથ



શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા) પ્રતિ-૬૪૪૯૭

પ્રથમપત્ર



શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા) પ્રતિ-૬૪૪૯૭
અંતિમપત્ર

## અષ્ટાવક્રટીકા (અધ્યાત્મપ્રદીપિકા)



શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા) પ્રતિ-૧૯૩૨૫
પ્રથમપત્ર

## અષ્ટાવક્રટીકા (અધ્યાત્મપ્રદીપિકા)


रितिन्यायात् अंतेदोमध्येस्व आदौत्र्यंशरद्यवधिकैसुशतश्लोकैरित्यर्थः श्लोकसंख्यामु
पसंहरति अवधूतेति अवधूतानुभूतिरूपोयंग्रंथः तस्यसंख्याक्रमो विद्यते येषांतेसंख्या
क्रमाईदृशाःश्लोकाअमीकथिताइत्यर्थः ॥ ॥इतिश्रीमद्विश्वेश्वरविरचितायामष्टा
वक्रटीकायांसंख्याक्रमादिकरव्यानंनामएकविंशप्रकरणंसमाप्तः॥ ॥ ॥
॥ ॥इतिश्रीअष्टावक्रसटीकसमाप्तमगमत॥ ॥

શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા) પ્રતિ-૧૯૩૨૫
અંતિમપત્ર

## પં. શ્રી વિનયવિજયજીએ સં. ૧૮૪૦ માં લખેલી અષ્ટાવક્રગીતાની પ્રતિ જે સૂચવે છે કે સવા સો વર્ષ પૂર્વે આ ગ્રંથનું અધ્યયન શ્રી જૈન સંઘમાં પ્રવૃત્તિશીલ હતું.



શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા) પ્રતિ-૫૯૫૩૧

પ્રથમપત્ર



શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા) પ્રતિ-૫૯૫૩૧

અંતિમપત્ર

# અષ્ટાવક્રગીતા ઝલક

अहो जनसमूहेऽपि, न द्वैतं पश्यतो मम ।
अरण्यमिव संवृत्तं, क्व रतिं करवाण्यहम् ? ॥२-२१॥

यदा नाहं तदा मोक्षो यदाहं बन्धनं तदा ।
मत्वेति हेलया किञ्चिन्मा गृहाण विमुञ्च मा ॥८-४॥
त्यजैव ध्यानं सर्वत्र, मा किञ्चिद्धृदि धारय ।
आत्मा त्वं मुक्त एवासि, किं विमृश्य करिष्यसि ? ॥१५-२०॥

आचक्ष्व शृणु वा तात ! नानाशास्त्राण्यनेकशः ।
तथापि न तव स्वास्थ्यं, सर्वविस्मरणादृते ॥१६-१॥

भोगं कर्म समाधिं वा, कुरु विज्ञ तथापि ते ।
चित्तं निरस्तसर्वाश-मत्यर्थं रोचयिष्यति ॥१६-२॥

व्यापारे खिद्यते यस्तु, निमेषोन्मेषयोरपि ।
तस्यालस्यधुरीणस्य, सुखं नान्यस्य कस्यचित् ॥१६-४॥

विरक्तो विषयद्वेष्टा, रागी विषयलोलुपः ।
ग्रहमोक्षविहीनस्तु, न विरक्तो न रागवान् ॥१६-६॥

न शान्तिं लभते मूढो, यतः शमितुमिच्छति ।
धीरस्तत्त्वं विनिश्चित्य, सर्वदा शान्तमानसः ॥१८-३९॥

भावस्य भावकः कश्चिन्न किञ्चिद्भावकोऽपरः ।
उभयाभावकः कश्चिदेवमेव निराकुलः ॥१८-४२॥

# ज्ञानोपनिषद् प्रसादी

- एष एव बन्धो बन्धहेतुर्वा यदतत्तत्कल्पनेति हृदयम् । (१-७)
- सविकल्पो ह्यात्मा भ्रान्त्याधारः, यदा विकल्पस्यैव विध्वंसस्तदा निराधारा भ्रान्तिः कुत्र तिष्ठत्वित्यभिप्रायः । (२-१८)
- वन्ध्यापुत्रे शशशृङ्गधनुर्धरत्वादिकल्पनावन्न कुत्रचिदपि शरीरादिकल्पना न्याय्येत्याशयः । (२-१९)
- न ह्याकण्ठाभ्यवहृताम्ररसस्य कदन्नादनाकाङ्क्षोदयो भवतीति दिव्यसमृद्धिसमृद्धचिच्चिन्तामणिमधिगम्य कुशकाशकल्पबाह्य-भावविकल्पास्पर्श उपपन्न एव । (३-१३)
- **किमेनम्**-आत्मानं देहं वा, **अनुशोचसि** ? ध्रुवाध्रुवोभयानु-शोचनस्य निरर्थकत्वादयुक्तमेव तदिति हृदयम् । (१५-९)
- शिखरि सर्वोच्चशिखरारूढस्यारुरोहयिषावन्न तव बुभुत्सा साम्प्रतेति हृदयम् । (१०-५)
- सर्वोपरम एव सुखोपनिषत् परेत्यत्र निष्कर्षः । (१६-४)

# વિષયાનુક્રમ


| ક્રમ | વિષય | પૃષ્ઠ |
|---|---|---|
| १. | प्रकरण-१ | १ |
| २. | प्रकरण-२ | २० |
| ३. | प्रकरण-३ | ३८ |
| ४. | प्रकरण-४ | ५२ |
| ५. | प्रकरण-५ | ५९ |
| ६. | प्रकरण-६ | ६३ |
| ७. | प्रकरण-७ | ६६ |
| ८. | प्रकरण-८ | ६८ |
| ९. | प्रकरण-९ | ७२ |
| १०. | प्रकरण-१० | ८३ |
| ११. | प्रकरण-११ | ९३ |
| १२. | प्रकरण-१२ | १०० |
| १३. | प्रकरण-१३ | १०६ |
| १४. | प्रकरण-१४ | ११२ |
| १५. | प्रकरण-१५ | ११७ |
| १६. | प्रकरण-१६ | १२३ |
| १७. | प्रकरण-१७ | १२९ |
| १८. | प्रकरण-१८ | १३८ |
| १९. | प्रकरण-१९ | १६१ |
| २०. | प्रकरण-२० | १६२ |
| २१. | प्रकरण-२१ | १६४ |
| २२. | परमर्षि प्रेम-एक अनोखा अवधूत | १६९ |

अथ ज्ञानोपनिषद्-वृत्तिविभूषिता

# अष्टावक्रगीता

## प्रकरण-१

इह ह्यनादिकालीनसंसारसंसरणसम्प्रवृत्तस्य सत्त्वस्यातिनिबिडकर्मप्रकृतिवृतिर्यदा चरमावर्त्तादिसामग्रीयोगात्सञ्जातविवरा सञ्जायते, तदा स्वत एवाविर्भवति ज्ञानोपनिषज्जिज्ञासा, अन्यथा तु परतोऽपि न, यदाह- अनिवृत्ताधिकारायां प्रकृतौ सर्वथैव हि । न पुंसस्तत्त्वमार्गेऽस्मिञ्जिज्ञासाऽपि प्रवर्तते ॥ क्षेत्ररोगाभिभूतस्य यथात्यन्तं विपर्ययः । तद्वदेवास्य विज्ञेयस्तदा वर्त्तनियोगतः ॥ (योगबिन्दौ १०१, १०२) नन्वस्तु जिज्ञासा, मा भूत् कर्मवृतिविवरः, को दोष इति चेत् ? असम्भवाख्य इति गृहाण, एकान्ताक्षीणकल्मषस्य तादृशमात्रकुशलाशयावाप्तेरप्यसम्भवात्, तदुक्तम्-

जिज्ञासायामपि ह्यत्र कश्चित् सर्गो निवर्तते । नाक्षीणपाप एकान्ता-दाप्नोति कुशलां धियम् ॥ (योगबिन्दौ १०३) तदेवं किञ्चिन्निवृत्तकर्मप्रकृत्यधिकारत्वेनावाप्तकुशलमतितया सञ्जातज्ञानोपनिषद्विविदिषारुणोदयो **जनक उवाच-**

**कथं ज्ञानमवाप्नोति कथं मुक्तिर्भविष्यति ? ।**
**वैराग्यं च कथं प्राप्तमेतद् ब्रूहि मम प्रभो ! ॥१॥**

**कथम्** - केनोपायेन, **ज्ञानम्**-विषयरतिविरतिविधाव-

वन्ध्यनिबन्धनं संवेदनम्, **अवाप्नोति** ?, मादृशजिज्ञासुरिति गम्यते । **कथं च मुक्तिः** - भीमभवाटवीबम्भ्रमणप्रवणबन्धनान्मोक्षः, **भविष्यति** ? **कथं च वैराग्यम्** - विषयविषयोः सादृश्यदर्शने प्रयोजक आत्मपरिणामः, **प्राप्तं** भवतीत्येत**द्** हे **प्रभो !** - सद्बोधविभुताविभूषित ! **मम ब्रूहि**, कारुण्यपुण्यहृदयः सन् मां कथय ।

तदेनामभ्यर्थनामाकर्ण्या**ष्टावक्र उवाच**-

**मुक्तिमिच्छसि चेत्तात ! विषयान्विषवत्त्यज ।**
**क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥२॥**

हे **तात** ! वत्स ! **चे**त्त्वं **मुक्तिमिच्छसि**-अकृत्रिमा काङ्क्षागोचरीकुरुषे, तदा **विषयान्**-शब्दादिगोचरान्, **विषवत्**-सद्योमारणकारणहालाहलमिव, **त्यज**-दूरत एव परिहर, उपभुक्तं विषं हन्ति विषयाः स्मरणादपि-इत्यागममनुस्मरन् मा स्मृतिमात्रेणापि तत्संसर्गं भजेति भावः । किन्तर्हि कर्तव्यमित्याह-**क्षमा**-उपसर्गादिसंसर्गहेतावप्यकोपानुवृत्त्यनुगुणा चित्तवृत्तिः, **आर्जवम्** - विमुक्तवक्रभावो भावः, **दया** - निरवच्छिन्नकृपा, **तोषः** - येन तेनापि संस्तरणं भवेद्यतस्तादृश आत्मपरिणामः, **सत्यम्** - सद्भ्यो हितम्, एतेषां समाहारः, तत् **पीयूषवद्** -सरससुधारसमिव, **भज**-भावसारमादरविषयीकुरु । क्षमादेर्धर्मस्वरूपत्वेन परमामृताद्युपमत्वात्, तदाहुः-धर्मश्चिन्तामणिः

श्रेष्ठो धर्मः कल्याणमुत्तमम् । हित एकान्ततो धर्मो, धर्म एवामृतं परम्-इति (धर्मबिन्दौ ४१) । मुक्त्युपायान्तरमाह-

**न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् ।**
**एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥३॥**

**भवान् न पृथ्वी, न जलम्, नाग्निः, न वायुः, न वापि द्यौः** - आकाशः, तद्विलक्षणगुणत्वाद् भवतः, तदुदितम् - पुद्गलानां गुणो मूर्ति-रात्मा ज्ञानगुणः पुनः । पुद्गलेभ्यस्ततो भिन्न-मात्मद्रव्यं जगुर्जिनाः ॥ अवगाहो गुणो व्योम्नो, ज्ञानं खल्वात्मनो गुणः । व्योमास्तिकायात्तद्भिन्नमात्मद्रव्यं जगु-र्जिनाः-इति (अध्यात्मसारे १८/४८, ५१) । अन्यत्रापि -न भूमिर्न तोयं न तेजो न वायु-रित्यादि (दशश्लोक्याम् १) । कस्तर्ह्यहमित्यत्राह - **एषाम्** - पृथ्व्यादीनाम्, **साक्षिणम्** - साक्षात्कर्तारम्, **चिद्रूपम्** - ज्ञानलक्षणम्, **आत्मानम्** - स्वम्, **मुक्तये विद्धि** - मोक्षार्थं जानीहि, मोक्षप्रदत्वादात्मज्ञानस्य, आत्मज्ञानं च मुक्तिदम् - (अध्यात्मसारे १८-१) इत्युक्तेः।

अथ वृथेयं विषयत्यागादिविडम्बना, सोढायामपि तस्यां मुक्तिसुखसम्प्राप्तेः सन्दिग्धत्वात्, विषयासेवनतस्तु सद्य एव सुखसंवेदनमिति निश्चितत्वाच्च । इत्थं च-यो ध्रुवाणि परित्यज्य, ह्यध्रुवं परिषेवते । ध्रुवाणि तस्य नश्यन्ति, ह्यध्रुवं नष्टमेव च - इति न्यायाऽऽपात इत्यत्राह -

**यदि देहं पृथक्कृत्य चिति विश्रम्य तिष्ठसि ।**
**अधुनैव सुखी शान्तो बन्धमुक्तो भविष्यसि ॥४॥**

**यदि देहम्** - पञ्चभूतमयं कलेवरम्, **पृथक्कृत्य** - आत्मभावतो विविच्य, **चिति** - ज्ञानमात्रे, **विश्रम्य** - एकायनतयावस्थाय, **तिष्ठसि** - स्थैर्यमुपयासि, तदा त्व**मधुनैव सुखी** - सर्वदुःखवियोगसंयोगी, **शान्तः** - सञ्जातसङ्कल्पादि-सन्तापोपशमः, अत एव **बन्धमुक्तो भविष्यसि**, देहात्म-बुद्धेरेव पाशसङ्काशत्वात्, यदाह-आत्मबोधो नवः पाशो, देहगेहधनादिषु । यः क्षिप्तोऽप्यात्मना तेषु, स्वस्य बन्धाय जायते-इति (ज्ञानसारे १४-६) । तद्भावे तु बन्ध-निबन्धनविरहे स्वत एव मुक्तस्वभावाविर्भाव इति । देहात्म-विवेकजन्मने देहसम्बद्धासम्बद्धतामात्मनो विभावयन्नाह-

**न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः ।**
**असङ्गोऽसि निराकारो विश्वसाक्षी सुखी भव ॥५॥**

**त्वं विप्रादिको वर्णो न,** ब्राह्मणादिपर्यायस्य शरीरमात्रा-श्रितत्वात्, **नाप्याश्रमी,** तत एव, **नाप्यक्षगोचरः** - चक्षुरादीन्द्रियविषयः, आकाशवदमूर्त्तत्वात् । कस्तर्ह्यहमित्यत्राह - त्व**मसङ्गोऽसि**-शरीरादिसङ्गविवर्जितोऽसि, किञ्च **निरा-कारो**ऽसि-बालाद्याकारविकारविरहितोऽसि, यथोक्तम्-नाहं बालो न वृद्धोऽहं न युवैतानि पुद्गले-इति (इष्टोपदेशे ३०) । यद्वा मनुष्याद्याकारवर्जितोऽसीत्यर्थः ।

ननु च सर्वमप्येतदात्मलक्षणं खपुष्पादावपि समन्वेतीत्यात्मनोऽपि तदन्तर्भावप्रसङ्ग इत्याशङ्क्याह-**विश्वसाक्षी** - विमलकेवलालोकालोकितलोकालोकः, एतेन खपुष्पादिव्यवच्छेद आत्मभावविधिश्च प्रतिपादितः । तदेवंविधोऽहमिति मत्वा त्वं **सुखी भव** - स्वाज्ञानभवं भवदुःखं दूरीकुरु, अभिहितं च - आत्माज्ञानभवं दुःख-मात्मज्ञानेन हन्यते - इति (योगशास्त्रे ४-३) । आत्मज्ञानमेवाभियुक्ततयाभिगमयन्नाह-

**धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो ! ।**
**न कर्ताऽसि न भोक्ताऽसि मुक्त एवासि सर्वदा ॥६॥**

**धर्माधर्मौ** - पुण्यपापे, **सुखं दुःखं** च **मानसानि** - मनःसत्कानि, एतदेव व्यतिरेकेणावधारयति-**ते**-सर्वोपाधिशून्यस्य तव, **न** - नैव भवन्ति, तदात्मकताविरहेण तत्सम्बन्धित्वस्याप्यसम्भवात् । अत्र तदात्मकताविरहस्तयोः पुद्गलात्मकत्वात्, तथा चोक्तम् - नात्मा पुण्यं न वा पाप - मेते यत्पुद्गलात्मके । आद्यबालशरीरस्यो-पादानत्वेन कल्पिते - इति (अध्यात्मसारे १८-५९) । एतेन तत्सम्बन्धासम्भवोप्यावेदितः, आकाशपङ्कवन्मूर्त्तामूर्त्तयोस्तदसम्भवात् । इत्थं च धर्माधर्मफलभूतयोः सुखदुःखयोरप्यात्मसम्बन्धित्वं प्रतिषिद्धमेव ।

तस्माद् हे **विभो** ! - हे साक्षितासाम्राज्येश्वर ! त्वं **कर्ता नासि**, उक्तवत्साक्षिमात्रत्वात्, न चैवं व्यवहारानुपपत्तिरिति वाच्यम्, सङ्ग्रहनयाभिप्रायस्य प्रस्तुतत्वात्, तदिदमुक्तम् - द्रव्यास्तिकस्य प्रकृतिः शुद्धा सङ्ग्रहगोचरा । येनोक्ता सम्मतौ श्रीमत्सिद्धसेनदिवाकरैः ॥ तन्मते च न कर्तृत्वं भावानां सर्वदान्वयात् । कूटस्थः केवलं तिष्ठत्यात्मा साक्षित्वमाश्रितः॥ कर्तुं व्याप्रियते नाय-मुदासीन इव स्थितः । आकाशमिव पङ्केन लिप्यते न च कर्मणा-इति (अध्यात्मसारे १८-८८, ९०) । ननु तथापीतरनयापलाप एवं स्यादिति चेत् ? सोऽयं सर्वनयेषु तुल्यः । अथैवं स्वरूपस्याप्यकर्तृत्व आपन्ने स्वाभिप्रायेणापि विरोधः, तत्कर्तृत्वेऽभ्युपगतेऽकर्तृत्वमनुपपन्नं स्यादित्युभयतः पाशारज्जूरिति । मैवम्, स्वरूपस्य करणीयत्वविरहात्, प्रागभावप्रसङ्गात्, ज्ञेयमात्रत्वात्, तदाह-स्वरूपं तु न कर्तव्यं ज्ञातव्यं केवलं स्वतः । दीपेन दीप्यते ज्योतिर्न त्वपूर्वं विधीयते-इति (अध्यात्मसारे १८-९१) । अत एव त्वं **भोक्ताऽपि नासि**, कर्तृत्वाभावे भोगासम्भवात्, अन्यथातिप्रसङ्गात्, मुक्तानामपि तदापत्तेः । नन्वेवं मम मुक्तत्वाभ्युपगमप्रसङ्ग इति चेत् ? को वा किमाह ? **मुक्त एवासि सर्वदा**, कर्तृत्वादिसर्वोपाधिशून्यस्य मुक्तत्वानभ्युपगमे मुक्तानामपि तदनभ्युपगमप्रसक्तेः । अथैवं साङ्ख्यमतप्रवेश इति चेत् ? एकान्तवादे तथैव, स्याद्वादे त्वस्यापि

स्यात्काराङ्कितया न कोऽपि दोषः। वस्तुतस्तु नित्यमुक्त्येकान्तवादिनामप्येकान्तो वाङ्मात्रमेव, पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः । शिखी मुण्डी जटी वापि, मुच्यते नात्र संशयः, इत्यादिवचसा स्वयमेव बन्धमुक्त्यभ्युपगमात् । प्रस्तुतेऽपि ग्रन्थसाङ्गत्यार्थं स्याद्वाद एव शरणम्, अन्यथा 'अयमेव हि ते बन्धो' 'वीतशोकः सुखी भव' - इत्यादिवक्ष्यमाणग्रन्थानां विरोधापत्तेः, सदातनमुक्ते बन्धादेरेवासम्भवात् । इत्थमेवाग्रेऽपि सर्वत्र स्याद्वाददृष्ट्या द्रष्टव्यम्, न त्वेकान्तव्यवहारानुपपत्त्याद्याशङ्कनीयम् । न च एवकार एवात्र स्यात्कारप्रतीतौ बाधक इति वाच्यम्, स्यादस्त्येवेत्यादिभङ्ग्या तयोः परस्परपरिहाराख्यविरोधाभावेन बाधकभावाभावात्, ननु तथापि ग्रन्थकृतोऽप्ययमेवाभिप्राय इति कथं प्रत्येतव्यमिति चेत् ? अनन्तरमेव मुक्तप्रायत्वोक्तिश्रवणादिति गृहाण, तदाह-

**एको द्रष्टाऽसि सर्वस्य मुक्तप्रायोऽसि सर्वदा ।**
**अयमेव हि ते बन्धो द्रष्टारं पश्यसीतरम् ॥७॥**

**सर्वस्य** - स्वपरपदद्वयवाच्यविश्वस्य, **एकः** - अद्वितीयः, **द्रष्टासि** - कर्तृत्वादिव्यवच्छेदावशिष्टसाक्षित्वमात्रमास्थितोऽसि, किमुक्तं भवति - **सर्वदा मुक्तप्रायोऽसि,** प्रायत्वोक्तौ बीजमाह - **अयमेव हि ते बन्धो** यत्त्व**मितरम्** - स्वव्यतिरिक्तं देहादिकम्, **द्रष्टारं पश्यसि** - द्रष्टृत्वेन परिकल्पयसि, एष एव बन्धो बन्धहेतुर्वा यदतत्तत्कल्पनेति

हृदयम् । तदाह-तथाप्यस्यासौ स्याद्यदिह किल बन्धः प्रकृतिभिः, स खल्वज्ञानस्य स्फुरति महिमा कोऽपि गहनः - इति (समयसारवृत्तावात्मख्यातौ कलशः-१९५) । अज्ञानस्यैव भेदान्तरं भिनत्ति -

**अहं कर्त्तेत्यहंमानमहाकृष्णाहिदंशितः ।**
**नाहं कर्त्तेति विश्वासामृतं पीत्वा सुखी भव ॥८॥**

**अहं कर्त्तेति** कर्तृत्वेनात्मनो मननम**हंमानः**, स एव **महाकृष्णाहिः** - अजगरसङ्काशः श्यामः सर्पः, मूर्च्छादिमृत्युपर्यन्तप्रत्यपायहेतुतासाधर्म्यात्, तेन **दंशितः**, कर्तृत्वाहङ्कारकदर्थित इत्यर्थः, एवंविधस्त्वं **नाहं कर्त्तेति** यो **विश्वासः**-दृढप्रत्ययः, स एवा**मृतम्**, मरणवारणत्वात्, तत् **पीत्वा** - प्रत्यात्मप्रदेशं भावयित्वा, **सुखी** - साक्षितासुखरसास्वादानन्दितो **भव**, कर्तृत्वावलेपापगममन्तरेण बन्धनिबन्धनदुःखविमुखत्वासम्भवात्, यदाह-पराश्रितानां भावानां कर्तृत्वाद्यभिमानतः । कर्मणा बध्यतेऽज्ञानी ज्ञानवांस्तु न लिप्यते - इति (अध्यात्मसारे १८-१०९) । अतः कर्तृत्वाभिमानोऽवमान्यः, तद्भावे भवभ्रान्त्यपगमासम्भवात्, उक्तं च - ये तु कर्तारमात्मानं मन्यन्ते तमसा हताः । सामान्यजनवत्तेषां न मोक्षोऽपि मुमुक्षताम् - इति (समयसारवृत्तौ १९९) । शेषाशेषाज्ञानवितानहानायाह -

**एको विशुद्धबोधोऽहमिति निश्चयवह्निना ।**
**प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव ॥९॥**

**एकः** - रागादिविजातीयकालुष्यशून्यतयाऽद्वितीयः, अत एव **विशुद्धः** - निर्मलः, **बोधः** - चिच्चमत्कारमात्रम्, **विशुद्धबोधः**, सोऽहमस्मि, **इति** यो **निश्चयः**-दाढ्र्यातिशय-सम्पन्नः सम्प्रत्ययः, स एव **वह्निः निश्चयवह्निः**, तेन, वक्ष्यमाणदाह्यदाहकत्वसाधर्म्यात्, अज्ञानमेव गहनम् - अरण्यम् - **अज्ञानगहनम्**, मतिमोहादिहेतुत्वात्, तत् **प्रज्वाल्य** - भस्मसात्कृत्य **वीतशोकः** सन् **सुखी भव**, इष्टत्वाद्यज्ञाना-पहत्येष्टवियोगादिनिमित्तकशोकशून्यतयाऽऽनन्दितो भवेति भावः। किञ्च -

**यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् ।**
**आनन्दपरमानन्दः स बोधस्त्वं सुखं चर ॥१०॥**

**यत्र** - स्थिरादृष्ट्यनुविद्ध आत्मपरिणामे, **इदं विश्वं रज्जुसर्पवत् कल्पितं भाति** - यथा रज्जौ सर्पमतिः कल्पनामात्रम्, तथा विश्वमपि दृश्यमाणं विश्वं कल्पनामात्रमेवेति संवेदनं भवति, यथोक्तम् - बालधूलीगृहक्रीडातुल्याऽस्यां भाति धीमताम् । तमोग्रन्थिविभेदेन भवचेष्टाखिलैव हि ॥ मायामरीचिगन्धर्वनगरस्वप्नसन्निभान् । बाह्यान् पश्यति तत्त्वेन भावान् श्रुतविवेकतः-इति (योगदृष्टिसमुच्चये १५५, १५६)

यथा हि कल्पना कल्पनोत्तरकाले विलीयते, यथा ह्यम्बरस्थितगन्धर्वनगरम्बरोऽप्युत्तरकाले विशीर्यते, अत एव स मायामात्रम्, तथा विश्वमपीदं दृष्टनष्टप्रायतया कल्पितमेवेति हृदयम् । तथा च पारमर्षम् - सुविणुव्व सव्वमालमालंति - इति (पञ्चसूत्रे ३) । एवं य आत्मपरिणामः कल्पनामात्रावलोकनाय कल्पते **स आनन्दपरमान्दो बोधस्त्वम्**, आह्लादाशेषविशेषवाचक आनन्दः, यावत्परमानन्दोऽपि त्वमेव ज्ञानस्वरूप इत्याशयः, अतः कल्पनानल्पकदर्थना विहाय त्वं **सुखं चर** ।

न च कल्पितत्वभानमात्रेणानन्दोदय इति दुःश्रद्धेयमिति वाच्यम्, बन्धमोक्षयोरपि भानाधीनत्वात्, एतदेव स्फुटयति-

**मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि ।**
**किंवदन्तीह सत्येयं या मतिः सा गतिर्भवेत् ॥११॥**

**हिः**-यतः, मुक्तमात्मानमभिमन्यत इति **मुक्ताभिमानी**, स मुक्तो भवति, बद्धमात्मानमभिमन्यत इति **बद्धाभिमानी** सो**ऽपि बद्धो** भवति, अपिः - अभिमानानुरूपफलावाप्तेरुभयत्रसादृश्यव्यञ्जकः । कुवासनातो हि बन्धशङ्कोदयः, तत्त्वज्ञानतस्तदस्तभावे स्वत एव स्यान्मुक्ततानुभूतिः, तदिदमुदितम् - शुद्धनिश्चयतस्त्वात्मा न बद्धो बन्धशङ्कया, भयकम्पादिकं किन्तु रज्जावहिमतेरिव ॥ दृढाज्ञानमयीं शङ्का-

मेनामपनिनीषवः । अध्यात्मशास्त्रमिच्छन्ति श्रोतुं वैराग्य-काङ्क्षिणः ॥ दिशः प्रदर्शकं शाखा - चन्द्रन्यायेन तत्पुनः । प्रत्यक्षविषयां शङ्कां न हि हन्ति परोक्षधीः ॥ शङ्खे श्वेत्यानुमानेऽपि दोषात्पीतत्वधीर्यथा । शास्त्रज्ञानेऽपि मिथ्याधी-संस्काराद् बन्धधीस्तथा ॥ श्रुत्वा मत्वा मुहुः स्मृत्वा, साक्षादनुभवन्ति ये । तत्त्वं न बन्धधीस्तेषामात्माऽबद्धः प्रकाशते-इति (अध्यात्मसारे १८/१७४-१७८) । इत्थं **चेयं सत्येह किंवदन्ती** यद् **या मतिः सा गतिर्भवेत्** इति । अतो मुक्ताभिमानमेव विभावयन्नाह-

**आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः ।**
**असङ्गी निःस्पृहः शान्तो भ्रमात्संसारवानिव ॥१२॥**

**आत्मे**त्युद्देश्यनिर्देशः, विधेयमाह-**साक्षी** - भवचक्रपुरे प्रतिपाटकं नाटकानां द्रष्टा, पश्यकमात्रः, न तु तदन्तर्भावाभि-मानीत्यभिप्रायः । तथा **विभुः** - सम्पूर्णतया स्ववशः, तमेव विशेषयति-**पूर्णः** - अन्यूनसमतासमाधिसम्पन्नः, **एकः** - प्रधानः, अनन्यगुणगणालङ्कृतत्वात्, **मुक्तः**, बन्धबुद्ध्यति-क्रमात्, **चित्** - केवलज्ञानात्मकः, **अक्रियः** - चेष्टाशून्यः, कृतकृत्यत्वात्, कृत्याभावद्वा, **असङ्गी**, रागादिविरहितत्वात्, **निःस्पृहः**, स्वभावसम्प्राप्तिसम्प्राप्तस्पृहणीयत्वात्, **शान्तः**, उपशमनीरनिमग्नत्वात् । ननु च कथमित्थम्भूतस्यास्य संसार

इत्याशङ्क्याह-**भ्रमात्**-अविद्योपजनितभ्रान्तिसकाशात् **संसारवानिव** - परमार्थतो मुक्तोऽप्यमुक्तवद्विचेष्टते । अतो भ्रममेवास्य भिनत्ति-

**कूटस्थं बोधमद्वैतमात्मानं परिभावय ।**
**आभासोऽहं भ्रमं मुक्त्वा भावं बाह्यमथान्तरम् ॥१३॥**

**कूटस्थम्** - शिखरिशिखरवन्निश्चलत्वेनावस्थितम्, स्वरूपतो लेशस्यापि चलनस्याभावात्, **बोधम्** - विज्ञानमयम्, **अद्वैतम्** - सर्वद्वन्द्वातिक्रान्तम्, एवंविध**मात्मानं परिभावय** - तत्तत्पर्यायाविर्भावाय विभावय, परिभावनप्रकारमेवाभिधत्ते- **आभासोऽहम्** - रागादितत्तत्संवेदनमेव मत्पर्याय इत्येतदाकारकं **भ्रमं मुक्त्वा, बाह्यमान्तरं** च **भावं मुक्त्वा, अथः**- समुच्चये, तदर्थस्तु दर्शित एव । अत्र बाह्यो भावः-देहादिः, आन्तरस्तु विकल्पः, तौ मुक्त्वेति तयोरात्मधियं ममकारं च परित्यज्य । तदवोचाम - विकल्पोऽपि यदा नाहं, यदहं निर्विकल्पकः । सुतरां देहदारादे - रन्योऽस्मि पुद्गलादहम् - इति (शमोपनिषदि ५-६) । आहुश्च-जलहिंमि असंखोभे पवणाभावे जह जलतरंगा । परपरिणामाभावे णेव वियप्पा तया हुंति ॥ का अरती आणंदे के व त्ति वियप्पणं ण जत्थुत्तं । अण्णे तत्थ वियप्पा पुग्गलसंजोगजा कत्तो ? - इति (धर्मपरीक्षायाम् ९७, ९८) । किञ्च -

**देहाभिमानपाशेन चिरं बद्धोऽसि पुत्रक ! ।**
**बोधोऽहं ज्ञानखड्गेन तं निष्कृत्य सुखी भव ॥१४॥**

देह एवाहमित्यभिमननम् - **देहाभिमानः**, स एव **पाशः**, बन्धनिबन्धनसादृश्यात्, **देहाभिमानपाशः**, तेन त्वं **चिरम्** - अनादिकालात्, **बद्धोऽसि** - भवचारके नियन्त्रितोऽसि, अतो हे **पुत्रक ! बोधोऽहम्** - देहादिजड-विलक्षणलक्षणो विज्ञानघनोऽहम् - इत्येतदाकारकं यज्ज्ञानं तदेव **खड्गः**-असिः, **ज्ञानखड्गः**, उक्तपाशच्छेदच्छेकत्वात्, तेन **तं** पाशं **निष्कृत्य सुखी भव** - आत्ममोचनेन जीवन्मुक्त्यानन्दानुभूतिभाग् भव, देहात्मधिय एव संसार-बीजत्वेन तत्प्रतिपक्षभावनाया मोक्षप्रयोजकत्वात्, उक्तं च - देहान्तरगतेर्बीजं देहेऽस्मिन्नात्मभावना । बीजं विदेह - निष्पत्तेरात्मन्येवात्मभावना - इति (समाधितन्त्रे ७४) । किञ्च-

**निःसङ्गो निष्क्रियोऽसि त्वं स्वप्रकाशो निरञ्जनः ।**
**अयमेव हि ते बन्धः समाधिमनुतिष्ठसि ॥१५॥**

**त्वं निःसङ्गो**ऽसि, **निष्क्रियोऽसि स्वप्रकाशो**ऽसि - आत्मसुखाविर्भावाय परापेक्षापरिवर्जितोऽसि, **निरञ्जन**श्चासि, सुन्दरासुन्दरोपनिपातोपजातानुभावरहितोऽसि, **अयमेव हि ते बन्धः**, यत्त्वं **समाधिमनुतिष्ठसि**, अयं भावः - समाधिर्हि स्वरूपैकगोचरं ध्यानम्, यदाह-स्वरूपमात्रनिर्भासं समाधिर्ध्यान-

मेव हि - इति (द्वात्रिंशद्द्वात्रिंशिकायाम् २४-२७)। तस्य च स्वत एव निःसङ्गत्वाद्युपेते सुपात्रे स्फुरणा स्यात्, न तु स कदाचिदपि हाठिकाधीनः। हठस्य प्रत्युत तत्परिपन्थित्वात्, किञ्च समाधौ विकल्पोपरमस्यावश्यकत्वेन 'किलाहं समाधि-मनुतिष्ठामी'ति विकल्पोऽपि तत्प्रत्यूह एव।

इदं च समाध्यनुष्ठाने बन्धत्वोक्ते रहस्यम्, अनुष्ठानं हि न किञ्चित् स्वरूपतः सुन्दरमितरं वा, अपि तु सापेक्षतया, प्रकृते नित्यमुक्तपर्यायापेक्षया समाध्यनुष्ठानानुगतः पर्यायोऽसुन्दर एवेत्युच्चतमास्पदस्थस्याधस्तनानुष्ठानासेवने बन्धत्ववचः सूपपन्नमेव, यत्किञ्चिच्चिकीर्षितबाधकस्यैव बन्धत्वात्, तथा लोकव्यवहारदर्शनात्। ननु समाध्याद्यधस्तनानुष्ठानमेव मम चिकीर्षितमिति नोक्तदोषवकाशः, साध्यस्य बाधकत्वायोगादिति चेत् ? अत्राह-

**त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः।**
**शुद्धबुद्धस्वरूपस्त्वं मा गमः क्षुद्रचित्तताम् ॥१६॥**

**इदं विश्वं त्वया व्याप्तम्,** विश्वेऽपि विश्वे त्वज्ज्ञाना-विषयस्य विरहात्, **त्वयि** विमलकेवलज्ञानादर्शे इदं विश्वं **यथार्थतः** - स्वस्वरूपानतिक्रमेण, **प्रोतम्** - प्रतिबिम्बितम्, इत्थं च **त्वं शुद्धबुद्धस्वरूपः** - परिनिर्मलबोधविजातीय-लेशेनाप्यकलङ्कितलक्षणः। यत एवं ततस्त्वं **क्षुद्रचित्तताम्**

- तुच्छानुष्ठानमेव मम प्रायोग्यमित्यध्यवसायम्, **मा गमः**, बन्धाभिमानस्य बन्धनिबन्धनतया प्राक् प्रमाणितत्वात् ।

नन्वेवं सर्वस्यापि कुशलानुष्ठानस्यानुपादेयतापत्तिरिति चेत्? सेयमिष्टापत्तिर्दशाविशेषे, यथाभिहितम् - निराचारपदो ह्यस्या-मतिचारविवर्जितः । आरूढारोहणाभावगतिवत् त्वस्य चेष्टितम्- इति (योगदृष्टिसमुच्चये १७९) । तादृशदशाविरहे तु सर्वमपि स्वोचितमनुष्ठानमुपादेयमेवेति दृढमवधारणीयम् ।

किञ्च चेद्दशाविशेषे समाधियत्नोऽपि बन्धहेतुस्तदा प्रमादस्य तु का वार्त्तेत्यधस्तनयोगिनामपि स्वोचिताचारादरे दृढमालम्बनमिदमित्यलं पल्लवितेन ।

क्षुद्रचित्ततागमनं प्रतिषेध्य गन्तव्यमुपदिशति -

**निरपेक्षो निर्विकारो निर्भरः शीतलाशयः ।**
**अगाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः ॥१७॥**

**निरपेक्षो** भवेति सर्वत्र सम्बध्यते, परस्पृहां परिहरेत्यर्थः, तस्या एव दुःखलक्षणत्वात्, तदाह-परस्पृहा महादुःखं निःस्पृहत्वं महासुखम् । एतदुक्तं समासेन, लक्षणं सुख-दुःखयोः-इति (ज्ञानसारे १२-८) । तथा **निर्विकारो** भव-विहितरागादिविकारनिकारः स्याः, **निर्भरो** भव - उत्तारित-कर्मभारत्वेनात्यन्तलघुभूयभाग् भव । तथा **शीतलाशयः** - उपशमामृताभिषेकाभिभूतान्तरारिघर्महृदयो भव तथा **अगाधा**-गाम्भीर्यातिशयेनानुपलभ्यमानहर्षविषादादिस्ताघा **बुद्धिः** -

तत्त्वानुगामिनी प्रेक्षा यस्य सः - **अगाधबुद्धिः**, स भव तथाऽ**क्षुब्धो** भवविकल्पपवनकामविगततरङ्गस्तिमितोदधि-सङ्काशः स्याः । किमुक्तं भवति-चिन्मात्रवासनो भव - ज्ञानानन्दसुधारसेन प्रत्यात्मप्रदेशं भावितात्मा भव । अत्र मात्रपदेनेतरवासनाव्यवच्छेद उक्तः, स च तत्रासत्ताप्रतीतेरेव शक्य इत्याह -

**साकारमनृतं विद्धि निराकारं तु निश्चलम् ।**
**एतत्तत्त्वोपदेशेन न पुनर्भवसम्भवः ॥१८॥**

आकारः प्रकृते पौद्गलिकं संस्थानं गृह्यते, तेन सहितम् - **साकारम्** - पुद्गलद्रव्यम्, तद**नृतम्** - अनित्यत्वेना-सत्प्रायम्, इति त्वं **विद्धि**-अनित्यभावनानुभावेन बुध्यस्व, यथाभिहितम्-आयुर्वायुतरत्तरङ्गतरलं लग्नापदः सम्पदः, सर्वेऽपीन्द्रियगोचराश्च चटुलाः सन्ध्याभ्ररागादिवत् । मित्रस्त्री-स्वजनादिसङ्गमसुखं स्वप्नेन्द्रजालोपमं, तत्किं वस्तु भवे भवेदिह मुदामालम्बनं यत्सताम् - इति (शान्तसुधारसे १-२) । किं तर्हि नित्यमित्यत्राह - **निराकारम्**-आकाररहितम्, आत्मद्रव्यमित्यर्थः, **निश्चलम्**-स्वस्वरूपचलनलेशविवर्जितम्, **तुः** - अवधारणार्थः, चिच्चमत्कारमात्रादात्मद्रव्यादन्यत्सर्व-मप्यनित्यम्, इदमेकमेव नित्यमिति हृदयम्, यथोक्तम्-नित्यमेकं चिदानन्दमयमात्मनो रूपमभिरूप्य सुखमनुभवेयम् - इति

(शान्तसुधारसे १-९) । ननु च यद्यात्मद्रव्यं निश्चलमेव, तदा नृनारकादिपर्यायभेदानुपपत्तिरिति चेत् ? न, सत्यपि तद्भेद आत्मद्रव्यभेदाभावात्, आत्मनोऽन्वयित्वात्, हेमकेयूरादिवत्, भिन्नस्वभावत्वेन परमार्थत आत्मपर्यायत्वस्यैवाभावाच्च, तदाह- नृनारकादिपर्यायै-रप्युत्पन्नविनश्वरैः । भिन्नैर्जहाति नैकत्व-मात्मद्रव्यं सदान्वयि ॥ यथैकं हेम केयूर-कुण्डलादिषु वर्तते । नृनारकादिभावेषु, तथात्मैको निरञ्जनः॥ कर्मणस्ते हि पर्याया, नात्मनः शुद्धसाक्षिणः । कर्म क्रियास्वभावं यदात्मा तु ज्ञस्वभाववान्-इति (अध्यात्मसारे १८/२३-२५)

तदे**तत्तत्त्वोपदेशेन** पुनः पुनर्भवन्त्यत्र भविन इति **पुनर्भवः** -संसारः, तस्य **सम्भवो न** भवति, उक्ततत्त्वोपदेश-श्रवणेनानात्मास्थाविलययोगेनाभिहितात्महिताभियोगानामचिरेणा-पुनर्भवसम्भवात्, न हि वन्ध्यासुतास्थया स्वसुतमुपेक्षते कश्चिद् विपश्चिदिति । आत्मास्थामेव दृढयितुमाह-

**यथैवादर्शमध्यस्थे रूपेऽन्तः परितस्तु सः ।**
**तथैवास्मिन् शरीरेऽन्तः परितः परमेश्वरः ॥१९॥**

**यथैवादर्शमध्यस्थे** - दर्पणान्तर्दृश्यमानतयावस्थिते **रूपे** - देहादिछायापुद्गले, **अन्तः परितः स तु** - आदर्श एव भवति, तदतिरिक्तस्य तत्राभावात् । एवमुपमानमुक्त्वोपमेयमाह - **तथैवास्मिन्** - प्रत्यक्षमीक्ष्यमाणे **शरीरेऽन्तः परितः**

**परमेश्वरो** भवति, पञ्चभूतात्मकस्य देहस्य तदतिरिक्ता-लिङ्गयितुर्विरहात् । अथ तस्य कर्मकलङ्कितत्वेन परमेश्वरत्वायोग इति चेत् ? पङ्काङ्कितस्य हेम्नः सुवर्णत्वायोगोऽपि भवतु । ननु सुवर्णमेव तदविकृतस्वस्वरूपव्यवस्थितत्वादिति चेत् ? समः समाधिः, शुद्धनयाभिप्रायेणात्मनोऽपि तथात्वात् । अशुद्धनयतोऽपि ध्याननिर्धूतकर्मायमेव परमेश्वर इति न कोऽपि दोषः, असदुत्पत्त्यदर्शनात्प्रागपि परमेश्वरत्वसिद्धेः, उक्तं च-अयमात्मा स्वयं साक्षात् परमात्मेति निश्चयः । विशुद्धध्यान-निर्धूत-कर्मेन्धनसमुत्करः -इति (ज्ञानार्णवे २७-७) । किञ्च-

**एकं सर्वगतं व्योम बहिरन्तर्यथा घटे ।**
**नित्यं निरन्तरं ब्रह्म सर्वभूतगणे तथा ॥२०॥**

**( इत्यष्टावक्रानुभवोपदेशः )**

**यथा घटे बहिरन्तश्च एकमेव सर्वगतं व्योम** भवति, घटावच्छिन्नस्यापि गगनस्य वस्तुतो निरवच्छिन्नत्वात्, उपाधिमात्रत्वाद्धटस्य, अन्यथा तद्भेदेऽपि गगनभेदानिवृत्ति-प्रसङ्गात् । एवमुपमानमभिधायोपमेयमाह - **तथा सर्वभूतगणे** - समस्तसत्त्वसन्दोहे **नित्यम्** - स्वभावाव्ययस्वभावम्, तथोक्तम् - तद्भावाव्ययं नित्यम् - इति (तत्त्वार्थसूत्रे ५-३०), **निरन्तरम्** - परस्परं सदृशकेवलज्ञानादिविभूति-मत्तयाऽन्तररहितम्, **ब्रह्म** - यथायोगमाविर्भूतस्तिरोभूतो वा

परमात्मा वर्तते । न ह्याविर्भावादिभेदमात्रतो वस्तुभेद इति प्रतीतम् । नन्वेवम् - सर्वं वै खल्विदं ब्रह्म नेह नानास्ति किञ्चन - इत्यद्वैतनयाङ्गीकारापत्तिरिति चेत् ? सेयमिष्टापत्तिः, सर्व-नयाङ्गीकार एव स्याद्वादस्य स्वरूपलाभात्, उक्तं च-
बौद्धानां ऋजुसूत्रतो मतमभूद्वेदान्तिनां सङ्ग्रहात्, साङ्ख्यानां तत एव नैगमनयाद् यौगश्च वैशेषिकः । शब्दब्रह्मविदोऽपि शब्दनयतः सर्वैर्नयैर्गुम्फिता, जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते - इति (अध्यात्मसारे १९-६) । एवं प्रकृतेऽपि सङ्ग्रहनयाभिप्रायेण ब्रह्माद्वैतवचःसमन्वयः कर्तव्यः । न चैतदनागमिकम्, एगे आया (स्थानाङ्गे १-१) - इति पारमर्षोपलब्धेः । एकान्तस्तु सर्वत्राप्यनिष्ट एवेत्येतद्वचनस्य विषयान्वेषणं विधेयम्, तच्च व्याख्यायां विहितमेवेत्यलं प्रसङ्गेन। इत्यष्टावक्रगीतायामादिमप्रकरणे ज्ञानोपनिषद् । इत्थं ज्ञानोपनिषदिषदाकर्णनेनावगतस्वस्वभाव उवाच जनकः -

**[ इत्थं गुरूक्तिपीयूषास्वादानुभवमात्मनः ।**
**आविश्चकार आश्चर्यं शिष्यो निजगुरुं प्रति ॥ ]**

## प्रकरण-२

**अहो निरञ्जनः शान्तो बोधोऽहं प्रकृतेः परः ।**
**एतावन्तमहं कालं मोहेनैव विडम्बितः ॥१॥**

**अहो** इत्यनन्ताद्भुतातुलात्मर्द्धिज्ञप्तिसञ्जातानल्पानन्दाभिव्यञ्जक उद्गारः, **निरञ्जनः**, आकाशवदरूपत्वेनाञ्जनासम्भवात्, **शान्तः**, कषायकोलाहलव्यतीतत्वात्, **बोधः**, स्वयंभूस्फुरणसम्प्रवृत्तसञ्ज्ञाननिस्यन्दमात्रत्वात्, एवंविधोऽहं **प्रकृतेः** - ज्ञानावरणादिकर्मसकाशात्, **परः** अत्यन्तमतिरिक्तविग्रहः कालत्रयाश्रयतादात्म्यपरिणामनिवृत्तिमत्त्वात् । सो**ऽहमेतावन्तं कालं मोहेनैव विडम्बितः**, स्वस्वरूपानभिज्ञतयाऽजायमानः सिंह इव कदर्थितः । तदेतद्विडम्बनाविराम आकलयामि स्वरूपसमृद्धिम् -

**यथा प्रकाशयाम्येको देहमेनं तथा जगत् ।**
**अतो मम जगत्सर्वमथवा न च किञ्चन ॥२॥**

**यथा**ऽहमे**क एनं** दृश्यमानं मदीयं **देहं प्रकाशयामि** - तद्व्याप्ततया स्वसंवेदनविषयीकुर्वे, **तथा जग**दपि प्रकाशयामि, ज्ञानविषयत्वेन व्याप्तेः स्वसंवेदनगोचरतायाश्च तत्रापि तुल्यत्वात् । तस्माद्यथा मत्प्रकाश्यतया देहे मदीयत्वव्यवहारस्तथा जगत्यपि, **अतः सर्वं जगन् मम**, न्यायस्योभयत्र तुल्यत्वात्, **अथवा किञ्चनापि न च** - नैव, तत एव ।

यदि हि मत्प्रकाश्येऽपि मदीयत्वव्यवहारो नेष्यते, तदा मच्छरीरेऽपि स मा भूदिति हृदयम् । अतः-

**सशरीरमहो विश्वं परित्यज्य मयाऽधुना ।**
**कुतश्चित्कौशलादेव परमात्मा विलोक्यते ॥३॥**

**अहोऽधुना मया सशरीरं विश्वं परित्यज्य,** सर्वतो ममकारमुत्तार्येत्याशयः । **कुतश्चित् कौशलादेव** - वर्णयितुमशक्यात् प्रवचनाञ्जनप्रगुणीकृतप्रेक्षापाटवादेव, **परमात्मा** - निःशेषदोषविरहादिविशिष्टो मदात्मा, तदाह - णिस्सेसदोसरहिओ केवलणाणाइपरमविभवजुदो । सो परमप्पा उच्चइ तव्विवरीओ ण परमप्पा - इति (नियमसारे ७), स **विलोक्यते** - साक्षात्क्रियते । परमात्मनिभालने सति यत् प्रतिभासते तदाह-

**यथा न तोयतो भिन्नास्तरङ्गाः फेनबुद्बुदाः ।**
**आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतम् ॥४॥**

**यथा तरङ्गाः फेनबुद्बुदाश्च तोयतो भिन्ना न,** तद्विनिर्गतत्वेन तदनतिरिक्तत्वात्, तत्स्वरूपवत् । **तथा विश्वमात्मनो भिन्नं न,** यतस्तद् **आत्मविनिर्गतम्,** विश्वस्यापि विश्वस्यात्मकृतकर्मनिर्वर्तिततत्वात्, न चैवं कालादिकर्तृत्वप्रतिक्षेप इति वाच्यम्, प्राधान्यानुयायित्वाद्व्यपदेशस्य, सहस्रवाह्यशिबिकारूढे नृपे याति 'राजा गच्छति' इतिव्यपदेशवत्, न च तत्र नृसहस्रगमनप्रतिक्षेपः, एवमत्रापि

विज्ञेयम् । प्राधान्यं तु पुरुषस्य कथञ्चिदुपपन्नमेव, यथोदितम्-त्वमेव दुःखं नरकस्त्वमेव, त्वमेव शर्मापि शिवस्त्वमेव । त्वमेव कर्मापि मनस्त्वमेव, जहीह्यविद्यामवधेहि चात्मन् ! - इति (अध्यात्मकल्पद्रुमे १६-२) एवम् - पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् - (ऋग्वेदे १०-९०) - इत्याद्युक्तयोऽपि प्रधानगौणभावार्पणेन समन्वेयाः । एकान्ते तु भवाभवाभेदादिका बहुदोषा इति त्याज्य एव सः । तथाहुः - पुरुषाद्वैतं तु यदा भवति, विशिष्टमथ बोधमात्रं वा । भवभवविगमविभेदस्तदा कथं युज्यते मुख्यः ? - इत्यादि (षोडशके १६-७) ।

ननु तथापि पुरुषाद्वैतदेशनायाः किं प्रयोजनमिति चेत् ? समभावसिद्धिरिति गृहाण, अन्वाहुश्च-अन्ये व्याख्यानयन्त्येवं समभावप्रसिद्धये । अद्वैतदेशना शास्त्रे निर्दिष्टा न तु तत्त्वतः- इत्यादि (शास्त्रवार्तासमुच्चये ८-८) । इत्थमेवाग्रेऽपि ग्रन्थेऽद्वैतवचोविषयो मृग्यः, अन्यथा दुर्विहितत्वादिदोषप्रसक्तेः।

निदर्शनान्तरेणाद्वैतं साधयति-

**तन्तुमात्रो भवेदेव पटो यद्वद्विचारितः ।**
**आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितम् ॥५॥**

**यद्वत् पटो विचारितः** सन् **तन्तुमात्र एव भवेत्**, तद्धेतुकत्वात्तन्मयत्वाच्च तस्य, **तद्वदिदं विश्वम**पि **विचारितं**

सत् **आत्मतन्मात्रमेव** पर्यवस्यति, प्रागुक्तनीत्या तद्धेतुकत्वात्तस्य तन्मयत्वाच्च । दृष्टान्तान्तरमाह -

**यथैवेक्षुरसे क्लृप्ता तेन व्याप्तैव शर्करा ।**
**तथा विश्वं मयि क्लृप्तं मया व्याप्तं निरन्तरम् ॥६॥**

**यथैवेक्षुरसे क्लृप्ता** - निर्मिता **शर्करा तेनैव व्याप्ता** भवति, तत्त्वान्तरस्य व्यापकस्य विरहात्, **तथा मयि विश्वं क्लृप्तम्**, मन्निर्मितत्वात्तस्य, **मया** च **निरन्तरं व्याप्तम्** पूर्वोदितयुक्त्या मत्प्रकाश्यत्वात्तस्य ।

ननु चैवं प्रतिभासमानजगदनुपपत्तिरिति चेत् ? स एष आत्माज्ञानापराधः, एतदेवोदाहरति -

**आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्न भासते ।**
**रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते न हि ॥७॥**

**आत्माज्ञानात्** - विश्वरूपस्यात्मस्वरूपस्यानवगमात्, **जगद् भाति** - प्रतिभासते, **आत्मज्ञानात्** - यथोदितात्मस्वरूपावगमात्, **न भासते,** तज्ज्ञाने विश्वस्याप्यात्मत्वेनैव प्रतिभासनात्, तदिदमुक्तं प्रकारान्तरेण - केवलस्यात्मन आत्मनात्मनि सञ्चेतनात् केवली - इति (प्रवचनसारे ३३)। अत्र निदर्शनमाह - यथा **रज्ज्वज्ञानात्** - नेयं रज्जूरपि तु सर्प इति मिथ्यामतेः, **अहिर्भाति** सर्पोऽयमित्यवगम्यते । यदा तु साधकबाधकप्रमाणयोगाद्यथार्थाधिगमस्तदा **तज्ज्ञानात्** -

रज्जूत्वेनैव रज्जूज्ञानात्, अहिर्न **हि भासते**, ज्ञानमिथ्याभासयोः परस्परपरिहाराख्यविरोधात् । वस्तुतस्तु विश्वप्रतिभासोऽप्यात्मभास एवेति प्रमाणयति-

**प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः ।**
**यदा प्रकाशते विश्वं तदाहम्भास एव हि ॥८॥**

**प्रकाशः** - अन्तःस्फुरायमानं संवेदनम्, स **मे निजम्** - आत्मीयम्, **रूपम्** - लक्षणम्, मम स्वरूपमित्यर्थः । अतो**ऽहं ततः** - मदीयस्वरूपात्, **अतिरिक्तः**-पार्थक्यभाक्, **नास्मि**, तथात्वे शून्यताप्रसङ्गात् । न हि घटादिकं स्वस्वरूपादतिरिक्तं सम्भवति, स्वस्वरूपयोरभेदादिति । फलितमाह - अतः **यदा विश्वं प्रकाशते** - मया संविद्यते, **तदा हिः** - वस्तुतो**ऽहम्भास एव** भवति, उक्तनीत्या तत्संवेदनस्यापि मत्स्वरूपानतिरिक्तत्वात् । न चैवम्प्रतिभासमानस्याशेषस्य वस्तुनो ज्ञानस्वरूपान्तःप्रविष्टत्वसिद्धेः संवेदनमेव पारमार्थिकं तत्त्वम्, तथाहि - यदवभासते तज्ज्ञानमेव यथा सुखादि, अवभासन्ते च भावा इति । तथा - यद्वेद्यते तद्धि ज्ञानादभिन्नम्, यथा विज्ञानस्वरूपम्, वेद्यन्ते च नीलादयः - इति विज्ञानाद्वैतप्रतिपत्तिप्रसक्तिरिति चेत् ? एकान्तवादे तथैव, तत्र च कादाचित्कनियताकारप्रतिभासानुपपत्तिलोकशास्त्रप्रसिद्धप्रवृत्त्यपलापादयो बहवो दोषा इति त्याज्यः सः । किञ्च

लोकेऽपि किञ्चिदकर्मकं प्रकाशमात्रं नोपलभ्यते, तथाहि-दीपाद्यपि स्वव्यतिरिक्तान् घटकटादिपदार्थसार्थान् प्रकाशयदेव दृश्यत इति प्रकाशमात्रवादोऽन्याय्यः । इतश्च सोऽयुक्तः, चित्तमेव हि संसारो रागादिक्लेशवासितम् । तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते - इति (अध्यात्मसारे १८-८३), तद्वाद्युदितस्य वृथात्वापत्तेः, विज्ञानातिरिक्तरागादिक्लेशवर्गानभ्युपगमात्, एकान्तैकस्वभावत्वे वास्यवासकभावानुपपत्तेः । ननु च विज्ञानमेव क्लिष्टमिति चेत् ? सत्यम्, किन्तु यद्वशादस्य क्लिष्टता तस्यातिरिक्तभावत्वसिद्धिः, नील्यादिवत् । अत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थविस्तरभयात् । अतोऽत्रापि प्राग्वत्प्रधानगौणभावेन ज्ञानाद्वैतनयसमन्वयः कर्तव्यः, पुद्गलप्रवृत्तिप्रतिबन्धकत्वेनास्य नयस्य परमचारित्रसाधकत्वात्, उक्तं च-चारित्रं विरतिः पूर्णा, ज्ञानस्योत्कर्ष एव हि । ज्ञानाद्वैतनये दृष्टिर्देया तद्योगसिद्धयेइति (ज्ञानसारे प्रशस्तौ १२) । अतोऽयमपि तत्रैव दृष्टिं प्रसारयन्नाह-

**अहो विकल्पितं विश्वमज्ञानाम्मयि भासते ।**
**रूप्यं शुक्तौ फणी रज्जौ वारि सूर्यकरे यथा ॥९॥**

**अहोऽज्ञानान्मयि विकल्पितं विश्वं भासते**, एतदेव निदर्शनेन स्फुटयति-**यथा शुक्तौ रूप्यम्, रज्जौ फणी**-सर्पः, **सूर्यकरे** च मृगतृष्णास्पदस्थे **वारि**, अज्ञानाद् भासत इति सर्वत्र योगः । उक्तं चान्यत्र-यथा स्वप्नावबुद्धोऽर्थो

विबुद्धेन न दृश्यते । व्यवहारमतः सर्गो ज्ञानिना न तथेक्ष्यते ॥ मध्याह्ने मृगतृष्णायां पयःपूरो यथेक्ष्यते । तथा संयोगजः सर्गो विवेकाख्यातिविप्लवे ॥ गन्धर्वनगरादीनामम्बरे डम्बरो यथा । तथा संयोगजः सर्वो विलासो वितथाकृतिः-इति (अध्यात्मसारे १८/२८-३०) । किञ्च-

**मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति ।**
**मृदि कुम्भो जले वीचिः कनके कटकं यथा ॥१०॥**

**मत्तो विनिर्गतम्** - मत्संवेदनात्मकतया मत्प्रसूतम्, **विश्वं मय्येव लयमेष्यति**, स्वगोचरसंवेदनोद्भवे सति प्राक्तनस्य विश्वविषयसंवेदनस्य तस्मिन्नेव स्वोपादाने विलयस्य युक्त्युपपन्नत्वात् । एतदेव निदर्शयन्नाह-**यथा मृदि कुम्भः**- मृन्मयः कलशः, **जले वीचिः** - तरङ्गः, **कनके** च **कटकम्** - पाण्याभूषणम्, यथैतत्त्रितयं वर्तमानपर्याय-तिरोभावे स्वोपादाने लयमेति, तथा विश्वमप्युक्तलक्षण-मित्याशयः । विश्वपर्यायतिरोभावोऽप्यात्मरसाविर्भावं विना दुर्घट इति तमेव प्रकटयति -

**अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे ।**
**ब्रह्मादिस्तम्बपर्यन्त-जगन्नाशेऽपि तिष्ठतः ॥११॥**

**अहोऽहम्**, अनन्तरोक्तरीत्या विश्वविश्वविभूतिविभुता-विभूषितोऽहमिति भावः । **यस्य मे ब्रह्मादिस्तम्बपर्यन्त-**

**जगन्नाशेऽपि** - शब्दब्रह्माद्यनेकधा कल्पिताद् ब्रह्मण आरभ्यस्तृणावधि यज्जगत् तस्य विलये सञ्जातेऽपि **तिष्ठतो विनाशो नास्ति** तस्मै **मह्यं नमः** । ननु मानकषायोदयोऽयमिति चेत् ? न, किन्त्वात्मस्वरूपसञ्ज्ञानानुभावेनात्मीय-पर्यायविशेषं प्रत्यादरातिशयाभिव्यक्तिमात्रम्, यथोक्तम् - अनवरतमखण्डाद्वैतचिन्निर्विकारे निखिलनयविलासो न स्फुरत्येव किञ्चित् । अपगत इह यस्मिन् भेदवादः समस्त-स्तमहमभिनमामि स्तौमि सम्भावयामि - इति (नियमसारवृत्तौ १९२) । दृश्यते चेयमभिव्यक्तिरानन्दघनर्षिकृतश्रीशान्तिनाथ-स्तवादावपि - अहोऽहोऽहं मां नमामि नमो मह्यं नमो मह्यम्-इत्यर्थकोक्तिभिरित्यलं प्रसङ्गेन । पुनरपि तमेव भावम-भिव्यनक्ति -

**अहो अहं नमो मह्यमेकोऽहं देहवानपि ।**
**क्वचिन्न गन्ता नागन्ता व्याप्य विश्वमवस्थितः ॥१२॥**

**योऽहमेको देहवानपि क्वचिद् गन्ता न**, क्वचिदागन्ता-ऽपि **न**, यतः विश्वमपीदं **विश्वं व्याप्यावस्थितः**, विश्वेऽपि विश्वे मज्ज्ञानाविषयस्य विरहात्, तस्माद् गत्यर्था ज्ञानार्था इतिन्यायान् न तादृशं स्थानं यन्मम गन्तव्यतयाऽवशिष्टमिति मयि गन्तृत्वाद्यसम्भवि, व्याप्तं च मया लोकालोकलक्षणं विश्वम्, मज्ज्ञानादर्शप्रतिबिम्बितस्य तस्य मदन्तःप्रविष्टत्वादित्या-कूतम्। तदेवंविधो**ऽहमहो** ! - किमपि महाश्चर्यास्पदम्, तस्मै

**मह्यं नमः** । मा भूद्विश्वव्यापनश्रुतेस्तत्राधारताया मयि चाधेयतायाः प्रतीतिरित्याह-

**अहो अहं नमो मह्यं दक्षो नास्तीह मत्समः ।**
**असंस्पृश्य शरीरेण येन विश्वं चिरं धृतम् ॥१३॥**

स्पष्टः, विश्वधरणप्रकारस्तु प्रागुक्त एव । प्रकारान्तरं प्रतीत्य स्वं संस्तौति-

**अहो अहं नमो मह्यं यस्य मे नास्ति किञ्चन ।**
**अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरम् ॥१४॥**

**यस्य मे किञ्चनापि नास्ति**, परस्य स्वीकर्तुमशक्यत्वात्, तथा सति परत्वस्यैवानुपपत्तेः । ननु भवतु परः पर एव, तथापि तत्परिग्रहतोऽकिञ्चनताविरहस्स्यादिति चेत् ? न, परमार्थतः परिग्रहस्यैवासम्भवात्, जीवस्याजीवत्वप्रसङ्गात्, तद्भावपरिणतेरेव निश्चयतस्तत्परिग्रहरूपत्वात्, तथा चोक्तम्- मज्झ परिग्गहो जइ तदो अहमजीवदं तु गच्छेज्ज । णादेव अहं जम्हा तम्हा ण परिग्गहो मज्झ-इति (समयसारे २०८)। अतो परपरिग्रह एवाशक्यः, अग्राह्यत्वात्, न च तर्हि स्वपरिग्रहोऽस्त्विति वाच्यम्, गृहीतग्रहाभावात्, आरूढारोहणाभाववत्, तन्मोचनाभावाच्च, तदिदमाह-णियभावं णवि मुच्चइ परभावं णेव गेण्हए केइं । जाणदि पस्सदि सव्वं सोहं इदि चिंतए णाणी-इति (नियमसारे ९७) ।

अन्यत्रापि-यदग्राह्यं न गृह्णाति, गृहीतं नापि मुञ्चति । जानाति सर्वथा सर्वं, तत्स्वसंवेद्यमस्म्यहम् - इति (समाधितन्त्रे २०) इत्थं च सूपपन्नाऽकिञ्चनता । ननु च सर्वथाऽकिञ्चनत्वे ज्ञानादिमत्त्वमप्यात्मनोऽनुपपन्नं स्यादिति चेत्? को वा किमाह? अनुपपन्नमेव तत्, निश्चयतो ज्ञानादीनामात्मनोऽभिन्नत्वात्, प्रभारत्नवत्। नन्वेवं मम ज्ञानमित्यादिव्यवहारानुपपत्तिरिति चेत्? निश्चयतस्तथैव, स्वलक्षणस्य स्वतोऽभेदासम्भवात्, प्रतिभा-समानभेदस्य विकल्पजत्वात्, घटीयरूपवत्, तथा चोक्तम् - प्रभानैर्मल्यशक्तीनां यथा रत्नान्न भिन्नता । ज्ञानदर्शनचारित्र-लक्षणानां तथात्मनः ॥ आत्मनो लक्षणानां च व्यवहारो हि भिन्नताम् । षष्ठ्यादिव्यपदेशेन मन्यते न तु निश्चयः ॥ घटस्य रूपमित्यत्र, यथा भेदो विकल्पजः । आत्मनश्च गुणानां च, तथा भेदो न तात्त्विकः-इति (अध्यात्मसारे १८/७-९)। अलीकस्तर्हि व्यवहार इति चेत् ? न, शुद्धात्मरूपानुभावन-प्रयोजनेन प्रवृत्तत्वात्, भेदद्वारेण तत्सिद्धिसम्भवात् । निश्चय-स्तर्ह्यसनिति चेत् ? न, वस्तुतो भेदाभावात्, आत्मनोऽनात्मत्व-प्रसक्तेर्ज्ञानादेर्जडत्वापत्तेश्च । तदिदमुदितम् - शुद्धं यदात्मनो रूपं निश्चयेनानुभूयते । व्यवहारो भिदाद्वाराऽनुभावयति तत्परम् ॥ वस्तुतस्तु गुणानां तद्रूपं न स्वात्मनः पृथक् । आत्मा स्यादन्यथाऽनात्मा ज्ञानाद्यपि जडं भवेत् - इति (अध्यात्मसारे

१८/१०-११) अतो नात्मनो ज्ञानादि, अपि त्वात्मैव तदिति प्रत्येतव्यम्, एवञ्च सिद्धिसौधाध्यारूढाऽकिञ्चनता, अवोचाम च - ज्ञानदर्शनचारित्राण्यहं तानि पुनर्न मे । नानेकान्तोऽत्र तेन स्या-देकोऽहं नास्ति कोऽपि मे - इति (शमोपनिषदि ४-५) । तदुक्तमन्यैरपि-आदा खु मज्झ णाणे आदा मे दंसणे चरित्ते य । आदा पच्चक्खाणे आदा मे संवरे जोगे - इति (नियमसारे १००) । **अथवा** इदमपरं ममाश्चर्यावहं वैशिष्ट्यम्, **यस्य मे यद्वाङ्मनसगोचरं सर्वम**स्ति, अयमाशयः - विश्वे यत्किञ्चिदपि वाचो मनसश्च विषयभूतम्, तत् सर्वमपि मत्सत्कम्, मज्ज्ञानगोचरत्वात्तस्य, अस्तित्वनास्तित्वाभ्यां मत्पर्यायत्वाच्च, यथा चैतत्तत्त्वं तथा व्युत्पादितमन्यत्रेति नात्र प्रतन्यते । यदत्राभिहितं मज्ज्ञानगोचरत्वादिति, तदशुद्धनया-पेक्षयेति शुद्धनयाभिप्रायं प्रकटयन्नाह -

**ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवम् ।**
**अज्ञानाद्भाति यत्रेदं सोऽहमस्मि निरञ्जनः ॥१५॥**

**ज्ञानम्** - ज्ञप्तिः, **ज्ञेयम्** - घटादिपदार्थः, **तथा ज्ञाता** - अवगन्ता, तदेतत् **त्रितयं वास्तवम्** - पारमार्थिकम्, **नास्ति**, ज्ञानस्यात्मपरिणामरूपत्वात्, ज्ञेयाकारपरिणतात्मन एव संवेदनाज्ज्ञेयस्यापि तद्रूपत्वात्, ज्ञातुरप्यात्मत्वाच्च मिथोऽभेदभावे सिद्धे ज्ञानादिभेदत्रितयस्याविद्यमानत्वात्, अभिहितं चैतत्प्रकारा-

न्तरेण - इदं ध्यानमिदं ध्येयमयं ध्याता फलं च तत् । एभिर्विकल्पजालैर्यन्निर्मुक्तं तन्नमाम्यहम् - इति (नियमसारवृत्तौ १९३) । ननु कथं तर्हि तत्प्रतिभास इति चेत् ? अत्राह - **यत्रेदमज्ञानाद् भाति, सोऽहं निरञ्जनोऽस्मि** । अथ किम्प्रयोजनमिदमद्वैतभावनमित्यत्राह -

**द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजम् ।**
**दृश्यमेतन्मृषा सर्वमेकोऽहं चिद्रसोऽमलः ॥१६॥**

द्वितीयाभिज्ञानसञ्जातपरप्रवृत्तिपरिणतात्मभावो **द्वैतम्, तन्मूलं दुःखम्,** यत्किञ्चिदपि शारीरमानसभेदभिन्नं दुःखं जगति विद्यते, तत्सर्वं द्वैतहेतुकमिति भावः, परप्रवृत्तेरेव भवहेतुत्वात्, तस्य च दुःखमयत्वात् । तस्माद‌द्वैता**दन्यत्तस्य भेषजं नास्ति,** आत्मैकप्रवृत्तेरेव मुक्तिबीजत्वात्, उक्तं च - द्वैतं संसृतिरेव निश्चयवशादद्वैतमेवामृतं, सङ्क्षेपादुभयत्र जल्पि- तमिदं पर्यन्तकाष्ठागतम् । निर्गत्यादिपदाच्छनैः शबलितादन्य- त्समालम्बते, यः सोऽसञ्ज्ञ इति स्फुटं व्यवहृतेर्ब्रह्मादि नामेति च - इति (पद्मनन्दिपञ्चविंशतिकायाम् ९-२९) । अतो भावनीयमद्वैतम्, इतरस्याभक्ष्यसन्निभत्वात्, यथोदितम् - अद्वैतभावना भैक्षमभक्ष्यं द्वैतभावनम् - इति (मैत्रेय्युपनिषदि २-१०) । अत **सर्वमप्येतद्दृश्यम्** - पुरस्ताद्वीक्ष्यमाणं वस्तु- जातम्, **मृषा** - अलीकम्, अद्वैते तदसम्भवात् । तस्मा**च्चि-**

**द्रसः**-ज्ञानशक्तिसम्पन्नः, वीर्येऽपि रस इष्यते (अनेकार्थनाम-**मालायाम्**) - इत्युक्ते रसपदं शक्त्यर्थम्, तमेव विशेषयति - **अमलः** - विपक्षलेशेनाप्यकलङ्कितः, इत्थम्भूत **एकः** - अद्वितीयोऽहमस्मि । किञ्च-

**बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मया ।**
**एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम ॥१७॥**

तदेव**महं बोधमात्रः**-महामोहध्वान्तविध्वंसिविज्ञानैक-लक्षणः, **उपाधिः** - द्वैतप्रतिभासहेतुर्यः कश्चिद् भेदको धर्मः, स **मया अज्ञानात् कल्पित** एव, न तु तस्य पारमार्थिकमव-स्थानमस्तीत्याकूतम् । **एवम्** - अनन्तरोक्तम्, **विमृशतः** - सन्ततमपि सम्भावयतो **मम नित्यम्** - नक्तंदिनं **निर्विकल्पे** - शुद्धात्माभिमुखसुखसंवित्तिस्वरूपे रागादिविकल्पजालरहित आत्मपरिणामे, **स्थितिः** - प्रतिष्ठानं भवति । तदेतस्मिन्न-वस्थान्तरे -

**न मे बन्धोऽस्ति मोक्षो वा भ्रान्तिः शान्ता निराश्रया ।**
**अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितम् ॥१८॥**

**मे बन्धो नास्ति**, हेत्वभावात्, **मोक्षो वा** मुक्तिरपि न, बन्धपूर्वकत्वात्तस्याः, मुचि बन्धविश्लेषण इति वचनात् । नन्वेवं मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि - इति यत् प्रागुक्तं तत् प्लवत इति चेत् ? अत्रैवोत्तरयति - सा

मम **भ्रान्तिः शान्ता** - विलयमुपयाता, यतः **निराश्रया**-विध्वस्ताधारा, सविकल्पो ह्यात्मा भ्रान्त्याधारः, यदा विकल्पस्यैव विध्वंसस्तदा निराधारा भ्रान्तिः कुत्र तिष्ठत्वित्य-भिप्रायः । इत्थञ्चा**हो** ! किमप्यद्भुतमेतद्यन्**मयि** शुद्धस्फटिक-सङ्काशे **विश्वं स्थितम्** - प्रतिबिम्बितम् **वस्तुतस्तु तन्न मयि स्थितम्**, सर्वस्यापि वस्तुनः परमार्थतः स्वस्वरूपप्रतिष्ठितत्वात्। तस्मात् -

**सशरीरमिदं विश्वं न किञ्चिदिति निश्चितम् ।**
**शुद्धचिन्मात्र आत्मा च तत्कस्मिन्कल्पनाऽधुना ॥१९॥**

**सशरीर**मित्यादि । स्वस्मिन्नस्थितत्वेन स्वसम्बन्धिता-ऽभावात्परकीयतयाऽसत्प्रायमिदं सशरीरं विश्वमिति भावः । यथा च परकीयस्यासत्ता, तथा निभालनीया ऋजुसूत्रनय-निवेदननिपुणैः । समासतस्त्वभिधीयते-यथा परकीयं धनं स्वानुपयोगितया स्वं प्रतीत्यासत्प्रायम्, एवं सर्वमपि परकीयं वस्तु, तथा च सिद्धो विश्वस्यापि विश्वस्याभावः । पारिशेषन्यायेनावशिष्टमाह-**शुद्धचिन्मात्रः** - निर्मलबोधैकविग्रहः, **आत्मा च** - पुरुष एवेत्थं सिद्धसत्ताकः सञ्जातः । **तत्** - ततः, **अधुना कस्मिन्** शरीरादिसत्का **कल्पना** कर्तव्या ? वन्ध्यापुत्रे शशशृङ्गधनुर्धरत्वादिकल्पनावन्न कुत्रचिदपि शरीरादिकल्पना न्याय्येत्याशयः । एवञ्च -

**शरीरं स्वर्गनरकौ बन्धमोक्षौ भयं तथा ।**
**कल्पनामात्रमेवैतत् किं मे कार्यं चिदात्मनः ॥२०॥**

उक्तार्थम् । ततश्च -

**अहो जनसमूहेऽपि न द्वैतं पश्यतो मम ।**
**अरण्यमिव संवृत्तं क्व रतिं करवाण्यहम् ॥२१॥**

अद्वैतदर्शिनो मम जनसमूहोऽप्यरण्यायत इति मद्व्यतिरिक्तव्यक्तिविरहान्मदन्तरेण किं मद्रत्यास्पदं स्यादिति तात्पर्यम् । उक्तं च-ग्रामोऽरण्यमिति द्वेधा निवासोऽनात्मदर्शिनाम् । दृष्टात्मनां निवासस्तु विविक्तात्मैव निश्चलः - इति (समाधितन्त्रे ७३) ।

स्यादेतत्, भवतु परकीयतयाऽसत्प्राये जगति रतिविरतिः, स्वशरीरे रतिः, नित्यसम्बद्धत्वेन स्वकीयत्वात्, कथञ्चिदात्मभूतत्वात्, प्राणधारणाधारत्वाच्चेति चेत् ? अत्राह -

**नाहं देहो न मे देहो जीवो नाहमहं हि चित् ।**
**अयमेव हि मे बन्ध आसीद्या जीविते स्पृहा ॥२२॥**

**अहं देहो न**, पावकस्य शैत्यावगाहनवदमूर्त्तस्यांशिकस्यापि मूर्ततावगाहनस्यासम्भवात्, तदनुभवस्य भ्रान्तत्वात्, रूपादिशून्यस्येतीन्द्रियस्य मूर्त्तत्वायोगाच्च, तदाह-देहेन सममेकत्वं मन्यते व्यवहारवित् । कथञ्चिन्मूर्तताऽऽपत्तेर्वेदनादिसमुद्भवात् ॥ तन्निश्चयो न सहते, यदमूर्त्तो न मूर्त्तताम् । अंशेनाप्यवगाहेत,

पावकः शीततामिव ॥ उष्णस्याग्नेर्यथा योगाद् घृतमुष्णमिति भ्रमः । तथा मूर्त्ताङ्गसम्बन्धादात्मा मूर्त्त इति भ्रमः ॥ न रूपं न रसो गन्धो, न न स्पर्शो न चाकृतिः । चस्य धर्मो न शब्दो वा, तस्य का नाम मूर्त्तता ? ॥ दृशाऽदृश्यं हृदाऽग्राह्यं, वाचामपि न गोचरः । स्वप्रकाशं हि यद्रूपं तस्य का नाम मूर्त्तता ॥ आत्मा सत्यचिदानन्दः, सूक्ष्मात्सूक्ष्मः परात्परः । स्पृशत्यपि न मूर्त्तत्वं तथा चोक्तं परैरपि ॥ इन्द्रियाणि पराण्याहु-रिन्द्रियेभ्यः परं मनः । मनसोपि परा बुद्धिर्यो बुद्धेः परतस्तु सः-इत्यादि (अध्यात्मसारे १८/३४-४०) । **न मे देहः**, अकिञ्चनस्य देहस्वामित्वायोगात्, अनुभूयमानसम्बन्ध-स्यालीकत्वात्, उत्तरकालं विनाशशीलत्वात्, गन्धर्वनगरादिवत् । यदि च तत्त्वेऽप्यलीकत्वं नेष्यते, तदा गन्धर्वनगरादावपि तन्मा भूत्, तुल्यत्वान्न्यायस्य । स्यादेतत्, सशरीरात्मन एव जीवशब्दार्थत्वात्सिद्ध एव तव शरीरेणाभेद इति चेत् ? अत्राह- **जीवोऽपि नाहम्**, श्वासोच्छ्वासादिलक्षण-प्राणधारणक्रियात्मकजीवनस्य पुद्गलाश्रितत्वात्, तदुक्तम्-इन्द्रियाणि बलं श्वासोच्छ्वासो ह्यायुस्तथा परम् । द्रव्य-प्राणाश्चतुर्भेदाः, पर्यायाः पुद्गलाश्रिताः ॥ भिन्नास्ते ह्यात्मनो-ऽत्यन्तं तदेतैर्नास्ति जीवनम् । ज्ञानवीर्यसदाश्वासनित्यस्थिति-विकारिभिः - इति (अध्यात्मसारे १८/५५, ५६) । नन्वेव-मात्मनोऽजीवत्वापत्तिरिति चेत् ? सेयं कथञ्चिदिष्टापत्तिः,

तत्प्रकारस्तु प्रदर्शित एव । प्रकारान्तरेणाप्युच्यते-अजीवा जन्मिनः शुद्ध-भावप्राणव्यपेक्षया । सिद्धाश्च निर्मलज्ञाना, द्रव्यप्राणव्यपेक्षया-इति (अध्यात्मसारे १८-५४) । कस्तर्हि त्वमित्याह - **अहं हि चित्** - पुद्गलाश्रिताशेषपर्यायव्यतिरिक्तो ज्ञानमात्रोऽहम् । **अयमेव** वक्ष्यमाणलक्षणो **मे बन्धः** - अपवर्गप्रत्यूहः, **या** प्राग् मम **जीविते** - द्रव्यप्राणधारणे, **स्पृहाऽऽसीत्** । देहात्माभेदबुद्धेरेव तत्स्पृहाया बीजत्वात्, तादृशबुद्धेरेव भवचारकनिगडोपमत्वाच्च युक्तैव जीवितस्पृहाया बन्धत्वोक्तिरिति विभावनीयम् । तदेतत्स्पृहासमीरसंस्फुरणतो यद् भवति तदाह -

**अहो भुवनकल्लोलैर्विचित्रैर्द्राक्समुत्थितम् ।**
**मय्यनन्तमहाम्भोधौ चित्तवाते समुद्यते ॥२३॥**

**अनन्तभवाम्भोधौ** - अपर्यवसितमहासागरसन्निभे **मयि चित्तवाते समुद्यते** - देहात्माभेदबुद्धिरूपमनःपरिणामपवन-प्रादुर्भावे सति, **अहो** ! कृत्स्नकुतुकातिशाय्येतत्कुतुकं यद् **विचित्रैः** - चतुरशीतिलक्षयोनिभेदविभिन्नप्रकारैः, **भुवन-कल्लोलैः** - संसारतरङ्गैः, **द्राक्** - मङ्क्षु, **समुत्थितम्** - अभ्युत्थानमभिहितम् । ततः -

**मय्यनन्तमहाम्भोधौ चित्तवाते प्रशाम्यति ।**
**अभाग्याज्जीववणिजो जगत्पोतो विनश्वरः ॥२४॥**

**अनन्तमहाम्भोधौ** अपारावारपारोपमे **मयि चित्तवाते** - विकल्पवायौ, **प्रशाम्यति** - निर्विकल्पतानुभावेनोपशम-मुपयाति सति **जीववणिजः**-द्रव्यप्राणधारणप्रवृत्तपुद्गल-स्कन्धात्मकसमुद्रव्यवहारिणः, **अभाग्यात्** - दुर्भगतावशात् **जगत्पोतः** - चातुरन्तसंसारस्वरूपो बोहित्थः, **विनश्वरः** - विध्वंसाभिमुखो भवति, विकल्पोपरमे विकल्पितविनाशस्या-वश्यकत्वात् । अप्रशान्ते तु चित्तवाते यद् भवति तदाह -

**मय्यनन्तमहाम्भोधावाश्चर्यं जीववीचयः ।**
**उद्यन्ति घ्नन्ति खेलन्ति प्रविशन्ति स्वभावतः ॥२५॥**

**(इत्यष्टावक्रप्रकरणे शिष्योल्लासः ।)**

अहो **आश्चर्यमे**तद्यद् **अनन्तमहाम्भोधौ** - अनादि-निधनमहाम्बुनिधिनिभे **मयि जीववीचयः** - नृ - नारकादि-पर्यायात्मकाः सुखादिसंवित्तिस्वरूपाश्च तरङ्गाः, **स्वभावत उद्यन्ति** - उदयमुपयान्ति, **घ्नन्ति** - स्वेतरहननप्रवृत्ता भवन्ति, एकपर्यायाविर्भावे सतीतरहतेरावश्यकत्वात्, **खेलन्ति**-तत्तद्विचेष्टितं विदधन्ति, निर्विकल्पतया निस्तरङ्गदशायां स्तिमितोदधिसन्निभे मयि **प्रविशन्ति**-स्वोपादाने संलीयन्ते । इत्युक्त्वा विराममुपयाते जनक अष्टावक्र उवाच-

**[ शिष्यानुभवपीयूषे ज्ञातेऽपि करुणावशात् ।**
**तद्विज्ञानपरीक्षार्थं शिष्यमाह गुरुः पुनः ॥ ]**

## प्रकरण-३

**अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः ।**
**तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः ॥१॥**

**अविनाशिनम्** - स्वभावाव्ययैकशीलम्, **एकम्** - देहादिद्वन्द्वविनिर्मुक्तम्, **आत्मानम्** - निजस्वरूपम्, **तत्त्वतः** - अनुपचरितप्रकारतः, **विज्ञाय** - स्वसंवेदनगोचरीकृत्य, **आत्मज्ञस्य** - अर्थाद्यत्यन्तातिरिक्ततयाऽऽत्मानं जानानस्य, **धीरस्य** - विरागादिविसरविशिष्टधिया राजमानस्य, **तव अर्थार्जने रतिः कथम्** ? आत्मज्ञताया अर्थार्जनरत्याश्च प्रकाशतमसोरिव युगपदसम्भवादत्यसमञ्जसमिदमित्याशयः, उक्तं च - जगद्देहात्मदृष्टीनां विश्वास्यं रम्यमेव च । स्वात्मन्येवात्म-दृष्टीनां क्व विश्वासः क्व वा रतिः-इति (समाधितन्त्रे ४९) । एतदेव व्यतिरेकतो व्यनक्ति-

**आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे ।**
**शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे ॥२॥**

**आत्माज्ञानात्** - आनन्दाद्वैतात्मकात्मस्वरूपानवगमात्, **अहो**- खेदे, **विषयाः**-शब्दादय इन्द्रियगोचराः, त एव **भ्रमः** - अस्थानप्रीत्यात्मकभ्रान्तिनिबन्धनत्वात्, हेतौ फलोपचारात्, स एव **गोचरः**-विषयः, तस्मिन् **प्रीतिः** - अयं मत्सुखहेतु-रितिवितथविकल्पोपजनितमिथ्याऽऽनन्दः, भवति । एतदेव

दृष्टान्ततो दर्शयति - **यथा शुक्तेरज्ञानतः** - नैतद्रुप्यमपि तु दिनकरदीधितिदीप्यमाना शुक्तिरित्यनवगमात्, **रजतविभ्रमे** - रूप्यत्वेनावगते विभ्रमनिबन्धने, **लोभः** - जिघृक्षा भवति । अतोऽनुचित एवैष लोभः, विभ्रमव्यासक्तेर्विभ्रमैकफलत्वात् । किञ्च -

**विश्वं स्फुरति यत्रेदं तरङ्गा इव सागरे ।**
**सोऽहमस्मीति विज्ञाय किं दीन इव धावसि ॥३॥**

**सागरे तरङ्गा इव यत्रेदं विश्वं स्फुरति** - प्रत्यक्षं प्रतिभासते, **सः** - विमलकेवलज्ञानादर्शो**ऽहमस्मि**, अतो न किञ्चिन्मम प्राप्तव्यतयावशिष्यत **इति विज्ञाय** - मद्वचसा साक्षात्कृत्यापि, **किं दीन इव** - रङ्कवद् **धावसि** - मृगतृष्णा-नुधावनप्रवृत्तमृगवद्विचेष्टसे ? प्राप्तव्यस्य प्राप्तत्वादभिलषित-प्राप्तेश्चाप्राप्यत्वान्मौढ्यमेव तवानुधावनमिति हृदयम् ।

ननु शुद्धचैतन्यस्वरूपश्रवणसञ्जातशुद्धात्मपरिणतिप्रभावा-देवास्माकं कल्याणमिति किं सुखवञ्चनाहेतुना विषयहानेनेति जनकराज्ञा पर्यनुयुक्त इवाह -

**श्रुत्वाऽपि शुद्धचैतन्यमात्मानमतिसुन्दरम् ।**
**उपस्थेऽत्यन्तसंसक्तो मालिन्यमधिगच्छति ॥४॥**

**शुद्धचैतन्यम्** - अशेषद्रव्यान्तरभावभिन्नचेतनपरिणामम्, शुद्धं केवलभावम् - इत्युक्तेः (आलापपद्धतौ ६) । तदेव

विशेषयति - **अतिसुन्दरम्**, शेषाशेषसौन्दर्यातिशायितासम्पन्न-त्वात्, एवंविध**मात्मानं श्रुत्वापि**, तदधिगमेन स्वच्छपरिणति-मासाद्यापीति भावः । मुमुक्षूणां परिपन्थितयोपतिष्ठतीति **उपस्थः** -शब्दादिविषयविसरः, स्त्रीकट्यग्रभागो वा, तस्मि**नत्यन्त-संसक्तः** - तदेकाध्युपपन्नः, **मालिन्यम्** - रागादिविकल्पोप-नतचैतन्यकालुष्यम्, **अधिगच्छति** - प्राप्नोति । अतस्त्या-ज्यैवोपस्थाऽऽसक्तिः, तद्वतां वैराग्यस्य दुर्लभत्वात्, तथा चोक्तम् - सौम्यत्वमिव सिंहानां, पन्नगानामिव क्षमा । विषयेषु प्रवृत्तानां वैराग्यं खलु दुर्लभम् ॥ अकृत्वा विषयत्यागं यो वैराग्यं दिधीर्षति । अपथ्यमपरित्यज्य स रोगोच्छेदमिच्छति॥ न चित्ते विषयासक्ते वैराग्यं स्थातुमप्यलम् । अयोघन इवोत्तप्ते, निपतन्बिन्दुरम्भसः ॥ यदीन्दुः स्यात् कुहूरात्रौ, फलं यद्यवकेशिनि । तदा विषयसंसर्गिचित्ते वैराग्यसङ्क्रमः - इति (अध्यात्मसारे ५/५-८) । तदेवं मालिन्यमितस्य यद् भवति तदाह -

**सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।**
**मुनेर्जानत आश्चर्यं ममत्वमनुवर्त्तते ॥५॥**

**सर्वभूतेषु** - सकलसत्त्वेषु, **आत्मानं च** - स्वमेव, **जानतः** - पुरुषाद्वैतनयेनावगच्छतः, **सर्वभूतानि चात्मनि** - स्वस्वरूप एव जानत इति वर्तते, एतादृशस्यापि **मुनेर्मम-**

**त्वमनुवर्तते** - प्रव्रज्याप्राक्कालीनो देहादिममकारस्तदुत्तरकालेऽपि तन्मात्र एवास्ते, **इत्याश्चर्यम्** - अद्वैतावगमममकारयोर्मिथो विरुद्धयोरेकाधिकरणेऽसम्भवात्किमप्यद्भुतमेतत्, उक्तं च - अभिनवमिदमुच्चैर्मोहनीयं मुनीनां, त्रिभुवनभुवनान्तर्ध्वान्तपूञ्जा-यमानम् । तृणगृहमपि मुक्त्वा तीव्रवैराग्यभावाद्, वसतिमनुपमां तामस्मदीयां स्मरन्ति - इति (नियमसारवृत्तौ २४०) । इत्थञ्च-

**आस्थितः परमाद्वैतं मोक्षार्थेऽपि व्यवस्थितः ।**
**आश्चर्यं कामवशगो विकलः केलिशिक्षया ॥६॥**

**परमाद्वैतमास्थितः** - शुद्धसङ्ग्रहनयाभिप्रायेण सतो भेदकाभावात्सत्ताद्वैतं स्वीकुर्वाणः, यथोक्तम् - शुद्धद्रव्यमभिप्रैति सन्मात्रं सङ्ग्रहः परः । स चाशेषविशेषेषु सदौदासीन्य-भागिह - इति (श्लोकवार्त्तिके ४-१-३३-५१) तमेव विशेषयति - **मोक्षार्थेऽपि व्यवस्थितः** - मोक्षैकप्रयोजनत्वेन प्रवृत्तः, आस्तां भवाभिनन्दी, मुमुक्षोरपि वक्ष्यमाणविकारा-स्पदतेत्यपिशब्दार्थः । ईदृशोऽपि **कामवशगः** - इच्छा-मदन-कामाधीनः, **केलिशिक्षया विकलः** - अनाद्यभ्यस्तमोह-विलासविचेष्टितेन विवशो भवतीत्या**श्चर्यम्**, परिचितविषामृत-स्यापि विषात्यागवच्चित्रमिदमित्याशयः, यत उक्तम् - ब्रह्मानन्दे निमग्नस्य विषयाशा न तद् भवेत् । विषं दृष्ट्वामृतं दृष्ट्वा विषं त्यजति बुद्धिमान् - इति (आत्मबोधोपनिषदि) ।

अथासम्भवमेवेदं यत् परमाद्वैतपण्डितानामपि कामवशगत्वमिति चेत् ? न, सत्यामप्यधीत्यां बोधोदयविरहे तत्सम्भवात्, अन्वाह च - निर्दयः कामचण्डालः पण्डितानपि पीडयेत् । यदि नाध्यात्मशास्त्रार्थबोधयोधकृपा भवेत् - इति (अध्यात्मसारे १-१५) । अन्यत्रापि - मुनयोऽपि यतस्तेन विवशीकृतचेतसः। घोरे भवान्धकूपेऽस्मिन् पतित्वा यान्त्यधस्तलम् - इति (योगसारे १२५) ।

**उद्भूतं ज्ञानदुर्मित्रमवधार्यातिदुर्बलः ।**
**आश्चर्यं काममाकाङ्क्षेत्कालमन्तमनुश्रितः ॥७॥**

**अतिदुर्बलः** - वार्धक्यासाध्यरोगादिलूण्टाकनिर्लूण्टित-स्थामा, **अन्तं कालमनुश्रितः** - वर्तमानभवीयचरमाध्वानमुप-स्थितः, एवंविधोऽप्यात्मा **उद्भूतम्** - सनिमित्तमन्यथा वा प्रादुर्भूतम्, **ज्ञानदुर्मित्रम्** - बोधरिपुम्, **कामम्** - मन्मथम्, **अवधार्य** - शास्त्रोपदेशाद्विनिश्चित्यापि तमाऽऽ**काङ्क्षेत्** - साम्प्रतमपि यदि स्त्र्यादिभोगः सम्पद्यते, तदा तमुपभुञ्ज इत्याकारामभिलाषां कुर्यादित्य**ाश्चर्यम्**, वयसि गते कः काम-विकार इति प्रसिद्धवचोविपक्षं महदिदं चित्रमिति हृदयम्। आश्चर्यान्तरमाह -

**इहामुत्र विरक्तस्य नित्यानित्यविवेकिनः ।**
**आश्चर्यं मोक्षकामस्य मोक्षादेव बिभीषिका ॥८॥**

**इहामुत्र विरक्तस्य** - उभयलोकसुखस्पृहाऽस्पृष्टस्य, **नित्यानित्यविवेकिनः** - शुद्धात्मस्वरूपमेव नित्यमनित्यमेव देहादिकमितिविभागविदः, **मोक्षकामस्य** - मुक्त्यर्थमभ्युत्थितस्यात्मनोऽपि कदाचिन्मोहोदयेन **मोक्षादेव बिभीषिका** - मुक्तिसाधनानुष्ठानादेव साध्वसमि**त्याश्चर्यम्**, उक्तविशेषणविशिष्टस्यात्मनस्तदयोगादिदमप्यद्भुततरमित्याशयः । समाधानं त्वत्र मोहोदयेन विवेकविलये जाते सति सम्भवितमिदमपि, यथाभिहितम् - मूढात्मा यत्र विश्वस्तस्ततो नान्यद् भयास्पदम् । यतो भीतस्ततो नान्यदभयं स्थानमात्मनः - इति (समाधितन्त्रे २९) । तदेषा मूढवक्तव्यता, तदितरामाह -

**धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा ।**
**आत्मानं केवलं पश्यन् न तुष्यति न कुप्यति ॥९॥**

क्षीरनीरवत् संश्लिष्टयोर्जीवदेहयोर्विवेचने विज्ञया विवेकधिया राजत इति **धीरः**, **तुः**-प्रागुक्तमूढतो भिन्नपक्षद्योतकः । **भोज्यमानोऽपि** - खण्डशर्कराज्यशाकगोरसाद्युत्तम - द्रव्यैरभ्यवहरणं कार्यमाणोऽपि, तथा **पीड्यमानोऽपि** - आक्रोशताडनादिगोचरीक्रियमाणोऽपि, **सर्वदा** - निरवच्छिन्ने सुखादिसाधनोपनिपाताध्वनि, **आत्मानं केवलं पश्यन्** - केवलज्ञानादिस्वभावमात्मानं चिन्तनचक्षुषेक्षमाणः, यथोक्तम् - केवलणाणसहावो केवलदंसणसहाव सुहमइओ ।

केवलसत्तिसहावो सोऽहं इदि चिंतए णाणी - इति (नियमसारे ९६), तदेतद्दर्शनेन - यद्येतादृशानुपमसमृद्धिसम्पन्नोऽहं तदा किं ममैभिस्तुच्छैर्भोगैरूपकृतम् ? किं वा केवलतयाऽद्वितीयत्वेन देहेनात्यन्तभिन्नस्य ममात्मनो देहाश्रितपीडाभिश्छिन्नम् - इत्यवगमेन **न तुष्यति** भोगादौ, **नाऽपि कुप्यति** पीडोपस्थितौ । उपलक्षणत्वान्नापि शोकादिभाजनं भवति, केवलत्वावलोकने तदसम्भवात्, उक्तं च - को मोहः कः शोक एकत्वमनुपश्यतः - इति (नारदपरिव्राजकोपनिषदि ९-१८) । इतश्च सुखादिसाधने तोषाद्यभावः, दृश्यमानस्य जडत्वेन तोषादेर्विफलतया माध्यस्थ्यस्यैवोचितत्वात्, तदाह-अचेतनमिदं दृश्यमदृश्यं चेतनं ततः । क्व रुष्यामि ? क्व तुष्यामि ? मध्यस्थोऽहं भवाम्यतः - इति (समाधितन्त्रे ४६) । किञ्च -

**चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत् ।**
**संस्तवे चापि निन्दायां कथं क्षुभ्येन्महाशयः ॥१०॥**

**चेष्टमानम्** - भिक्षाचर्यादिप्रवृत्तम्, **स्वं शरीरम्** - व्यवहारनयाभिप्रायेणात्मीयमङ्गम्, **अन्यशरीरवत्** - परकीयकायमिव, **पश्यति** - विवेकपूतप्रेक्षाचक्षुषेक्षते । मिथ्यादर्शनमिदमिति चेत् ? न, स्वस्माद्भेदो हि परकीयत्वव्यपदेशालम्बनम्, स च यथान्यशरीरे विद्यते तथा व्यवहाराभिमत-

स्वशरीरेऽपीति युक्तमेव तत्राप्यन्यदेहवद्दर्शनम् । उक्तं च - ववहारणयो भासदि जीवो देहो य हवदि खलु इक्को । ण दु णिच्छयस्स जीवो देहो य कदावि एकट्ठो - इति (समयसारे २७) । ननु मा भूज्जीवशरीरयोस्तादात्म्यम्, अस्माभिरप्यनभ्युपगमात्, आधाराधेयभावलक्षणः सम्बन्धस्त्वतस्यैव, प्रत्यक्षमीक्ष्यमाणत्वात्, न चैष परकीयकायेऽस्तीति, परकीयस्य भिन्नत्वात्, स्वकीयस्य स्वसम्बन्धितयैकान्तभेदविरहान् न स्वकीये परकीयवद्दर्शनं न्याय्यमिति चेत् ? न, तादात्म्यवत्तत्सम्बन्धस्याप्यनुपपत्तेः, तथा चोक्तम् - न खल्वेकस्य द्वितीयमस्ति, द्वयोर्भिन्नप्रदेशत्वेनैकसत्तानुपपत्तेः, सदसत्त्वे च तेन सहाधाराधेयसम्बन्धोऽपि नास्त्येव, ततः स्वरूपप्रतिष्ठितत्वलक्षण एवाधाराधेयसम्बन्धोऽवतिष्ठते - इति (समयसारवृत्तौ १८१) । इत्थं चात्यन्तभिन्नस्य परत्वेन तत्र परत्वदर्शनं सम्यगेवेति स्थितम् । तदेतद्गभीराभिप्रायवत्त्वेन यो **महाशयः**, स **संस्तवे च निन्दायामपि** प्रशंसायां परिवादे च **कथं क्षुभ्येत्** - स्तिमितोदधिसन्निभे स्वाशये क्षोभमुपेयात्? यदि व्यवहाराभिप्रायेण तादात्म्यभाजः शरीरतोऽप्यहं पृथक्, तदा स्तुत्यादिशब्दानां तु मयि का गतिरिति सम्प्रधार्य न कथञ्चिदप्यसौ तोषाद्यात्मकक्षोभभाग् भवतीति हृदयम् । यथाभिहितम् - मह्यं न कुप्यते कोऽपि, कोप्यं तन्नास्मि

वस्तुतः । द्वेष्यं जगति नैवात्र वस्तुतोऽहं न शब्दभाक् ॥ भाषाविचित्रवाच्योऽहं कथञ्चित् सव्यपेक्षतः । अवक्तव्यं स्वरूपं मे, शब्दानां तत्र का गतिः ? ॥ निन्दन्तु के स्तुवन्तु के, गालिदानं ददन्तु के । साक्ष्यात्मा सर्ववस्तूनामात्मज्ञानेन सर्वदा - इति (आत्मदर्शनगीतायाम् १०३, १०६, ११३) । अत एव पारमर्षम् - वंदिज्जमाणा न समुक्कसंति, हीलिज्जमाणा न समुज्जलंति । दंतेण चित्तेण चरंति धीरा, मुणी समुग्घाइयरागदोसा - इति (आवश्यकनिर्युक्तौ ८६६)। किञ्च -

**मायामात्रमिदं विश्वं पश्यन्विगतकौतुकः ।**
**अपि सन्निहिते मृत्यौ कथं त्रस्यति धीरधीः ॥११॥**

**इदम्** - बाह्यान्तःचक्षुप्रत्यक्षम्, **विश्वम्** - सन्ततमपि संसरणस्वभावः संसारः, **मायामात्रम्** - वास्तवसत्ताशून्यम्, शुद्धात्मनस्तदभावात् । इतश्च विश्वं मायामात्रम्, उत्तरकाल-मनुपलम्भात्, इन्द्रजालादिवत्, तदुक्तम् - इन्द्रजालमिदं सर्वं यथा मरुमरीचिका । अखण्डितमनाकारो वर्तते केवलः शिवः - इति (अवधूतगीतायाम् ७-१३) । तत् **पश्यन्** - संतं असंतं सुविणुव्व सव्वमालमालु त्ति - इति प्रवचनवचसा (पञ्चसूत्रे ३) विदन्, तमेव विशेषयति - **विगतकौतुकः** - विदीर्णदिदृक्षः, न हि विदुषोऽसति कुतूहलमुपजायत इति,

तदाह-ये ये भावाः स्थिता लोके तानविद्यामयान् विदुः । त्यक्ताविद्यो महायोगी कथं तेषु निमज्जति ? - इति (अन्नपूर्णोपनिषदि ४-४) । तमेव विशेषयति-**धीरधीः** - जीवियास-मरणभयविप्पमुक्का - (व्याख्याप्रज्ञप्तौ ८-७) इत्यागमावगमाधिकगतधैर्यातिशयशालिमतिः । सः **सन्निहिते-ऽपि मृत्यौ** सति **कथं त्रस्यति ?** जननमरणादेरपि विश्वकुक्षि-प्रविष्टतया मायामात्रत्वान्नैव ततोऽस्य साध्वसः सञ्जायत इत्याशयः । स्यादेतत्, आत्मनस्तु वास्तवतयैवाभ्युपगमात्तन्मृति-भीतिर्दुर्निवारेति चेत् ? न, आत्मनश्शश्वत्तया तद्विरहात्, तथा चोक्तम् - न मे मृत्युः कुतो भीतिः ? - इति (इष्टोपदेशे २९) । ननु तथापि यस्य शरीर आत्मबुद्धिस्तस्य मृत्युसन्त्रासस्स्यादेवेति चेत् ? सत्यम्, किन्तु न स प्रकृते-ऽधिकृतः, उक्तविशेषणैस्तस्य व्यवच्छिन्नत्वात्, अधिकृतस्य तु देहत्यागस्य वस्त्रत्यागानतिशायितया न कोऽपि साध्वसाव-काशः, उक्तं च - दृढात्मबुद्धिर्देहादावुत्पश्यन्नाशमात्मनः । मित्रादिभिर्वियोगं च बिभेति मरणाद् भृशम् ॥ आत्मन्येवात्म-धीरन्यां शरीरगतिमात्मनः । मन्यते निर्भयं त्यक्त्वा वस्त्रं वस्त्रान्तरग्रहम् - इति (समाधितन्त्रे ७६, ७७) । किञ्च -

**निःस्पृहं मानसं यस्य नैराश्येऽपि महात्मनः ।**

**तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ? ॥१२॥**

**यस्य महात्मनः** - उक्तमहाशयरसैकरसीभूतात्मनः, **मानसम्** - एकाग्रनिरुद्धान्यतरान्तर्भूतमन्तःकरणम्, **नैराश्येऽपि** - आशाकालुष्यशून्यभावेऽपि, **निःस्पृहम्**-अनाऽऽकाङ्क्षम्, किलाहं निःस्पृहो भूयामित्येतल्लक्षणाऽपि स्पृहा यस्य न विद्यत इत्यर्थः, **तस्यात्मज्ञानतृप्तस्य** - आत्मज्ञानमात्रावाप्त्यवाप्ता-वाप्तव्यस्य, **केन** - नरेन्द्रेन्द्रोपेन्द्रेणाऽपि **तुलना जायते ?** अतृप्तस्य तृप्तसादृश्यासम्भवान्न केनापि जायत इति भावः, तथा चोक्तम्- सुखिनो विषयातृप्ता नेन्द्रोपेन्द्रादयोऽप्यहो ! । भिक्षुरेकः सुखी लोके ज्ञानतृप्तो निरञ्जनः - इति (ज्ञानसारे १-८) ।

अथ विषयादिनैराश्यमुचितम्, न तु नैराश्यनैराश्यम्, साशत्वापत्तेरिति चेत् ? सत्यम्, किन्तु दशाविशेषे तत्रापि नैराश्यमेव न्याय्यम्, तदाशाया अपि स्पृहाविशेषरूपत्वेन मोहात्मकत्वात्, उक्तं च - मोक्षे भवे च सर्वत्र निःस्पृहोऽयं सदाशयः । प्रकृत्यभ्यासयोगेन तथाशुद्धेर्नियोगतः ॥ मोहादिच्छा स्पृहा चेयममोहश्च मुनिर्यतः । तन्नास्येयं क्वचिन्न्याय्या तत्प्राप्तिस्तु क्रियाफलम् - इति (योगशतके २० वृत्तावुद्धृतम्)। नन्वेवं धर्मस्याप्यस्पृहणीयतापत्तिस्तत्त्वाभिनिवेशस्यापि त्याज्यत्वं स्यादिति चेत् ? को वा किमाह ? दशाविशेष इयमपीष्टापत्तिरेव, यथोक्तम् - एकान्तानभिष्वङ्गानुष्ठानं क्रियमाणं श्रेयः,

तत्त्वाभिष्वङ्गस्यापि तत्त्वतोऽतत्त्वत्वात्, वस्त्रादिशुद्धिविधावञ्जन-कल्पत्वात्, धर्मरागादपि मुनिरमुनिरित्यन्यैरप्यभिधानात् । अनेन रूपेण तत्कात्स्न्यानाराधनात् । भगवति गौतमप्रतिबन्धो ज्ञातमप्यत्र - इति (योगशतके १८ वृत्तौ) । किञ्च स्वभावलाभमन्तरेण कस्यापि स्पृहणीयत्वाभावात् स्वभावस्य च प्राप्तव्यताविरहान्न किञ्चिदपि स्पृहागोचरीकर्तुमर्हम्, तदिदमुदितम् - स्वभावलाभात् किमपि प्राप्तव्यं नावशिष्यते। इत्यात्मैश्वर्यसम्पन्नो निःस्पृहो जायते मुनिः - इति (ज्ञानसारे १२-१) । यदि च नैराश्येऽप्यस्य निःस्पृहता, तदेतरे तु किं वाच्यमित्याह-

**स्वभावादेव जानाति दृश्यमेतन्न किञ्चन ।**
**इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः ॥१३॥**

सोऽयं महात्मा **स्वभावादेव** - ज्ञानानन्दाद्वैतसमृद्ध्य-नुभूतिपरिणतप्रकृतेरेव **जानाति** यदेतद् **दृश्यम्** - पुरतोऽव-स्थितं मणितृणादि वस्तुजातम्, **न किञ्चन** - अद्भुतात्मसमृद्धेः पुरस्तादसत्प्रायम्, नास्य विद्यमानतया गणनाप्युचितेत्यभिप्रायः। **स धीरधीः** - दृगेव सर्वस्वं, शेषमशेषमपि फल्गु-इत्याकारकधृतिविभूषितमतिः, **किं 'इदं ग्राह्यमिदं त्याज्यम्'** इति **पश्यति** ? लब्धनिधेस्तत्फलभोगभिन्ने यथा रतिर्न भवति, तथासावपि न ग्रहणादिविकल्पैः परतप्तिप्रवृत्तो भवतीति भावः,

तदुक्तम्-लद्धूण णिहि एक्को तस्स फलं अणुहवेइ सुजणत्ते। तह णाणी णाणणिहिं भुंजेइ चइत्तु परतत्तिं । - इति (नियमसारे १५७) । न ह्याकण्ठाभ्यवहृताम्ररसस्य कदन्नादनाकाङ्क्षोदयो भवतीति दिव्यसमृद्धिसमृद्धचिच्चिन्तामणिमधिगम्य कुशकाशकल्पबाह्यभावविकल्पास्पर्श उपपन्न एव, अन्वाह च - अथ मम परमात्मा शाश्वतः कश्चिदेकः, सहजपरमचिच्चिन्तामणिर्नित्यशुद्धः । निरवधिनिजदिव्यज्ञानदृग्भ्यां समृद्धः, किमिह बहुविकल्पैर्मे फलं बाह्यभावैः - इति (नियमसारवृत्तौ १३८) । अतः कृतकृत्यस्यात्मनस्सर्वथापि त्यागादिविरहः प्रत्येतव्यः, न चैवं गुणग्रहणस्याप्यभाव आपन्न इति वाच्यम्, इष्टत्वात्, इतरथा कृतकृत्यत्वक्षतेः, परमार्थतोऽन्तरेव गुणानां सत्त्वात्तद्ग्रहणस्यानुपपत्तेश्च, अत एवोक्तम्-त्यागादाने बहिर्मूढः करोत्यध्यात्ममात्मवित् । नान्तर्बहिरुपादानं न त्यागो निष्ठितात्मनः - इति (समाधितन्त्रे ४७) । अत्र करोतीत्याविर्भावयतीत्यर्थः, अतो नोक्तानुपपत्त्यवकाशः । उपसंहरन्नाह-

**अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्य निराशिषः ।**
**यदृच्छयाऽऽगतो भोगो न दुःखाय न तुष्टये ॥१४॥**

**(इत्यष्टावक्र आक्षेपद्वारोपदेशचतुर्दशकं तृतीयप्रकरण्)**

**अन्तः** - मनसि **त्यक्तकषायस्य** - विसृष्टक्रोधादेः, विशेषत्यागस्याभिहितत्वेन बहिरत्यागप्रतीतिप्रसङ्ग इति चेत् ?

तदेतन्न दूषणमपि तु भूषणम्, तथाविधद्रव्याद्युपस्थितौ बहिः कषायसत्त्वस्यावश्यकत्वात्, अत एवाप्रमत्तयतेरपि मायाप्रत्ययिकी क्रिया प्रवचनमालिन्यरक्षणार्थमागमेऽभिहितेत्यलं प्रसङ्गेन। तथा **निर्द्वन्द्वस्य** - विग्रहादिविकल्पपर्यन्तद्वन्द्वातिक्रान्ततया सर्वथा समरसैकरसीभूतस्वभावस्य यथोक्तम् - स्वेच्छासमुच्छलदनल्पविकल्पजाला-मेवं व्यतीत्य महतीं नयपक्षकक्षाम् । अन्तर्बहिः समरसैकरसस्वभावं, स्वं भावमेकमुपयात्यनुभूतिमात्रम्-इति (समयसारवृत्तौ ९०) । तथा **निराशिषः** - प्रागुक्तयुक्त्यैकान्तनिःस्पृहस्य, तदेवंविधस्य महात्मनो **यदृच्छया** - प्रयत्नमन्तरेणैव, **आगतः** - भवितव्यतादियोगादुपनतः, **भोगः** - मनोज्ञेतराहारादिः, **न दुःखाय** भवति, अमनोज्ञस्यापि तत्त्वेनाप्रतिभासनात्, **नापि तुष्टये** भवति, मनोज्ञस्यापि तथातयानवगमात् । कथमेतत्सम्भवतीति चेत् ? तत्र मायातोयाभतादर्शनेन तत्संसर्गेऽपि निःसङ्गत्वादिति गृहाण। तदाहुराचार्याः-भोगान् स्वरूपतः पश्यंस्तथा मायोदकोपमान् । भुञ्जानोऽपि ह्यसङ्गः सन् प्रयात्येव परं पदम्-इति (योगदृष्टिसमुच्चये १६६) ।

एवं गुरुवचनसुधाभिषिक्त उवाच जनकः -

**[ गुरुणैवमुपाक्षिप्तः शिष्यो ज्ञानदशोल्लसन् ।**
**ज्ञानिन्यशेषचेष्टानां स्पष्टमाचष्ट सम्भवम् ॥ ]**

# प्रकरण-४

**हन्तात्मज्ञस्य धीरस्य खेलतो भोगलीलया ।**
**न हि संसारवाहीकैर्मूढैः सह समानता ॥१॥**

**हन्तेति** भोगियोगिमध्यान्तरदर्शनोद्भूताद्भुतार्थव्यञ्जक उद्गारः, **आत्मज्ञस्य**-पारमार्थिकत्वेन स्वस्वरूपमपारमार्थिकत्वेन च भोगस्वरूपं जानानस्य, आत्मपदस्यात्र स्वरूपार्थो दृष्टव्यः । तथा **धीरस्य**-स्वस्वरूपस्थिरताविधौ सुरगिरिसङ्काशधैर्यसम्पन्नस्य, **भोगलीलया खेलतः** - अनन्तरोक्तरीत्या यदृच्छाऽऽगतभोगं भुञ्जानस्य, न चोक्तविशेषणविशिष्टस्य भोग एवासम्भवी, अथ च भोगान् भुञ्जते तदोक्तविशेषणानुपपत्तिरिति पूर्वापरविरोधदोषग्रस्तमिदमभिधानमिति चेत् ? न, दशाविशेषावस्थितेषु शुभात्मसु उक्तविशेषणत्रितयस्यापि समन्वयदर्शनात्, तथा चोक्तम्-यदा मरून्नरेन्द्रश्रीस्त्वया नाथोपभुज्यते । यत्र तत्र रतिर्नाम विरक्तत्वं तदापि ते - इति (वीतरागस्तोत्रे १२-४) । नन्वत्राप्यस्माकं तु स एव पूर्वापरविरोधो दृग्गोचरीभवति, क्व सुरादिसुखोपभोगः, क्व च वैराग्यमिति चेत् ? न, मायामात्रत्वेनाकलितभोगस्य तत्सक्तिविरहात्, एतदेव भवविरक्तस्य भवाभिनन्दिनश्चान्तरं यत् समानेऽपि भोगपङ्कसंसर्ग एकस्य तदलिप्ततापरस्य तन्निमज्जनम्, तदाहुः-मायाम्भस्तत्त्वतः पश्यन्ननुद्विग्नस्ततो भृशम् । तन्मध्येन प्रयात्येव यथा

व्याघातवर्जितः ॥ भोगान् स्वरूपतः पश्यन् तथा मायोदकोपमान् । भुञ्जानोऽपि ह्यसङ्गः सन् प्रयात्येव परं पदम् । भोगतत्त्वस्य तु पुनर्न भवोदधिलङ्घनम् । मायोदकदृढावेशस्तेन यातीह कः पथा ? ॥ स तत्रैव भयोद्विग्नो यथा तिष्ठत्यसंशयम् । मोक्षमार्गेऽपि हि तथा भोगजम्बालमोहितः - इति (योगदृष्टिसमुच्चये ) । ननु किमप्यद्भुतमेतद्यत्तत्संसर्गेऽपि तदलिप्ततेति चेत् ? सत्यम्, किन्तु पुष्करपत्रन्यायेनेदमपि सिद्धमेव, यथोक्तम् - जह सलिलेण ण लिप्पइ कमलिणीपत्तं सहावपयडीए । तह भावेण ण लिप्पइ कसायविसएहिं सप्पुरिसो - इति (भावप्राभृते १५४) । अथालिप्तभावे सति भोगप्रवृत्तिरेवानुपपन्ना, तथापि यद्यलेपोऽस्येष्यते, तदाशेषभोगिनामपि सोऽस्तु, नियामकविरहादिति चेत्? न, विरक्तस्य तत्प्रवृत्तौ स्वरसविरहात्, कर्मपारतन्त्र्येण प्रवृत्तत्वात्, रक्तस्य तु स्वरसत एव भोगप्रवृत्तिरित्यस्यैव भेदस्य नियामकत्वेन सद्भावान्न भवाभिनन्दिप्रमुखाणामप्यलिप्तत्वप्रसङ्गावकाशः, अतस्तादृशः शुभात्मा पूर्वकृतनिकाचितकर्मणोऽवश्यंभोग्यत्वेन तत्फलमनुभवन्नप्यनासक्तः सन् कर्मनिर्लेपनप्रतीक्षां कुरुते, अत एव तमधिकृत्याभिहितम् - आत्मानं सततं ज्ञात्वा कालं नय महामते ! । प्रारब्धमखिलं भुञ्जन् नोद्वेगं कर्तुमर्हसि - इति (नादबिन्दूपनिषदि २१) ।

ननु योऽवश्यंभोग्यकर्माभावेऽपि भोगासक्ततया तेषु प्रवर्तते तस्य का वार्त्तेति चेत् ? तस्य तु क्लिष्टकर्मबन्ध एवेति गृहाण, यदाह-जानन्नपि च यः पापं शक्तिमान् न नियच्छति। ईशः सन् सोऽपि तेनैव लिप्यते पापकर्मणा - इति (महाभारत आदिपर्वणि १७९-११) । तत्रापि यद्यसौ गृहस्थतीर्थ-कराद्यालम्बनं गृह्णाति, तदा तत्पापकर्मणो गुणकारः सञ्जायत इति दिक् ।

तदेवमात्मज्ञत्वादिविशिष्टस्य **संसारवाहीकैः** - भवाभि-नन्दिभिः, **मूढैः** - मोहानुभावेन भोगं परमार्थतया पश्यद्भिः **सह न हि** - नैव **समानता,** एकस्य सत्यपि भोगेऽभोगित्वात्, अपरस्य भोगाभावेऽपि भोगित्वात्, उक्तं च-यो भुञ्जानोऽपि नो भुङ्क्ते विषयांस्तत्फलाऽत्ययात् । यथा परप्रकरणे नृत्यन्नपि न नृत्यति-इति (धर्मामृते ८-३) । अन्यत्रापि - ज्ञानवैभवविरागताबलात् सेवकोऽपि तदसावसेवकः - इति (समयसारनाटके ३) । मूढस्य तु भोगान्तरायोदयतो भोगाभावेऽपि दुर्विपाकानपाय एव, स्पृहाया एव तद्योनितया भोगस्यान्यथासिद्धत्वात्, तथा च पारमर्षम् - कामे य पत्थेमाणा, अकामा जंति दोग्गइं - इति (उत्तराध्ययने ९-५३) ।

इत्थम्भूतस्याभोगिनो योगविभूतिं वर्णयति -

**यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः ।**
**अहो तत्र स्थितो योगी न हर्षमुपगच्छति ॥२॥**

**शक्राद्याः** - सौधर्मेन्द्रप्रमुखाः, **सर्वदेवताः** - निखिल-निर्जराः, **यत्पदम्** - सव्वेसु कामजाएसु पासमाणो न लिप्पई ताइ - (उत्तराध्ययने ८-४) इत्यागमोदितसाक्षितामात्रास्पदम्, **प्रेप्सवः** - प्रकर्षेणाभिलाषुकाः, **दीनाश्च** - तदवाप्तावशक्ततया विवशाः **अहो** - अत्यन्ताश्चर्ये, **तत्र** - उक्तपदे, **स्थितः** - अन्ने खलु कामभोगा, अन्नो अहमंसि (सूत्रकृताङ्गे २-१-१३)-इति पारमर्षपरिणत्या प्राप्तप्रतिष्ठः, **योगी**-घनरागादि-ग्रन्थिभेदानुभावानुभावितमोक्षाऽऽकाङ्क्षाऽक्षणिकचित्तसमानाधि-करणस्वयत्किञ्चिद्व्यापाराश्रयकयोगव्यपदेशसंयोगी, यदुक्तम्-भिन्नग्रन्थेस्तु यत्प्रायो मोक्षे चित्तं भवे तनुः । तस्य तत्सर्व एवेह योगो योगो हि भावतः - इति (योगबिन्दौ २०३) । चित्तानुरूपफलत्वात्सर्वव्यापाराणामिति भावः, अन्यसक्त-नारीयत्किञ्चित्प्रवृत्तेः पापबन्धफलत्ववत्, तदाहुः - नार्या यथान्यसक्तायास्तत्र भावे सदा स्थिते। तद्योगः पापबन्धश्च तथा मोक्षेऽस्य दृश्यताम् - इति (योगबिन्दौ २०४) । प्रमाणं चात्र पारमर्षम् - परिणामियं पमाणं - इति (ओघनिर्युक्तौ १०९८) । तदयं योगी **हर्षं नोपगच्छति**-अहो शक्रादिका-नामप्यभीप्सितं पदं मयावाप्तमिति गर्वविकारगर्भितां प्रीतिं नोद्वहति, तादृशप्रीत्यवाप्तेरेव तत्पदापसाररूपत्वात्। किञ्च -

**तज्ज्ञस्य पुण्यपापाभ्यां स्पर्शो ह्यन्तर्न जायते ।**
**न ह्याकाशस्य धूमेन दृश्यमानाऽपि सङ्गतिः ॥३॥**

**तज्ज्ञस्य** - विरागरसैकरसीभूतात्मस्वरूपविदः, **अन्तः** - स्वात्मप्रदेशेषु, **पुण्यपापाभ्याम्** - शुभाशुभकर्मभ्याम्, **स्पर्शः**-उपलेपः, **न हि जायते**-नैव सम्भवति, कर्दमकनक-न्यायेन विरागिणस्तद्विमुक्तत्वात्, तदाह - णाणी रागप्पजहो सव्वदव्वेसु कम्ममज्झगदो । णो लिप्पइ रजएण दु कद्दममज्झे जहा कणयं - इति (समयसारे २१८) । प्रत्युत विरागिणस्तु यत्किञ्चिदपि कुर्वतः कर्मनिर्जरैवेति तद्बन्धवार्ता तु दूरापास्ता। तदाह-रत्तो बंधदि कम्मं मुंचदि जीवो विरागसंपत्तो - इति (समयसारे १५०) । एतदेव दृष्टान्तेन स्फुटयति - **आकाश-स्येत्यादि**, धूमव्याप्तस्यापि गगनस्य परमार्थतोऽविचलित-स्वरूपावस्थितत्वेन साङ्गत्यविरहात्, **सम्** - तद्भावपरिणत्या **गतिः** - भावान्तरगमनम् - **सङ्गतिः** - इति तल्लक्षणसमन्वया-सम्भवाच्च ।

ननु च भवान् दृष्टान्तशतमपि ददातु, विरागविघ्नभाव-लक्षणो विषयस्वभावोऽशक्यनिवारण इति चेत् ? अत्राह -

**आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना ।**
**यदृच्छया वर्तमानं तं निषेद्धुं क्षमेत कः ? ॥४॥**

**इदं सर्वं जगद् आत्मैव**, प्रागुक्तयुक्तया संविद्यमानस्य स्वव्यतिरिक्तत्वासम्भवात्, इति **येन महात्मना ज्ञातम्** -

सर्वं चिन्मात्रमेव (तेजोबिन्दूपनिषदि २-३९)-आत्मैवेदं सर्वम् (छान्दोग्योपनिषदि ७-१५-११) ब्रह्मैवेदं सर्वम् (मुण्डकोपनिषदि २-२-११) - इत्यादिना ज्ञानाद्वैतनयाभि-प्रायेणाधिगतम्, **तम्** महात्मानम्, **यदृच्छया वर्तमानम्**-रागादिनिमित्तेष्वपि विरागादिगुणगणे प्रकृत्या परिणतम्, **को निषेद्धुं क्षमेत ?** दवानले पवनस्येव तस्मिन् विषयात्मकविघ्नानामकिञ्चित्करत्वेन न कोऽपि क्षमेतेति भावः, तदुक्तम् - धर्मशक्तिं न हन्त्यत्र भोगयोगो बलीयसीम् । हन्ति दीपापहो वायुर्ज्वलन्तं न दवानलम् - इति (अध्यात्मसारे ५-२०) । इतश्चायं महात्माऽशक्यनिषेधः, समर्थतमत्वात्, एतदेव दर्शयति-

**आब्रह्मस्तम्बपर्यन्ते भूतग्रामे चतुर्विधे ।**
**विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविसर्जने ॥५॥**

**हिः** - यतः, **आब्रह्मस्तम्बपर्यन्ते** - लोके ब्रह्मत्वेन विज्ञाताद्देवताविशेषादारभ्य तृणाख्यवनस्पतिविशेषचरमे, **चतुर्विधे** - मरुन्मनुष्यतिर्यग्नारकाभिधचतुःप्रकारे, **भूतग्रामे** - सत्त्वसन्दोहे, **इच्छानिच्छाविसर्जने** - इष्टेप्सायाअनिष्टजिहीर्षायाश्चात्मनः पृथक्करणे **विज्ञस्यैव** - अविक्खा अणाणंदे (पञ्चसूत्रे ५) - इच्छा हु आगाससमा अणंतया - (उत्तराध्ययने ९-४८) इत्यादिपारमर्षपरिकर्मितपरिज्ञानपूतस्यैव **सामर्थ्यम्** - अतिशयितामोघशक्तिरस्ति । इच्छानिच्छयो रागद्वेषरूपयोर्विसृष्टयोः सत्योः परमात्मैवावशिष्यत इत्येतस्मिन्नवस्थान्तरे तत्साक्षात्कारः सञ्जायते, एतदेवाख्याति-

**आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरम् ।**
**यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित् ॥६॥**

**( इत्यष्टवक्रानुभवोल्लोसषट्कम् )**

**कश्चित्** - विसृष्टेच्छादिः, **आत्मानमद्वयम्** - युगलत्व-व्यपदेशालम्बनयावदुपाधिपरिवर्जितम्, **जगदीश्वरम्** - विश्वेऽपि विश्वे परमस्वातन्त्र्यसमृद्धम्, **जानाति** एतच्चानन्तरोदितसामर्थ्य-शंसनेन प्रमाणितमेव । **सः** - अहं ब्रह्मास्मि (शम्भुगीतायाम् ६-४१) - इति महावाक्यविज्ञानविभूषितः, **यत्** कर्तव्यतया **वेत्ति तत् कुरुते**, वशित्ववशेन सर्वत्र प्रभविष्णुतया तत्प्रत्यूहासम्भवात्, तदुक्तम् - वशित्वं भूतभौतिकेषु वशी भवति, अवश्यश्चान्येषाम् - इति (योगसूत्रभाष्ये ३-४५) । यद्वा **सः** - विसृष्टरागादिः, **यन्** माध्यस्थ्यानुगुणं **वेत्ति तत् कुरुते**, इत्थमेव तस्य रागादिविसर्जने सानुबन्धभावसम्भवात्। अतस्तस्य **कुत्रचिद्** - ग्रामारण्यादौ, **भयम्** - स्तेनरोगादि-निबन्धनं साध्वसम्, **न** भवति, वशित्वाविस्मृतेः, इष्टानिष्ट-योरेवाभावेन तद्वियोगसंयोगनिमित्तकभयविरहात्, गोप्याद्यभावाच्च, तदुक्तम् - न गोप्यं क्वापि नारोप्यं हेयं देयं च न क्वचित्। क्व भयेन मुनेः स्थेयं ज्ञेयं ज्ञानेन पश्यतः - इति (ज्ञानसारे १७-३) । तदेषोऽहमपि भयादि त्यजेयमित्याकूतेनोपरते वचनव्यापाराज्जनक आहाष्टावक्रः -

**[ एवमुल्लासषट्केन स्वशिष्येऽपि परीक्षिते ।**
**गुरुर्दृढोपदेशार्थं लयलोगमथाब्रवीत् ॥ ]**

## प्रकरण-५

**न ते सङ्गोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि ।**
**सङ्घातविलयं कुर्वन्नेवमेव लयं व्रज ॥१॥**

**ते** - एक एव भगवानयमात्मा (शान्तसुधारसे ४-१) इतिसंवेदनसम्पन्नस्य तव, **केनापि सङ्गो नास्ति,** तद्भाव एकत्वानुपपत्तेः, इत्थञ्च त्वं **शुद्धः** - विजातीयविनिर्मुक्तः सन् **किं त्यक्तुमिच्छसि ?** यत्किञ्चिद्वस्तुनिष्ठस्वत्वसमापनस्यैव त्यागपदार्थत्वेन स्वकीयस्यैव विरहेण त्यागविषयस्याभावान्मोह एव तव त्यागेच्छेति हृदयम् । अत एवोक्तम् - येन त्यजसि (त्यक्तुमिच्छसि) तत् (मौढ्यम्) त्यज - इति (महोपनिषदि ६-६) । एतदेवाचष्टे - संहन्यते कलुषीकरणेन शुद्धात्म-परिणामोऽनेनेति **सङ्घातः** - मोहः, तस्य **विलयं कुर्वन्** - नास्ति मोहसमं भयम् (बृहन्नारदीयपुराणे ७-५४) - इत्यवगमेनोन्मूलनं विदधन्, **एवमेव** - हाठिकत्वापहतेः सहजस्फूर्त्याऽऽत्मस्वभावे **लयम्** - पूर्णतया परिणतिम्, **व्रज** - प्राप्नुहि, मोहविलयमन्तरेणात्मलयस्यासम्भवात्तदादृतिना परब्रह्मलीनः स्या इत्याशयः, यथोक्तम् - ज्ञानापास्तसमस्त-मोहमहिमा लीये परब्रह्मणि-इति (नियमसारवृत्तौ २३४) ।

अथ नैषोऽर्थः समीचीनः लयपदस्य नाशपरत्वात्, यथोक्तम्- यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत् ।

तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत् - इति (क्षुरिकोपनिषदि-२१) । न चैवम् - पाशं छित्त्वा यथा हंसो निर्विशङ्कः खमुत्क्रमेत् । छिन्नपाशस्तथा जीवः संसारं तरते तदा-(क्षुरिकोपनिषदि २०) इति पूर्वग्रन्थविरोध इति वाच्यम्, अभिप्रायापरिज्ञानात्, न हि संसारतरणं पाश्चात्यसत्तां साधयति, संसारतरणत्वेन सत्तोच्छेदस्यैवाभिप्रेतत्वात् । अतोऽस्मद-भ्युपगतोऽर्थ एवोचित इति चेत् ? न, स्वनाशस्याकाम्यत्वेन मुक्तेरपुरुषार्थत्वापत्तेः, नित्यं विज्ञानमानन्दं ब्रह्म (बृहदारण्य-कोपनिषदि ३-९-२८) नित्यानन्दमयं ब्रह्म (शुकरहस्यो-पनिषदि १) सत्यं ज्ञानमनन्तं च परानन्दं परं ध्रुवम् (जाबाल-दर्शनोपनिषदि २-९) कैवल्यानन्दरूपं परमानन्दलक्षणा-ऽपरिच्छिन्नानन्तज्योतिः शाश्वतं शश्वद् विभाति (सिद्धान्त-सारोपनिषदि ६-१) इत्यादिवचसां जीवनाशबाधकत्वेनोप-लब्धेः, अजीवज्जीवति जीविष्यतीति जीवेति कालत्रयाश्रय-जीवपदव्युत्पत्त्यनुपपत्तेश्च स्वभावलीनत्वस्यैव लयपदार्थत्वे-नाभ्युपगन्तुमुचितत्वात् । ननूभयपक्षसाधकशास्त्रवचनोपलब्धेः कथमेतद्वक्तुं शक्यं यद् गीताकृतोऽप्येतदेवार्थघटनमभिमतमिति चेत् ? अविनाशिनमात्मानमित्यादितद्वचः श्रवणादिति गृहाण (अष्टावक्रगीतायाम् ३-१) । अत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थविस्तरभयात् । किं सम्प्रधार्यात्मलयः कर्तव्य इत्याह -

**उदेति भवतो विश्वं वारिधेरिव बुद्बुदः ।**
**इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज ॥२॥**

**वारिधेर्बुद्बुद इव भवतो विश्वमुदेति**, भवत्कल्पितस्य विश्वस्य कल्पनापरिणताद् भवत एवोद्भूतत्वात्, यदपेक्षयै-तदुच्यते, सा प्रागेव प्रपञ्चितेति न पुनः प्रतन्यते । **इति ज्ञात्वे**त्यादि स्पष्टम् । किञ्च -

**प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि ।**
**रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज ॥३॥**

उक्तार्थम् । अतः -

**समदुःखसुखः पूर्ण आशानैराश्ययोः समः ।**
**समजीवितमृत्युः सन्नेवमेव लयं व्रज ॥४॥**

**(इति लयचतुष्टयम्)**

**समदुःखसुखः**, उभयोरपि कल्पनामात्रत्वेन तुल्यत्वात्, यदाह- वासनामात्रमेवैतत् सुखं दुःखं च देहिनाम् । तथा ह्युद्वेजयन्त्येते, भोगा रोगा इवापदि-इति (इष्टोपदेशे ६) । तमेव विशेषयति - **पूर्णः** - क्षुद्रोपपूरणोपेक्षाभावविभूषितः, यदुक्तम् - पूर्यन्ते येन कृपणास्तदुपेक्षैव पूर्णता पूर्णानन्दसुधास्निग्धा दृष्टिरेषा मनीषिणाम् - इति (ज्ञानसारे १-५) । वैषयिकवाञ्छाविरहितत्वेन नैराश्यान्यून इत्याशयः । एतदपि प्रवृत्त्यपेक्षयोदितमिति वस्तुवृत्त्याऽऽह - **आशा-**

**नैराश्ययोः समः** - स्पृहा सर्वाऽऽपदामेकसखी (महोपनिषदि ३-३६) - इतिवचनपरिणत्याऽस्पृहायामप्यस्पृहतयोभयोरपि वीतवैषम्यः, तमेव विशेषयति-**समजीवितमृत्युः**-जीवनमरण-द्वितयकालीनात्माव्ययभावसादृश्यं समीक्षमाणस्तद्द्वयेऽपि सरूपस्वरूपः, तदिदं समीक्षणम् - न जायते म्रियते वा कदाचित्, नायं भूत्वा भविता वा न भूयः । अजो नित्यः शाश्वतोऽयं पुराणो, न हन्यते हन्यमाने शरीरे ॥ वासांसि जीर्णानि यथा विहाय, नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयत्यापो न शोषयति मारुतः - इति (भगवद्गीतायाम् ) । एवंविधः **सन् एवमेव** - साम्यसुधासंसिक्तसत्पुरुषाननुसरन्नेव, **लयं व्रज** - अमन्दानन्दसन्दोहरससरससरसीसरूपे स्वभावे संलीनो भव ।

तदेनामनुशास्तिगिरमाकर्ण्योवाच जनकः - 'स्वभाव-संलीनतासम्पादनाय परभावत्याग आवश्यकः, स चातिदुष्कर इति कथमस्मादृशैर्विधातुं शक्यः ?' एतन्निशम्यात्र त्यागादिवार्त्तैव नेति का दुष्करतेत्यभिप्रायेण भावयितव्यं विभावयन्नाहाष्टावक्रः -

**[ [1]गुरुणैवपरीक्षार्थमुपदिष्टे लये सति ।**
**पूर्णात्मनो लयादीनां शिष्यो सम्भवमब्रवीत् ॥]**

१. अत्र गुरुशिष्यसंवादविसंवादोऽष्टावक्रवेदान्तेनोपलभ्यते ।

## प्रकरण-६

**आकाशवदनन्तोऽहं घटवत्प्राकृतं जगत् ।**
**इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥१॥**

**आकाशे**त्यादि, उपाधिमात्रतया पर्यवसितस्य विश्वस्य न कश्चिन्मया पारमार्थिकः सम्बन्ध इत्याशयः, **इति** - अनन्तरोक्तमेव, **ज्ञानम्** - यथार्थबोधः, इतरस्याज्ञानभूतत्वात्, अपायफलत्वात् । **तथा** - उक्तविधया, **एतस्य** - घटस्थानीयस्य जगतः, **न त्यागः** सम्भवति, गृहीतस्यैव तत्सम्भवात् । ग्रहणं तर्ह्यस्त्वित्यत्राह - **ग्रहो**ऽपि **न** सम्भवति, आकाशस्यापि घटग्रहणप्रसक्तेः, नापि **लयः** सम्भवति, प्रागुक्तनीत्योपाधिमात्रत्वेन वास्तविकस्य तस्याभावात् ।

यद्वा **नैतस्य त्यागो लय** उच्यते, पूर्वकृतसम्बन्ध-सम्बद्धस्यैव त्यागसम्भवात्, प्रकृते च तदभावात्, आत्मनः सर्वसम्बन्धमुक्ततया निरञ्जनत्वात्, तदुक्तम् - अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनः इति (नृसिंहपूर्वतापनीयोपनिषदि २-९-९) । अतो यदि जगत्त्याग एव लयत्वेनाभिमतस्तदा कस्यापि लयो न भवेत्, अभिप्रेतलयस्यैवासत्त्वात्, अतो वन्ध्यापुत्रजन्मवत्तदभाव एव स्यात् । एतदेवोदितं प्रकारान्तरेण - यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात्स्वभावतः । न हि तस्य भवेन्मुक्तिर्जन्मान्तर-शतैरपि - इति (कूर्मपुराणे २/२/१२-१३) ।

**नापि ग्रहो लय** इत्युच्यते, मालिन्यप्रसङ्गात्, प्रागुक्त-युक्त्या ग्रहस्यैवाशक्यत्वाच्च । अतः स्वभावसिद्ध एव लय इति पर्यवसितम् । एतदेवाऽपरथा स्फुटयति -

**महोदधिरिवाहं स प्रपञ्चो वीचिसन्निभः ।**
**इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥२॥**

व्याख्यातप्रायः । प्रकारान्तरेण त्यागाद्यभावमवगमयति-

**अहं स शुक्तिसङ्काशो रूप्यवद्विश्वकल्पना ।**
**इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥३॥**

**अहमित्यादि** । न हि रूप्यत्वेन कल्पितायाः शुक्तेः स्वरूपलाभाय किमपि त्यक्तव्यं गृहीतव्यं वा भवति, त्यक्तव्येनाभिप्रेतस्योपकल्पितत्वात्, परमार्थावस्थानाभावात्, गृहीतव्यत्वेनाभीष्टस्य गृहीततया ग्रहणाभावादिति हृदयम् । परिशिष्टं प्राग्वत् । एतदेवान्यविधयाऽभिदधन्नाह -

**अहं वा सर्वभूतेषु सर्वभूतान्यथो मयि ।**
**इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥४॥**

**( इत्युत्तरोपदेशचतुष्कम् ।)**

**अहमित्यादि** । आत्मवत् सर्वभूतानि यः पश्यति स पश्यति (आपस्तम्बस्मृतौ १०-११) मूर्तिः सर्वभूतानि चात्मनः (भागवते ४-७-३०) सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि सम्पश्यन् ब्रह्म परमं याति नान्येन हेतुना (कैवल्योपनिषदि १०) - इत्यादिवचस्तात्पर्यपरिणत्या परमसमतायोगा**दिति**-

अनन्तरोक्तं **ज्ञानं** सञ्जायते । प्रमाणं चात्र पारमर्षम् - सव्वभूयऽप्पभूयस्स सम्मं भूयाइं पासओ- इति (दशवैकालिके ४-३२) । अतो नैतदनुपादेयतया मिथ्यात्वेन वोपपादयितुं शक्यम् । **तथैतस्ये**त्यादि । इत्थञ्च जीवजगत्यपि त्यागादि-विषय-विरह एवेत्यभिप्रायः ।

तदेतद्वचोविभाकरविभाभिरस्ताविद्यान्धतमस उवाच जनकः ।

**[लययोगानुष्ठाने व्यवहारं निरङ्कुशम् ।**
**आशङ्क्य शिष्यः प्रोल्लासादब्रवीद्गुरुमुत्तरम् ॥]**

## प्रकरण-७

**मय्यनन्तमहाम्भोधौ विश्वपोत इतस्ततः ।**
**भ्रमति स्वान्तवातेन न ममास्त्यसहिष्णुता ॥१॥**
**मय्यनन्तमहाम्भोधौ जगद्वीचिः स्वभावतः ।**
**उदेतु वाऽस्तमायातु न मे वृद्धिर्न च क्षतिः ॥२॥**
**मय्यनन्तमहाम्भोधौ विश्वं नाम विकल्पना ।**
**अतिशान्तो निराकार एतदेवाहमास्थितः ॥३॥**

व्याख्यातप्रायाः । किञ्च -

**नात्मा भावेषु नो भावस्तत्रानन्ते निरञ्जने ।**
**इत्यसक्तोऽस्पृहः शान्त एतदेवाहमास्थितः ॥४॥**

**आत्मा भावेषु** - वैश्विकविषयेषु **न** विद्यते, तस्य स्वरूपमात्रावस्थितत्त्वात्, प्रागुक्तनीत्या भावानामेवाभावाद्वा । तथा **तत्र**-आत्मनि, तमेव विशेषयति-**अनन्ते**-प्रारम्भपर्यवसानान्तद्वितयवर्जिते, **निरञ्जने** - पुष्करपलाशवदञ्जनस्यागोचरे, **भावो न** विद्यते, उक्तहेतोः, **इति** - सर्वथा वैश्विकविषयसंयोगशून्योऽहमित्यवगमात्, **असक्तः** - विषयाऽऽसक्तिविरहितः, अदृष्टश्रुताननुभूतगोचर आसक्तिलेशस्याप्यसम्भवात्। अत एवा**स्पृहः**, न हि सर्वथाऽसंयुक्ते दर्शनादि परमार्थत उपपद्यत इति भावनीयम् । यद्वा भावानामभावादेव तत्सक्तिशून्यता सञ्ज्ञेया, मृगतृष्णाम्भसि स्नानविरहवत् ।

स्वमेव विशेषयति - **शान्तः** - विलीनविकल्पवीचितया स्तिमितः, **एतदेव** - असक्तत्वाद्यलङ्कृतमात्मस्वरूपमेव, **अहमास्थितः** - प्रतिपन्नवान्, स्वरूपसमृद्धिं संवीक्ष्य वन्ध्या-पुत्रोपमेष्वसत्प्रायेषु भावेषु मद्रसलेशस्यापि विरहात् ।

तदत्र यत्पर्यवसितं तत्सम्प्रेक्ष्य साश्चर्यमाचष्टे -

**अहो चिन्मात्रमेवाहमिन्द्रजालोपमं जगत् ।**
**अतो मम कथं पुत्र ! हेयोपादेयकल्पना ॥५॥**

**अहो** इत्याद्युदितार्थम्, **अतः** - मायामात्रत्वेन पर्यवसितस्य विश्वस्य त्यागाऽऽदानगोचरत्वासम्भवात्, हे **पुत्र ! कथं मम** तत्र **हेयोपादेयकल्पना** ? शशशृङ्गे हेयत्वादिधर्मवन्न तत्र हेयत्वादि कल्पयितुमपि शक्यते सचेतसेत्याशयः ।

अत्र **पुत्रे**तिसम्बोधनमष्टावक्रस्य जनकपुत्रतुल्यवयस्त्वा-दिति सम्भाव्यते । न च कथमेतावद्वयसा लघीयसोऽस्य देशकता सङ्गतिमङ्गतीति वाच्यम्, वाग्देवताया वयःप्रतिबन्ध-विरहात्, तदुक्तम्-बालोऽस्म्यहं महाराज ! न मे बाला सरस्वती । अपूर्णे पञ्चमे वर्षे वर्णयामि जगत्त्रयम्-इति ।

शुद्धनयोपदेशं दत्त्वा मा भूत्तदजीर्णेन नित्यमुक्तत्वाभि-मानतः स्वैरविषयप्रवृत्तिरिति सम्प्रधार्य यथा बन्धादि तत्त्वं व्यवस्थितं तत्प्रकटीकुर्वन्नाहाष्टावक्रः -

**[इत्थं परीक्षितज्ञानं शिष्यमेवाभिनन्दितुं ।**
**गुरुर्बन्धस्य मोक्षस्य व्यवस्थां सम्यगब्रवीत् ॥]**

## प्रकरण-८

**तदा बन्धा यदा चित्तं किञ्चिद्वाञ्छति शोचति ।**
**किञ्चिन्मुञ्चति गृह्णाति किञ्चिद्धृष्यति कुप्यति ॥१॥**

**यदा चित्तं किञ्चित्** - स्त्र्यादि सन्मानादि वा वस्तु **वाञ्छति** - अभ्यर्थनागोचरीकुरुते, किञ्चित् पुत्रमरणाद्यपमानादि वा **शोचति** - परिदेवते, **किञ्चित्** - अमनोज्ञाहारादि **मुञ्चति** - प्रद्वेषतः परित्यजति, किञ्चिन् मनोज्ञाहारादि **गृह्णाति** - स्वाभीष्टतया संवेत्ति, **किञ्चित्** - इषदपि, स्वेष्टसम्पतौ **हृष्यति** - औपाधिकमानन्दमभिनन्दति, तथा किञ्चित् **कुप्यति** अननुगुणतोपलब्धौ मन्युमयं भवति, **तदा** - अनन्तरोदितवाञ्छादिविशिष्टकाले, **बन्धाः**-कर्मात्मसंश्लेषा भवन्ति, सर्पवत् कोषकारकीटवच्चात्मन एव तत्तच्चित्तपरिणामपरिणत्या स्वबन्धप्रयोजकत्वात्, तदाहवेष्टयत्यात्मनाऽऽत्मानं यथा सर्पस्तथासुमान्। तत्तद्भावैः परिणतो, बध्नात्यात्मानमात्मना ॥ बध्नाति स्वं यथा कोश-कारकीटः स्वतन्तुभिः । आत्मनः स्वगतैर्भावैर्बन्धने सोपमा स्मृता- इति (अध्यात्मसारे १८/१६८, १६९)।

ननु यदि भाव एव बन्धहेतुस्तदा विषयप्रवृत्तिनिषेधो निरर्थक इति चेत् ? न, बन्धनिबन्धनभावनिषेधाय तस्यावश्यकत्वेन सार्थकत्वात्, तदुक्तम् - अध्यवसानमेव बन्धहेतुः, न तु बाह्यवस्तु । तर्हि किमर्थो बाह्यवस्तुप्रतिषेधः?

अध्यवसानप्रतिषेधार्थः । अध्यवसानस्य हि बाह्यवस्तु आश्रयभूतम्, न हि बाह्यवस्त्वनाश्रित्याध्यवसानमात्मानं लभते - इति (समयसारवृत्तौ २६५) । अत एवोक्तम्-परदव्वरओ बज्झदि, विरओ मुच्चेइ विविहकम्मेहिं । एसो जिणउवएसो समासदो बंधमुक्खस्स - इति (मोक्षप्राभृते १३) । वाञ्छादिविषयस्य परत्वं तु प्रतीतमेव, तथा चोक्तम् - यस्मै त्वं यतसे बिभेषि च यतो यत्रानिशं मोदसे, यद्यच्छोचसि यद्यदिच्छसि हृदा यत्प्राप्य पेप्रीयसे । स्निग्धो येषु निजस्वभावममलं निर्लोठ्य लालप्यसे, तत्सर्वं परकीयमेव भगवन्नात्मन् ! न किञ्चित्तव - इति (शान्तसुधारसे ५-३)।

उक्तमेव व्यतिरेकतो व्यनक्ति -

**तदा मुक्तिर्यदा चित्तं न वाञ्छति न शोचति ।**
**न मुञ्चति न गृह्णाति न हृष्यति न कुप्यति ॥२॥**

निर्विषयचित्तस्यैव मुक्तिहेतुत्वाद्वाञ्छादिविरहितचित्त-परिणामसमानकालीनमुक्तिप्रादुर्भाव उपपन्न एव, अन्वाह च- मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् - इति (ब्रह्मबिन्दूपनिषदि २) । विकल्पविलय एव महोदयोदय इति भावः, अभिहितं च - यस्य सङ्कल्पनाशः स्यात्, तस्य मुक्तिः करे स्थिता-इति (मण्डलब्राह्मणोपनिषदि २/३) ।

प्रकारान्तरेण बन्धमुक्तिकालविशेषमाह -

**तदा बन्धो यदा चित्तं सक्तं कास्वपि दृष्टिषु ।**
**तदा मोक्षो यदा चित्तमसक्तं सर्वदृष्टिषु ॥३॥**

स्पष्टम्, नवरं **दृष्टि**रिति स्वाभिप्रायविशेषः, तत्**सक्त**मिति कदाग्रहगृहीतम् । तादृशं चित्तं बन्धहेतुरितरदितरहेतुरित्याशयः। अत एवाहुराचार्याः - ग्रहः सर्वत्र तत्त्वेन मुमुक्षूणामसङ्गतः । मुक्तौ धर्मा अपि प्रायस्त्यक्तव्याः किमनेन तत् - इति (योगदृष्टिसमुच्चये १४८) । सुकरस्तावद्विषयत्यागः, किन्तु दुष्करं स्वाभिप्रायसम्मुञ्चनमित्येष मुक्तौ बाधकतमः, तद्दुर्मोक्षताऽपि अहङ्कारहेतुकेत्याह -

**यदा नाहं तदा मोक्षो यदाहं बन्धनं तदा ।**
**मत्वेति हेलया किञ्चिन्मा गृहाण विमुञ्च मा ॥४॥**

**(इत्यष्टावक्रे बन्धमोक्षनामाष्टमोपदेशः ।)**

**यदाऽह**मित्येतन्मात्रमपि संवेदनं **न, तदा मोक्षः** - जीवन्मुक्ततानुभूतिः । **यदाऽह**मित्येतन्मात्रोऽप्यभिमानस्**तदा बन्धनम्** - संसारैकहेतुकषायकारावासनियन्त्रणम् । अन्वाह च - अभिमान आत्मनो बन्धः तन्निवृत्तिर्मोक्षः - इति (सर्वसारोपनिषदि १) । अहङ्कारो हि सर्वकषायकन्दः, न ह्यहंताशून्यस्य लोभोदयः सम्भवति, अहङ्कारव्यधिकरण-ममकारासम्भवात्, सम्बन्धस्य द्व्याश्रयत्वात्, धर्मिविरहे धर्म-चिन्ताया अवकाशाभावाच्च । ततश्च निबन्धनाभावात्क्रोधमाया-

रूपावपि कषायौ न भवतः, मूलं नास्ति कुतः शाखेति न्यायात् । इत्थं चाहङ्कारस्यैव कषायसर्वस्वत्वात्तद्विगमे मुक्तिरुपपद्यत एव, तदुक्तम् - कषायमुक्तिः किल मुक्तिरेव - इति । **इति** - उक्तप्रकारेणाहम्मोक्षयोः परस्परपरिहारेणावस्थितिं **हेलया मत्वा** - सहजसंवेदनेन साक्षात्कृत्य, **मा किञ्चिद् गृहाण**, गृहीतस्याहङ्कृतिकारणतायोगे मुक्तिप्रत्यूहतासम्भवात्। नन्वेवमध्ययनादेरपि निषेधापत्तिः, तेषामपि शास्त्रार्थादिग्रहणरूपत्वादिति चेत् ? को वा किमाह ? पुरुषाद्यपेक्षयेयमपीष्टापत्तिरेव, अत एव - तुच्छा गारवबहुला - इत्याद्यागमेन स्त्रीणां दृष्टिवादाद्यध्ययनस्य तत्तत्काले निषेधः क्रियते, साधूनामपि यथायोग्यमेव गीतार्थगुरूभिर्दीयते । अथ शास्त्राणामपि प्रागधीतानां गर्वालम्बनतासम्भवादास्तां ग्रहणवार्त्ता, विस्मर्तव्यमेव प्रागधीतमिति चेत् ? अत्राह - **विमुञ्च मा**, बोधपराकाष्ठायामेवाहम्भावाभावसम्भवात्, तदाह-अहम्भावोदयाभावो बोधस्य परमावधिः - इति (अध्यात्मोपनिषदि ४१)।

तदत्र स्वमतिप्रवृत्तिं निरुध्य गुर्वाज्ञापरतन्त्रेण भाव्यमित्युपदेशसर्वस्वम्, किलाहं किञ्चिद् गृह्णामि मुञ्चामि वेत्यस्यापि वस्तुतोऽहङ्कारविकाररूपत्वादिति दिक् ।

मा भूदेतेन जनकस्य त्याज्यस्याप्यत्यागार्हत्वप्रतीतिरिति किञ्चिद्व्यवहारमवतारयन्नाहाष्टावक्रः -

**[ शिष्योक्तानुभवस्यैव दाढ्यार्थं गुरुणोच्यते ।**
**निर्वेदः स्पष्टमष्टाभिरिच्छादित्य जनात्मकः ॥ ]**

## प्रकरण-९

**कृताकृते च द्वन्द्वानि कदा शान्तानि कस्य वा ।**
**एवं ज्ञात्वेह निर्वेदाद् भव त्यागपरो व्रती ॥१॥**

इदं कृतमिदं त्वद्याप्यकृतमिति चिन्तैव व्यपदेशविशेषात् **कृताकृते**, तन्निबन्धनत्वात्तस्याः, **द्वन्द्वानि च** - सुखदुःखादिलक्षणानि युगलानि, **कदा** - संवत्सरसहस्रात्प्रागपि, **कस्य वा** - इन्द्रोपेन्द्रादेरपि, **शान्तानि** - निष्ठां गतानि ? कृतादिगोचरचिन्तायाः संसारिणो यावज्जीवमनुवर्तनात्, यमस्य कृताकृतप्रतीक्षकत्वविरहात्, सुखादेश्च चक्रारवदपरिश्रान्तं परावर्तनशीलत्वान्न कस्यापि समाप्तानीत्याशयः । **इह एवञ्ज्ञात्वा निर्वेदात्** - जीवननिष्ठायामप्यनिष्ठानिष्ठैरलमेभिरित्यध्यवसायात्मकाद्वैराग्यात्, **त्यागपरः** - तत्सर्वसन्न्यासपरायणः, **व्रती भव** - स्वीकृतसद्व्रतः स्याः, हेयहानस्याप्युपादेयोपादानसहकृतस्यैवेष्टसाधकत्वात् ।

निर्वेदोद्भावनायैव निवेदयन्नाह -

**कस्यापि तात ! धन्यस्य लोकचेष्टावलोकनात् ।**
**जीवितेच्छा बुभुक्षा च बुभुत्सोपशमं गताः ॥२॥**

हे **तात** ! **कस्यापि** अधिगतनिर्वेदधनत्वेन **धन्यस्य लोकचेष्टावलोकनात्**-उन्मत्तचेष्टाविडम्बिजनविचेष्टितनिभालनात्, यथाभिहितम् - हसन्ति क्रीडन्ति क्षणमथ च खिद्यन्ति

बहुधा, रुदन्ति क्रन्दन्ति क्षणमथ विवादं विदधते । पलायन्ते मोदं दधति परिनृत्यन्ति विवशा, भवे मोहोन्मादं कमपि तनुभाजः परिगताः- इति (अध्यात्मसारे ४-२०) । **जीवितेच्छा** - अनन्तरोदितोन्मादमयं जीवनं जीवितुं स्पृहोपशमं गतेत्यग्रे योगः । **बुभुक्षा च** - भोक्तुमभिलाषः, साऽप्यपगता, तस्यामप्युन्मादानतिक्रमात्, उच्छिष्टादिजुगुप्सितभोक्तृग्रथिल-चेष्टितवत्, अतस्तत्स्पृहानिवर्तनमपि न्याय्यमेव, यथोक्तम्- भुक्तोज्झिता मुहुर्मोहान्मया सर्वेऽपि पुद्गलाः । उच्छिष्टेष्विव तेष्वद्य मम विज्ञस्य का स्पृहा-इति (इष्टोपदेशे ) । तथा **बुभुत्सा**-नृपादिर्भवितुमिच्छा, साप्यपास्ता, परिणामविरसत्वात्, यदुक्तम् - धी धी धी संसारं देवो मरिऊण जं तिरी होइ। मरिऊण रायराया परिपच्चइ निरयजालाहिं - इति - (वैराग्य-शतके ५५) । नन्वस्य भवान्तरविपाकत्वेन लोकचेष्टावलोकन-स्य बुभुत्सोपशमहेतुत्वाभावप्रसङ्ग इति चेत् ? न, चर्मचक्षुरन्तरेणाप्यवलोकनसम्भवात्, श्रुतावध्यादिदृशामपि विद्यमानत्वात्, तासु च गत्यागत्यादेः प्रत्यक्षमीक्ष्यमाणत्वात् । अर्वाग्दृशोऽपि चक्रिमरणादिपर्यवसाने वैवश्यादिविचेष्टिताव-लोकनाद् बुभुत्सोपशम उपपन्न एव, यथोदितम् - ये षट्खण्डमहीमहीनतरसा, निर्जित्य बभ्राजिरे, ये च स्वर्गभुजो भुजोर्जितमदा, मेदुर्मुदा मेदुरा । तेऽपि क्रूरकृतान्तवक्त्ररद-नैर्निर्दल्यमाना हठादत्राणाः शरणाय हा ! दश दिशः प्रैक्षन्त

दीनाननाः - इति (शान्तसुधारसे २-१) इत्थं च जीवितेच्छा-दय **उपशमं गताः** - विलयं वियाताः, इच्छाविषयविरसता-दर्शनसमकालीनेच्छानिवर्तनस्य प्रेक्षावत्सु प्राकृतिकत्वात् । तद्विरसतामेव व्युत्पादयन्नाह -

**अनित्यं सर्वमेवेदं तापत्रितयदूषितम् ।**
**असारं निन्दितं हेयमिति निश्चित्य शाम्यति ॥३॥**

**सर्वमेवेदम्** दृश्यमानमङ्गाङ्गनादिकम्, **अनित्यम्**, तदाह - इष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदस्तथाऽऽरोग्यम् । देहश्च यौवनं जीवितं च सर्वाण्यनित्यानि - इति (प्रशमरतौ १५१)। अनित्यत्वाभ्युपगमेऽपि कादाचित्कस्थैर्ये भवति चार्वाकानुगस्य कस्यचित् सक्त्यतिशयः, यथा-पिब खाद च जातशोभने, यदतीतं वरगात्रि तन्न ते । न हि भीरु ! गतं निवर्तते समुदयमात्रमिदं कलेवरम् - इति, अतस्तन्निवृत्त्यै आह - **तापत्रितयदूषितम्** - आध्यात्मिकाधिदैविकाधिभौतिकलक्षण-त्रिविधतापकलङ्कितम्, मनोवाक्कायसन्तापमलिनं वा । अथ नैतदपि त्यागालम्बनं भवितुमर्हति, अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव भोक्तव्यत्वात् । यथा हि कश्चिद् धान्यार्थी सपलालानि धान्यान्याहरति, स तावदादाय निवर्तते । एवमेव विवेकसिद्धिरपि, हंसवत्, यथोक्तम् - हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः - इति (अभिज्ञान-

शाकुन्तले ) तस्माद्दुःखभयान्नानुकूलवेदनीयं सुखं त्यक्तुमुचितम्, न हि मृगाः सन्तीति शाल्यो नोप्यन्ते । अतस्तापत्रितयात्मकदुःखोपसृष्टतया सुखत्यागो मूर्खाणामेव, सतुषत्वेन तण्डुलाढ्यव्रीहित्यागवत्, तदवदाम - त्याज्यं सुखं विषयसङ्गमजन्म पुंसां, दुःखोपसृष्टमिति मूर्खविचारणैषा । व्रीहिञ्जिहासति सितोत्तमतण्डुलाढ्यान्, को नाम भोस्तुष-कणोपहितान् हितार्थी - इति ।

अत्रोच्यते । यदुक्तं दुःखस्य परिहारेणेत्यादि, तदविचारितमनोहरम्, परिहारस्याशक्यत्वात्, कामानां प्रकृत्यै-वाशोभनत्वाद्विडम्बनारूपत्वात्, तदाहुः - कामा असुन्दरा पयईए, विडम्बणा जणाणं - इति (समरादित्यकथायां नवमभवे) कामविडम्बनास्तु प्रायः सर्वजनप्रसिद्धाः । कैश्चित्तु प्रकटमुच्यतेऽपि, यथा-रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ता सखे ! मामपि । कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक ! केवलमहं धात्र्या सशोकः कृतः - इति (हनुमन्नाटके ५-४) ।

ननु यद्येकः शोकभाजनमभवत्, तदा सर्वेषां किमायातम्? सुखिनामपि कामिनां सम्भवादिति चेत् ? न, अग्न्यनौष्ण्य-वत्तदसम्भवात्, अत एव साक्षेपमभिहितं केनचित् - उब्भेउ अंगुली सो पुरिसो सयलंमि जीवलोयंमि । कामंतएण नारी

जेण न पत्ताइं दुक्खाइं-इति । अतः सूक्तम् - तापत्रितय-दूषितमिति । तदेव विशेषयति - **असारम्** - सारलेशवर्जितम्, कदलीवत्, तदाहुः - सुट्ठु वि मग्गिजंतो कत्थ वि कयलीइ नत्थि जह सारो । इंदियविसएसु तहा नत्थि सुहं सुट्ठु वि गविट्ठं - इति (भक्तपरिज्ञाप्रकीर्णके १४४) । पुनस्तदेव विशेषयन्नाह - **निन्दितम्** - बुधजनैरविगानेन विगर्हितम्, यथोक्तम् - हा असुइसमुप्पन्ना य, निग्गया य जेण चेव दारेणं । सत्ता मोहपसत्ता रमंति तत्थेव असुइदारंमि - इति (तन्दूलवैचारिके ८७) । अन्यत्रापि-जं जं नज्जइ असुइं लज्जिज्जइ कुच्छणिज्जमेयंति । तं तं मग्गइ अंगं नवरमणंगुत्थ पडिकूलो - इति (उपदेशमालायाम् २०९) । अत एत**द्धेयम्** - मनसाऽप्यप्रार्थनीयम्, **इति** - अनन्तरोक्तम्, **निश्चित्य** - अवगमातिशयेनावधार्य, **शाम्यति** - उपशान्तविषयवाञ्छो भवति । किञ्च -

**कोऽसौ कालो वयः किं वा यत्र द्वन्द्वानि नो नृणाम् ।**
**तान्युपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात् ॥४॥**

**क** इत्यादि । अनिर्विण्णानां द्वन्द्वोपशमावच्छिन्नकालवय-सोरभाव एवेति भावः । तदाह-शैशवे मातृमुखस्स्यात्तारुण्ये तरुणीमुखः । वृद्धः पुत्रमुखश्चापि मूर्खो नान्तर्मुखः क्वचित् - इति । अन्यत्राप्युक्तं प्रकारान्तरेण-बालस्तावत्क्रीडालग्नस्त-रुणोऽपि स्यात्तरुणीसक्तः । वृद्धोऽपीह चिन्तामग्नः, परब्रह्मणि

तत् कोऽपि न लग्नः - इति । अतस्**तानि** द्वन्द्वानि **उपेक्ष्य** गजनिमीलिकागोचरीकृत्य **यथाप्राप्तवर्ती** भवितव्यताद्यनुभावेन कृतसन्निधानेषु भावेषु समभावानतिक्रमेण विहितव्यवस्थितिः, **सिद्धिमवाप्नुयात्,** द्वन्द्वसंन्यासोदितसमतासम्प्राप्तसमाधेरेव कथञ्चिन् मुक्तिमूर्तित्वात्, तथा चार्षम् - सव्वारंभपरिग्गह-णिक्खेवो सव्वभूतसमया य । एक्कग्गमणसमाही णया अह एत्तियो मोक्खो - इति (बृहत्कल्पभाष्ये ४५८५) ।

निर्वेदालम्बनान्तरमाह -

**नाना मतं महर्षीणां साधूनां योगिनां तथा ।**
**दृष्ट्वा निर्वेदमापन्नः को न शाम्यति मानवः ॥५॥**

**महर्षीणाम्** - लोके वरिष्ठलिङ्गितया विख्यातानाम्, **साधूनाम्** - स्वस्वाभिप्रायेण सिद्धिसाधकानाम्, **तथा योगिनाम्** - विचित्रव्रतैर्विहितयोगानाम्, **नाना मतं दृष्ट्वा** - समानदृष्टादृष्टवस्तुविषयासमानाभ्युपगममभिवीक्ष्य, यथोक्तम् - स्मृतयो विभिन्नाः श्रुतयो विभिन्ना, नैको ऋषिर्यस्य मतं न भिन्नम् - इति । तदेतद् **दृष्ट्वा निर्वेदमापन्नः** - अहो तात्त्विकमुख्यतयाभिमतेष्वपि मत्सरप्रयुक्ततत्त्वोत्सार इत्यव-लोकनेन वैराग्यमुपगतः, यथोक्तम्- मदीयं दर्शनं मुख्यं, पाखण्डान्यपराणि तु । मदीय आगमः सारः, परकीयास्त्व-सारकाः ॥ तात्त्विका वयमेवान्ये भ्रान्ताः सर्वेऽप्यतात्त्विकाः ।

इति मत्सरिणो दूरोत्सारितास्तत्त्वसारतः - इति (योगसारे ५५, ५६) । **को मानवो न शाम्यति ?** यदि स्वाग्रहग्रस्तानां महर्षीणामप्येतादृशविसंस्थुलस्थितिस्तदा मम तु का वार्त्तेत्या-कारेण संवेदनेन सर्वोऽपि मताभिमानोपशममुपयात्येवेत्याशयः।

ननूक्तोपशान्त्यधिगतावपि न कोऽपि गुणः, भवविरक्त-स्यापि तन्निस्ताराभावात्, एतदपि तत्प्रयोजकाभावात्, एतदपि विप्रतिपन्नर्षीषु तस्यासम्भवादिति चेत् ? अत्राह -

**कृत्वा मूर्तिपरिज्ञानं चैतन्यस्य न किं गुरुः ।**
**निर्वेदसमतायुक्त्या यस्तारयति संसृतेः ॥६॥**

यः **चैतन्यस्य मूर्तिपरिज्ञानम्** - स्वरूपसंवेदनं **कृत्वा, निर्वेदसमतायुक्त्या** - भववैराग्येण अशेषार्थाविशेषभावेन च सहान्वितत्वापादनेन, **यः संसृतेः** - सन्ततमपि संसरणैक-स्वभावात् संसारात् **तारयति,** स तवात्मैव **किं** तव **गुरुर्न** विद्यते ? स्वरूपसंवेदनसञ्जातस्वाधिकरणकसदभिलाष-सम्पन्नत्वादियोगेन विद्यत एवेति भावः, तदाह-स्वस्मिन् सदभिलाषित्वादभीष्टज्ञापकत्वतः । स्वयं हितप्रयोक्तृत्वादात्मैव गुरुरात्मनः - इति (इष्टोपदेशे ३४) । व्यापारशतेनापि शुकवद् बकपाठनस्यासम्भवात्स्वरूपयोग्यताया आवश्यकत्वेन गुरोस्तु निमित्तमात्रता, गतेर्धर्मास्तिकायवत्, यथोक्तम् - नाज्ञो विज्ञत्वमायति, विज्ञो नाज्ञत्वमृच्छति । निमित्तमात्रमन्यत्तु,

गतेर्धर्मास्तिकायवत् - इति (इष्टोपदेशे ३५) । नन्वेवम् - तो सेविज्ज गुरुं चिय मुक्खत्थी मुक्खकारणं पढमं (पुष्पमालायाम् ३५४) - इत्यादिवचनानुपपत्तिरिति चेत् ? को वा किमाह ? अनुपपत्तिरेव निश्चयदृष्ट्या, उक्तस्वरूप एव गुरौ तस्योपपद्यमानत्वात्, तस्यैव भवाभवोभयाभियानाभियोक्तृत्वात्, उक्तं च - नयत्यात्मानमात्मैव जन्म निर्वाणमेव च । गुरुरात्मात्मनस्त-स्मान्नान्योऽस्ति परमार्थतः - इति (समाधिशतके ७५) । अन्यत्रापि-आत्मात्मना भवं मोक्षमात्मनः कुरुते यतः । अतो रिपुर्गुरुश्चायमात्मैव स्फुटमात्मनः-इति (ज्ञानार्णवे ३२-८१) ।

अथात्मन एव मुक्तिप्रयोजकत्वेनाभ्युपगते सति - आयओ गुरुबहुमाणो अवंझकारणत्तेण (पञ्चसूत्रे ४) - इति पारमर्षप्रतिघातप्रसक्तेर्नैषोऽभ्युपगमो न्याय्य इति चेत् ? न, उक्तप्रसक्तिविरहात्, गुरुबहुमानस्यात्मपरिणामरूपत्वेनात्मन एव मुक्त्यवन्ध्यहेतुत्वेन पर्यवसानात् । किञ्च गुरुबहुमानादिरूपशुद्धभावप्रयुक्तनिर्जराया एव कर्मक्षयात्मकमोक्षे साधकतमत्वादात्मन्येवापुनर्भवनिबन्धनत्वेनाभिमतस्य गुरुतत्त्वस्योपपद्यमानत्वाद्युक्त एव तत्र तद्व्यपदेशः, तदुक्तम् - निर्जरादिनिदानं यः शुद्धो भावश्चिदात्मनः । परमार्हः स एवास्ति तद्वानात्मा परं गुरुः - इति (पञ्चाध्याय्याम् ६२८) ।

तदेतन्निश्चयनयमतम्, व्यवहारेण तु गुरुमाहात्म्यमप्यभ्युपेयमेव, तदनभ्युपगमे निश्चयस्यापि स्वरूपलाभायोगात्, तद्द्वयोरपि मिथः समनुविद्धस्वरूपत्वात्, यदुक्तम्-णिच्छयबहुमाणेणं, ववहारो णिच्छओवमो कोई । णय णिच्छओ वि जुत्तो ववहारविराहगो कोई ॥ णिच्छयववहाराणं रूवं अण्णुण्णसमनुविद्धं तु - इति (गुरुतत्त्वविनिश्चये ४०, ४१)। अतस्तदभिप्रायेणात्मभिन्नगुरुतत्त्वं माननीयमेव, ध्यानादिमूलत्वेन तस्य मोक्षप्रसाधकत्वात्, यदाह-ध्यानमूलं गुरोर्मूर्तिः, पूजामूलं गुरोः पदम् । मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा - इति (गुरुगीतायाम् ७३) ।

नन्विदं विरुद्धतरं यन्नानागुरुमतदर्शनेन निर्विण्णो गुरुमाहात्म्याभ्युपगमं कुर्यादिति चेत् ? न, अभिप्रायापरिज्ञानात्, न हि नानामतदर्शनोद्भूतो निर्वेदो विषादात्मकः, अपि तु स्वाभिमतपक्षपातलक्षणरागापगमानुगुणो वैराग्यात्मकः, स च तत्त्वपक्षपातत्वेन पर्यवसन् तत्त्वोपदेशकगुरुशरणोरीकरण-कारणं स्यादेवेति न कश्चिद्विरोधः । यथा चैतत् तत्त्वं तथाभिहितं श्रुतकेवलिना, विवृतं चास्माभिरन्यत्रेति नात्र प्रतन्यते, (दृश्यतां सिद्धसेनीषष्ठीद्वात्रिंशिकावृत्तिस्तत्त्वोपनिषद्) । चैतन्यमूर्तिपरिज्ञानोपायमेव दर्शयति -

**पश्य भूतविकारांस्त्वं भूतमात्रान् यथार्थतः ।**
**तत्क्षणाद्बन्धनिर्मुक्तः स्वरूपस्थो भविष्यसि ॥७॥**

**त्वं भूतविकारान्** - देहाद्याकारपरिणतान् पृथिव्यादि-परिणामान्, **यथार्थतः** - तत्सतत्त्वानतिक्रमेण, किमुक्तं भवति-**भूतमात्रान्** - भूतभेदविशिष्टातिरिक्तान् **पश्य** - तत्त्वा-लोचनेनालोचय, मा तत्रात्ममतिं कार्षीरित्याशयः, इत्थमेव साक्षितासम्पादनेन जीवन्मुक्तिनिष्पत्तेः, तदाह-देहादिजडभावेषु साक्षिभावेन वर्तनम् । भवेद्यदा तदात्मासौ जीवन्मुक्तः प्रभुः स्वयम् - इति (अध्यात्मगीतायाम् १४) । फलप्रदर्शनस्य प्रवृत्तौ पेशलप्रयोजकत्वेन तदेव प्रदर्शयति - **तदित्यादि** । स्वपरयोस्तत्तद्दर्शनमेव मङ्क्षु मुक्तिप्रयोजकमिति भावः, उक्तं च-येनात्माऽबुद्ध्यतात्मैव परत्वेनैव चापरम् । अक्षयानन्तबोधाय तस्मै सिद्धात्मने नमः - इति (समाधितन्त्रे १) ।

ननु कथमुक्तदर्शनमात्रेण संसरणसम्मुञ्चनमित्यत्राह -

**वासना एव संसार इति सर्वा विमुञ्च ताः ।**
**तत्त्यागो वासनात्यागात् स्थितिरद्य यथातथा ॥८॥**

**( इति निर्वेदाष्टकम् ।)**

**वासना** - रागादितिमिरोपप्लवप्रयुक्तातत्तद्दर्शनम्, **सैव संसारः**, यदभावे सिद्धिस्तत्रैव संसारत्वसिद्धेरावश्यकत्वात्, अभिहितं च - चित्तमेव हि संसारो, रागादिक्लेशवासितम् । तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते - इति (अध्यात्मसारे १८-८३) । **इति**-अनन्तरोक्तहेतोः, **ताः सर्वा** वासना **विमुञ्च**

पुनराप्तिर्यथा न स्यात्तथा परिहर । यतो **वासनात्यागात्** **तत्त्यागः** - संसारपरिहारस्स्यात्, तदनतिरिक्तत्वात्तस्याः । इतरथा तु **अद्य** प्रस्तुतवचनोच्चारविशिष्टकालाश्रये दिने, **अद्य** **स्थितिः** - अत्यक्तत्वेन वासनाऽवस्थानम्, सैव **यथातथा** - परमैश्वर्य-समृद्धस्याप्यात्मनः संसारवर्त्तित्वेन विसंस्थुलता, पूर्वार्धोक्तनीत्या स्थितेरेव तदात्मकत्वात् ।

भदन्त ! वासनाविगमोऽपि कथमिति मदनुग्रहा-योच्यतामिति जनकेनाभ्यर्थितः प्राहाष्टावक्रः-

**[ विषयाणामभावेऽपि तुष्टिनिर्वेद ईरितः ।**
**तत्सिद्ध्यर्थं च विषये वैतृष्ण्यं शान्तिरीर्यते ॥ ]**

## प्रकरण-१०

**विहाय वैरिणं काममर्थं चानर्थसङ्कुलम् ।**
**धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु ॥१॥**

कामयतेऽनेनेति **कामः** - मदनः, तम्, **वैरिणम्** - आन्तरारातिम्, **विहाय** - तत्स्वरूपविज्ञानव्युत्पन्नविरागेण परिहृत्य, तज्ज्ञानमप्यागमावगमात्, यथोक्तम् - कामा रोगा मणुस्साणं कामा दुग्गतिवड्ढणा । कामे कामेमाणा अकामा जंति दोग्गतिं ॥ जे लुब्भंति कामेसु तिविहं हवति तुच्छ से। अज्झोववण्णा कामेसु बहवे जीवा किलिस्संति ॥ सल्लं कामा विसं कामा कामा आसीविसोवमा । बहुसाधारणा कामा कामा संसारवड्ढणा ॥ पत्थंति भावओ कामे जे जीवा मोहमोहिया । दुग्गमे भयसंसारे ते धुवं दुक्खभागिणो ॥ कामसल्लमणुद्धित्ता जंतवो काममुच्छिया । जरा-मरणकंतारे परियत्तंतवुक्कमं - इति (ऋषिभाषिते २८/१-६)

**अनर्थसङ्कुलमर्थं च** - परिग्रहं विहायेति वर्तते । अनर्थसङ्कुलता त्वर्थस्य तद्धेतुभावात्, यदाह - आरम्भैर्भरितो निमज्जति यतः प्राणी भवाम्भोनिधावीहन्ते कुनृपादयश्च पुरुषा येन च्छलाद्बाधितुम् । चिन्ताव्याकुलताकृतेश्च हरते यो धर्मकर्मस्मृतिं, विज्ञा ! भूरिपरिग्रहं त्यजत तं भोग्यं परैः प्रायशः - इति (अध्यात्मकल्पद्रुमे ४-६) । इतश्चार्थोऽनर्थहेतुः,

आयव्ययोभयकालेऽपि दुःखहेतुत्वात्, तद्रक्षाया अपि दुःखाविनाभावित्वाच्च, तदुक्तम् - अर्थानामर्जने दुःख - मर्जितानां च रक्षणे । आये दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम् - इति । **एतयोः** - कामार्थयोः, **हेतुम्** - पापानुबन्धिपुण्यबन्धप्रयोजकत्वेन निबन्धनम्, **धर्मम्** - अज्ञानतपःप्रभृत्यनुष्ठानम्, **तमपि** विहाय, तत्प्रसूतभोग-स्याप्यनर्थहेतुत्वात्, चन्दनोद्भूतानलवत्, तदाहुः-धर्मादपि भवन् भोगः प्रायोऽनर्थाय देहिनाम् । चन्दनादपि सम्भूतो दहत्येव हुताशनः - इति (योगदृष्टिसमुच्चये १६०) । अत्र प्रायःपदेन पुण्यानुबन्धिपुण्यप्रयोजकधर्मसम्भूतभोगव्यवच्छेदो द्रष्टव्यः, तादृशपुण्यस्या - प्रतिपातिसर्वसम्पद्बीजत्वात्, तदुक्तम् - शुभानुबन्ध्यतः पुण्यं कर्तव्यं सर्वथा नरैः । यत्प्रभावादपातिन्यो जायन्ते सर्वसम्पदः - इति (अष्टकप्रकरणे २४-५) । किन्तु तत्प्रयोजकधर्मे भोगप्रयोजनविरहो भवतीति ध्येयम्, इत्थमेव तत्स्वरूपलाभयोगात्, अन्यथा तस्यापि कण्डूयकतृणयत्नो-पमत्वप्रसक्तेः, तथाहुः-भोगसाधनहेतोर्यद् धर्मानुष्ठानमप्यलम् । तत् कण्डूव्याधिदुःखार्त्त-तृणयत्नोपमं मतम् ॥ सति तद्घातके हेतौ तत्र यत्नो यथा हितः । तथैव धर्मानुष्ठानं भवव्याधि-निवृत्तये ॥ तन्निर्वाणाशयो धर्मस्तत्त्वतो धर्म उच्यते । भवाशयस्त्वधर्मः स्यात् तथामोहप्रवृत्तितः - इति (अष्टकप्रकरणे

३००-३०२) । न चैवमैहिकप्रयोजनेन धर्मप्रवृत्तेः सर्वथा त्याज्यत्वमेवेति वाच्यम्, ययानाकुलितस्य समाधिना धर्मप्रवृत्तिस्यात्तादृशाभिमतैहिकफलनिष्पत्तेरिष्टफलसिद्धिरित्यनेन प्रार्थनासूत्रे याच्यमानत्वात्, तस्यापि धर्मत्वानभ्युपगमे सर्वस्य चैत्यवन्दनानुष्ठानस्याधर्मत्वापत्तेः, परमार्थतस्तत्प्रार्थनायां भवाशयाभावाच्च । उपेयसाधनत्वे हि उपायोऽपि तत्तां प्रतिपद्यत इति । प्रसिद्धं चैतत्तत्त्वं वन्दारुवृत्ति - ललितविस्तरा - पञ्चाशकादिप्रभृतिग्रन्थेषु । ततो विस्तरार्थिना त एवावलोक्यानि ।

किञ्च - सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्यबाधे - इति न्यायाद् भवाशयधर्महानोक्तावपि भवाशयहान एव तात्पर्यमवगन्तव्यम् । न चात्र विशेष्यबाधकविरहान्न विशेषणोपसङ्क्रमस्स्यादिति वाच्यम्, धर्मस्यैकान्तहितकृत्त्वप्रतिपादकार्षस्य तद्बाधकस्य सद्भावात्, यदाह - धर्मश्चिन्तामणिः श्रेष्ठो धर्मः कल्याणमुत्तमम् । हित एकान्ततो धर्मो धर्म एवामृतं परम् - इति (धर्मबिन्दौ ४१) ।

किञ्च पुरुषविशेषमाश्रित्याशयानतिशुद्धावपि यदि गीतार्थैर्धर्मप्रवृत्तिः कार्यते, तदा न कोऽपि तत्र विरोधमुद्भावयितुं प्रत्यलः, शुद्धहेतोरशुद्धस्याप्युपादेयत्वानपायात्, अन्यथा मिथ्यादृशामपि यद् व्रतदानं शास्त्रप्रसिद्धं तन्नोपपद्येत, तथोक्तम् अशुद्धापि हि शुद्धायाः, क्रिया हेतुः सदाशयात् । ताम्रं

रसानुवेधेन, स्वर्णत्वमधिगच्छति ॥ अतो मार्गप्रवेशाय व्रतं मिथ्यादृशामपि । - इति (अध्यात्मसारे २/१६-१७)

ननु च तथापि मोक्षाशयस्यैव धर्मस्योत्कृष्टत्वेनेतरनिषेधने न कोऽपि दोष इति चेत् ? न, बालजीवेषु मोक्षमात्राशयस्य दुःसम्भवात्तन्निषेधने सर्वथा तदुच्छेदापत्तेः, न हि प्रभूताभ्यासमन्तरेण शुद्धधर्मसिद्धिः प्रायेण, शुद्धाभ्यासस्याप्यनल्पभवैः प्राप्यत्वात्, उक्तं च - अभ्यासोऽपि प्रायः प्रभूतजन्मानुगो भवति शुद्धः - इति (षोडशके १३-१३) । न हि सकृन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति । अत एवोक्तं परैरपि - प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः । अनेकजन्मसंसिद्धस्ततो याति परां गतिम् - इति (भगवद्गीतायाम् ६-४५) ।

तदेवं शुद्धधर्मस्य तद्धेतोश्च निषेधो न केनापि शास्त्रन्यायविदा विधातुं शक्य इति दृढमवधारणीयम् । एतावता धर्महानस्य भवाशयहानपरत्वमावेदितम्, साम्प्रतमितरथाऽपि यथा धर्महानमुपपद्यते तथोच्यते, द्वितीयापूर्वकरणे क्षायोपशमिकधर्माणां त्यागो भवति, स च धर्मसंन्यासत्वेन प्रसिद्धः, इत्थमपि धर्महानं सङ्गतिमङ्गति, उक्तं च - धर्मास्त्याज्याः सुसङ्गोत्थाः क्षायोपशमिका अपि । प्राप्य चन्दनगन्धाभं धर्मसंन्यासमुत्तमम् - इति (ज्ञानसारे ८-४) । किन्तु स स्वकालप्राप्तः सन् प्रकृत्यैवास्पदं लभते, न तत्राभियोगो भवतीति ध्येयम्, अत

एवाभिहितम् - द्वितीयापूर्वकरणे क्षायोपशमिका गुणाः । क्षमाद्या अपि यास्यन्ति स्थास्यन्ति क्षायिकाः परम् - इति (अध्यात्मोपनिषदि २-५८) । निरवच्छिन्नधर्महानं त्वनिष्टमेवेति न तदाशङ्का कार्या ।

एवञ्च **सर्वत्र** - उक्ते कामादौ, **अनादरं कुरु** स्वरसं परिहर । ननु सर्वत्रोक्तेर्धर्मानादरप्रत्ययो दुर्निवार इति चेत् ? न, सति बाधके यथोचितयोगस्यैव कर्तव्यत्वात्, बाधकस्य च दर्शितत्वात् । किञ्च स्वयं गीताकृताऽपि सावच्छिन्नधर्मस्यैव तद्विषयतयोपदिष्टत्वेन न कोऽप्याऽऽशङ्कावकाशः, तथाहि - **एतयोर्हेतुं धर्मम्** - इत्यभिदधता स एव धर्मो हानोचितत्वेनाभिहितः, यो न मोक्षहेतुर्नापि मोक्षहेतोः शुद्धधर्मस्यापि हेतुः, अपि तु कामार्थमात्रहेतुः, तत्राऽपि सविशेषणावित्यादिन्यायात्कामार्थप्रयोजनत्याग एवोपदिष्ट इति प्रागुक्तमनुसन्धातव्यम् । न चैवकाराश्रुतेः सावधारणव्याख्यानुचितेति वाच्यम्, अनिष्टार्थनिवृत्त्यै तस्यावश्यकत्वात्, अन्यथानुक्ततुल्यतापत्तेः, यदुक्तम्- वाक्येऽवधारणं तावद-निष्टार्थनिवृत्तये । कर्तव्यमन्यथाऽनुक्तसमत्वात्तस्य कुत्रचित् (तत्त्वार्थ-श्लोकवार्त्तिके १-६-५३)

ननु च मनोरमा कामादय इति कथङ्कारमेते त्यक्तव्या इति चेत् ? विनश्वरस्वभावावलोकनादिति गृहाण, यथोक्तम्- सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः । किन्तु मताङ्गनापाङ्गभङ्गलोलं हि जीवितम् - इति ( ) ।

अतोऽतितरलतया गत्वराः सुत्याज्या एवैत इति स्वप्नाद्युपमयाभिदधाति -

**स्वप्नेन्द्रजालवत्पश्य दिनानि त्रीणि पञ्च वा ।**
**मित्रक्षेत्रधनागारदारदायादिसम्पदः ॥२॥**

**स्वप्ने**त्यादि व्यक्तार्थम्, उक्तं च-माइंदजालचवला विसया जीवाण विज्जुतेअसमा । खणदिट्ठा खणनट्ठा ता तेसु को हु पडिबंधो ? - इति इन्द्रियपराजयशतके ८६ । रागो हि नित्यस्वभाव एव वस्तुनि न्याय्यः, इतररागस्य दुःखहेतुत्वात्, अत एव पारमर्षम् - भेउरेसु न रज्जिज्जा कामेसु बहुलेसु वि - इति (आचाराङ्गे १-८-८/२३) ।

ननु सर्वसंसारसंन्यासं विधाय यदि कस्मिंश्चिदेव वस्तुनि मनः सतृष्णं भवेत्तदा को दोषः ? यथा पायसपरिपूर्णपात्रे निम्बरसबिन्दौ निपतितेऽपि सति माधुर्यानपायः, तथा प्रकृतेऽपि भविष्यतीति चेत् ? न, दृष्टान्तवैषम्यात्, तत्र बिन्दुपातेऽपि पायससद्भावात्, प्रकृते तु यत्किञ्चिद्वस्तुन्यपि तृष्णाभावे संसारसंन्यास एव खपुष्पायते, तृष्णाविषयस्यैव संसारत्वात्, एतदेव साक्षादाह -

**यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै ।**
**प्रौढवैराग्यमाश्रित्य वीततृष्णः सुखी भव ॥३॥**

**यत्रे**त्यादि । संसरन्त्यनेन सत्त्वा नरादिपर्यायान्नार-

कादिपर्यायान्तरमितिसंसारलक्षणस्य तस्मिन् समन्वयदर्शनात् । अतः **प्रौढवैराग्यमाश्रित्य** - प्रबलभवनिर्वेदमालम्ब्य, तृष्णाविषयस्य संसाररूपत्वेन दर्शितत्वात्, संसारनिर्वेदमन्तरेण तृष्णात्यागस्याशक्यत्वात्तदाश्रयणस्यायमुपदेशः, ततश्च **वीततृष्णः** सन् **सुखी भव**, तृष्णाया एव दुःखात्मकतया तद्विगम एव सुखाविर्भावसम्भवात्, उक्तं च - इन्द्रियाणां विषयसेवातृष्णातो निवृत्तिर्या तत्सुखम्, न विषयविषया तृष्णा, दुःखमेव सा - इति (भगवद्गीताशाङ्करभाष्ये २-६६) । इत्थञ्च-

**तृष्णामात्रात्मको बन्धस्तन्नाशो मोक्ष उच्यते ।**
**भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ॥४॥**

**तृष्णामात्रात्मको बन्धः**, यद्व्यपगमे मुक्तिस्तस्यां बन्धत्वोपगमस्य न्यायोपपन्नत्वात्, एतदेवाह - **तन्नाशः** - तृष्णाविलयः, **मोक्ष उच्यते**, तस्मिन्नवस्थान्तर इहापि जीवन्मुक्त्यनुभूतेः प्रत्यक्षसिद्धत्वात्, अतस्त्वम**संसक्तिमात्रेण** - कादाचित्केनापि तृष्णासंसर्गविरहेण, **मुहुर्मुहुः** - एतद्योग-प्रयोगेणाभीक्ष्णम्, **प्राप्त्या** - जीवन्मुक्तिसमधिगत्या, **तुष्टिः** - महानन्दो यस्य सः - **प्राप्तितुष्टिः**, एवंविधो **भव**,

ननु च मा भूद्बहिर्गतवस्तुजिघृक्षालक्षणा तृष्णा, आत्मन उत्तरोत्तरवरतरपर्यायप्रादुर्भावे या स्पृहा, सा बुभुत्सारूपा तृष्णा तु दुर्निवारेति चेत् ? अत्राह -

**त्वमेकश्चेतनः शुद्धो जडं विश्वमसत्तथा ।**
**अविद्यापि न किञ्चित्सा का बुभुत्सा तथापि ते ॥५॥**

**त्वमेकः** - अद्वितीयः, **शुद्धः** - विपक्षलेशेनाप्यकलङ्कितः, **चेतनः** - परमानन्दप्रदचितिक्रियापरिणतः, **विश्वं तु जडम्**, आत्मनोऽमूर्तत्वेनादृश्यमानत्वात्, दृश्यमानस्य च पुद्गलमात्रत्वेन जडत्वानतिक्रमात्, **तथा असत्** - क्षणविनश्वरतया मायेन्द्रजालाद्यनतिशायि । नन्वस्त्वसद्विश्वं तथाप्यविद्यया विद्यमानस्तद्व्यवहारो दुरपह्नव एवेति चेत् ? अत्राह - **सा** - व्यवहारालम्बनत्वेनाभिमता, **अविद्यापि न किञ्चित्**, अविद्यात्वादेव, तदुक्तम् - दुर्घटत्वमविद्याया भूषणं न तु दूषणम् । कथञ्चिद्घटमानत्वेऽविद्यात्वं दुर्घटं भवेत् - इति (इष्टसिद्धौ) । इत्थञ्च दुर्घटस्य शशशृङ्गवदकिञ्चित्त्वमुपपन्नमेव । एतच्च सङ्ग्रहनयाभिप्रायेणोक्तम्, अन्यथा तु विद्यामयात्मशक्तेः पुरस्तादविद्याया गणनाविरहात्तस्या अकिञ्चित्त्वमुपपादनीयम्, अविद्याऽज्ञानं मोह इत्येकार्थाः ।

**तथापि** - त्वद्व्यतिरिक्तसर्वस्य वन्ध्यापुत्रप्रायत्वेन परमपर्यायसदातनावस्थितौ बाधकविरहेणावाप्यावाप्तावपि, **ते का बुभुत्सा ?** शिखरिसर्वोच्चशिखरारूढस्यारुरोहयिषावन्न तव बुभुत्सा साम्प्रतेति हृदयम् ।

नन्वभ्युपगच्छामि यत्तृष्णा बुभुत्सा चाकर्तव्ये, तथापि

राज्यादिपालनं तु मम स्वधर्मत्वेन कर्तव्यमेव, तदुपेक्षायास्तद्वि-नाशयोनित्वादिति जनकेनाभिहितः सन्नाहाष्टावक्रः -

**राज्यं सुताः कलत्राणि शरीराणि सुखानि च ।**
**संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि ॥६॥**

**राज्यमित्यादि** । **सम्** - दिवानिशमपि तदेकाध्यव-सिततया **सक्तः** - परित्यक्तपरिशिष्टानुष्ठानः सन् लग्नः, यदि राज्यादौ **संसक्तस्यापि तवैतानि जन्मनि जन्मनि नष्टान्येव**, तदा तद्विनाशे तदुपेक्षाया विशिष्य कारणत्वासिद्धौ न तदालम्बनतोऽपि स्वभावसञ्च्युतिरुचितेति भावः । राज्यादिविनाशस्तु चलस्वभावत इति प्रतीतिसिद्धम्, उक्तं च - चलं राज्यैश्वर्यं धनकनकसारः परिजनो, नृपाद्वाल्लभ्यं च चलममरसौख्यं च विपुलम् । चलं रूपारोग्यं चलमिह चरं जीवितमिदं, जनो दृष्टो यो वै जनयति सुखं सोऽपि हि चलः - इति (उत्तराध्ययनबृहद्वृत्तावुद्धरणम्) अतः -

**अलमर्थेन कामेन सुकृतेनापि कर्मणा ।**
**एभ्यः संसारकान्तारे न विश्रान्तमभून्मनः ॥७॥**

आद्यवृत्तानुसारेण सुगमम्, नवरं **विश्रान्त**मित्यात्म-स्वभावैकलीनम् । उक्तं च - जो सुत्तो ववहारे सो जोइ जग्गए सकज्जम्मि । जो जग्गदि ववहारे सो सुत्तो अप्पणो कज्जे - इति (मोक्षप्राभृते ३१) । किञ्च -

**कृतं न कति जन्मानि कायेन मनसा गिरा ।**
**दुःखमायासदं कर्म तदद्याप्युपरम्यताम् ॥८॥**

(इत्युपशमाष्टकम् ।)

**कति जन्मानि** यावत् **कायेन मनसा गिरा** च **दुःखम्**, तन्मयत्वात्, **आयासदं** च, दुःखहेतुत्वात्, **कर्म न कृतम्** ? भवस्य भविनश्चानादितया या काचिदपि कष्टरूपा तद्योनिश्च मनोवाक्कायप्रवृत्तिः सम्भवति, सा सर्वापि त्वया कृतैवेत्याकूतम् । **तत्** - तस्मात्, **अद्यापि** - साम्प्रतं तु, **उपरम्यताम्** - व्यापारविरतिं प्रतिपद्यस्व, तस्या एव सुखोपायत्वात्, वक्ष्यते च - व्यापारे खिद्यते यस्तु, निमेषोन्मेषयोरपि । तस्यालस्यधुरीणस्य, सुखं नान्यस्य कस्यचित् - इति (अष्टावक्रगीतायाम् १६-४) ।

नन्वद्यापि प्रजाप्रीत्याद्याविर्भावलक्षणो भावः, रिपुप्रभृति-विनाशरूपोऽभावश्च मम साध्य इति कथं प्रवृत्त्युपरमो मया कर्तुं शक्य इति जनकेन पर्यनुयुक्त उत्तरयत्यष्टावक्रः -

**[उक्ता शान्तिर्न विज्ञानं विना कस्यापि जायते ।**
**इति निश्चितमेवाह गुरुर्ज्ञानामृताष्टकम् ॥]**

## प्रकरण-११

**भावाभावविकारश्च स्वभावादिति निश्चयी ।**
**निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति ॥१॥**

**भावस्य** - आविर्भावयितुमिष्टस्य, **अभावस्य** च - विनाशयितुमभिमतस्य, **विकारः** - तत्तत्पर्यायपरिणतिः, **स्वभावात्**-तत्तत्पर्यायपरिणमनप्रायोग्यनिजप्रकृत्या भवति, नैष त्वत्प्रवृत्त्यैकाधीनः, उक्तं च - कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च । स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः - इति ।

ननु च कथं प्रयत्नमन्तरेणापि फलं सम्भवति, न हि स्तनपानाद्यपि बालादिपौरुषमन्तरेण घटाकोटिमाटीकते, यथोक्तम् - आलसड्ढो णिरूच्छाहो फलं किंचि ण भुंजदि । थणक्खीरादिपाणं वा पउरुसेण विणा ण हि - इति (गोम्मटसारे कर्मकाण्डे ८९०) । अतो न स्वभाववादालम्बनेन निरुद्यमता श्रेयसीति चेत् ? स्वमुखासन्नदेशे स्तनोपनतौ बालस्य कः प्रयत्न इत्येव तावदुच्यताम्, सा यथा तत्प्रयत्नमन्तरेणैव सिध्यति, तथान्यदपि सेत्स्यतीत्यलं पौरूषाभिमानेन, मृगाङ्गनानयनाञ्जनादिप्रभूतवस्तूपपत्तौ स्वभाव-वादस्यैव शरणत्वात्, तदुक्तम् - केनाञ्जितानि नयनानि मृगाङ्गनानां ? को वा करोति रुचिराङ्गरुहान् मयूरान् ?

कश्चोत्पलेषु दलसन्निचयं करोति ? को वा करोति विनयं कुलजेषु पुंसु ? - इति (द्वादशारनयचक्रवृत्तौ द्वितीयार उद्धरणम्) । तस्मात्त्याज्य एव स्वभावसृष्टे स्वकर्तृत्वाभिमानः, इत्थमेव तत्त्वदृष्ट्यधिगतेः, तदाह - स्वभावतः प्रवृत्तानां निवृत्तानां स्वभावतः । नाहं कर्तेति भावानां यः पश्यति स पश्यति - इति (द्वादशारनयचक्रवृत्तौ द्वितीयार उद्धरणम्) । **इति निश्चयी** - स्वभावस्रष्टृत्वविहितविनिश्चयः, **निर्विकारः** - तत्तत्प्रयत्नपरिणतिरूपविकृतिवर्जितः, अत एव **गतक्लेशः** - प्रयत्नप्रसूतायासक्लेशविनिर्मुक्तः सन् **सुखेनैव**-दुःखमन्तरेणैव, प्रयत्नस्यैव दुःखात्मकत्वेन तद्विगमे सुखस्यैवावशिष्टत्वात्, **उपशाम्यति** - स्वभावसंविश्रान्तिमनुभवति ।

इदन्त्वत्रावधेयम् - यदा ह्यात्मा पुरुषकाराभिमानेनात्महितावगणनापरो भवति, तदा स्वभावादिवादनिवेदनेन स आत्महितविधाववतार्यते । न चैवं पुरुषकारः सर्वथा विफल इति मन्तव्यम्, सुप्तसिंहन्यायेन तस्यापि साफल्याभ्युपगमात्, तदुक्तम् - उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः । न हि सिंहस्य सुप्तस्य प्रविशन्ति मुखे मृगाः - इति (पञ्चतन्त्रे २-६-१३९) । वस्तुतस्तु स्वभावादिप्रत्येकवादस्यैकान्तो मिथ्यात्वम्, तत्समुदायस्यैव सम्यक्त्वात्, सर्वेष्वपि कार्येषु तत्समुदायस्यैव जनकत्वेन ज्ञानिभिर्दृष्टत्वात्, तदाहुः - कालो

सहाव नियइ पुव्वकयं पुरिसकारणेगंता । मिच्छत्तं ते चेव ३ समासओ होंति सम्मत्तं ॥ सव्वम्मि चेव कज्जे एस कलावो बुहेहिं निद्दिट्ठो । जणगत्तेण तओ खलु परिभावेयव्वओ सम्मं - इति (उपदेशपदे १६४-१६५) । इत्थमेवाग्रेऽपि सर्वत्र ज्ञातव्यम्, न त्वेकान्ताऽऽशङ्का कार्या । प्रकृतेऽपि राज्यादिरागहेतुकपुरुषकारनिवर्तनाय तत्तन्नयप्राधान्यविवक्षा सङ्गच्छत एवेति ध्येयम् । नयान्तरेण न्यायमार्गमवतारयन्नाह-

**ईश्वरः सर्वनिर्माता नेहान्य इति निश्चयी ।**
**अन्तर्गलितसर्वाशः शान्तः क्वापि न सज्जते ॥२॥**

ईष्टे इत्येवंशील **ईश्वरः** - कर्म, सर्वसंसारिजीवेषु प्रभविष्णुत्वात्, स एव **सर्वनिर्माता** - पृथिव्यादिकृत्स्न-पर्यायकर्ता, नेहान्यः कश्चित् कर्ता, पराभिमतेश्वरस्य शरीरादि-शून्यत्वेन कर्तृत्वासम्भवात्, उक्तं च - शिशोर्न जातिर्जन-काद्यभीष्ट्या, शिशोरभीप्साऽपि न तत्र हेतुः । तन्वादिहीनस्य न चेश्वरस्य किन्त्वेकमेवात्र सहं हि कर्म - इति (जैनगीतायाम् १२-१४) । प्रमाणं चात्र प्राभवं वचः-न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः - इति (भगवद् गीतायाम् ५-१४) ।

एतेन - अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा-(महाभारते वनपर्वणि ३०-२८) इत्यादिवचनमपि कर्मात्मकेश्वर एव सङ्गतिमङ्गती-

त्यावेदितम् । अत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थविस्तरभयात् ।

**इति निश्चयी** - कर्मकर्तृत्वावधारणधारकः । तमेव विशेषयति - **अन्तर्गलितसर्वाशः** - किलाहं कुटुम्बादिपालनं कुर्यामित्यादिलक्षणाशालेशशून्यः, कर्मैककर्तृत्वावधारणेन स्वान्यथासिद्धिसंवेदनात्, अत एव **शान्तः** - प्रवृत्तिपरिहृतिप्रोद्भूतप्रसन्नभावः, स एवंविधः सन् **क्वापि** राज्यादौ **न सज्जते**, निराशशान्तात्मनि सक्त्यसम्भवात् । पुनरपि नयान्तरेणोन्नयति -

**आपदः सम्पदः काले दैवादेवेति निश्चयी ।**
**तृप्तः स्वस्थेन्द्रियो नित्यं न वाञ्छति न शोचति ॥३॥**

**काले** - स्वस्वावसरे, **आपदः** - रोगादयः, **सम्पदश्च** - राज्यादयः, **दैवादेव** - विधिव्यतिरिक्तव्यक्तिमन्तरेणैव सम्पद्यन्ते, यदाह-अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं दैवहतं विनश्यति । जीवत्यनाथोऽपि वने विसर्जितः, कृतप्रयत्नोऽपि गृहे न जीवति - इति (भर्तृहरिकृते वैराग्यशतके ९२) । **इति निश्चयी** - दैवकर्तृत्वसिद्धिसिद्धस्वाकर्तृत्वसिद्धिसंवेत्ता, **तृप्तः**, विगलितयत्किञ्चित्करणतृष्णत्वात्, **नित्यं स्वस्थेन्द्रियः**, अन्तर्मुखीभावमापन्नानां तदिन्द्रियाणामात्मैकप्रतिष्ठितत्वात्, स एवंविधस्सन् स्वकरणीयत्वेन **न** किञ्चिदपि **वाञ्छति**, नापीदं

मया न कृतमित्याद्याकारकखेदेन **शोचति**, दैवकर्तृत्व-दृढावधारणेन स्वकर्तृत्वशङ्काया अप्यभावात् । किञ्च-

**सुखदुःखे जन्ममृत्यू दैवादेवेति निश्चयी ।**
**साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते ॥४॥**

**सुखे**त्यादि । तथाहि - अत्युद्यमी क्रियत एव च यः श्रमी च, शौर्यान्वितश्च गुणवांश्च सुधीश्च विद्वान् । प्राप्नोति नैव विधिना स पराङ्मुखेन, स्वीयोदरस्य परिपूरणमन्नमात्रम्-इति (बृहत्पराशरस्मृतौ १२-७०) ।

स्वसाध्यत्वेन किञ्चिदपि वस्तु न पश्यतीति **साध्यादर्शी** - उक्तनीत्या सुखादिसर्ववस्तुनो विधिकृतत्वात्, अत एव **निरायासः**, आयासनिष्पाद्याभावात्, स एवंविधः सन् दैवयोजितत्वेन किञ्चित् **कुर्वन्नपि** कर्तृत्वाभिमानेन तत्प्रत्ययिककर्मणा च **न लिप्यते**, तदुक्तम् - पराश्रितानां भावानां कर्तृत्वाद्यभिमानतः । कर्मणा बध्यतेऽज्ञानी, ज्ञानवांस्तु न लिप्यते - इति (अध्यात्मसारे १८-१०९) । ननु दुर्घटा कार्यकरणेऽपि तत्कर्तृत्वाहङ्कृतिमुक्तिरिति चेत् ? न, शरीरादिभेदबुद्ध्युदये तस्याः सुघटत्वात्, यदाह-नाहं वपुर्नैव मनो न वाणी, कर्ता न नो कारयिता च तासाम् । न चानुमन्तेति समाधियोगाद्, विदन्नहङ्कारमतिं क्व कुर्यात् - इति (वैराग्यकल्पलतायाम् १-१९४) । किञ्च -

**चिन्तया जायते दुःखं नान्यथेहेति निश्चयी ।**
**तया हीनः सुखी शान्तः सर्वत्र गलितस्पृहः ॥५॥**

**चिन्तये**त्यादि । संसारस्यैव दुःखमयत्वात्, तस्य च यावच्चिन्ताभावित्वात्, तदिदमाह - यावच्चिन्तास्ति जन्तूनां तावद् भवति संसृतिः । यथेन्धनसनाथस्य स्वाहानाथस्य वर्धनम् - इति (नियमसारवृत्तौ २४६) । अत**स्तया** - इदं कृतमिदं नेत्यादिचिन्तया, **हीनः** - विरहितः, **सुखी** भवतीत्यादि व्यक्तम् । कृतादिचिन्ताहानोपायमेव दर्शयति -

**नाहं देहो न मे देहो बोधोऽहमिति निश्चयी ।**
**कैवल्यमिव सम्प्राप्तो न स्मरत्यकृतं कृतम् ॥६॥**

**नाहं देहः**, तस्य पुद्गलात्मकत्वेनाज्ञतया वैधर्म्येण मदभिन्नत्वासम्भवात् । नन्वस्तु वैधर्म्यं मा भूद् भेदः, को दोष इति चेत् ? पृथिवीगगनाभेदप्रसङ्गाख्य इति गृहाण । तदवदाम - वैधर्म्यं यत्र तद् भिन्नं पृथिव्या गगनं यथा । ज्ञस्वभावोऽज्ञकात्तस्माद् भिन्नोऽस्मि पुद्गलादहम् - इति (शमोपनिषदि ५- ) । **न मे देहः**, प्रागुक्तयुक्त्या सम्बन्धविरहात्, यतो **बोधः**-चिन्मात्रचिन्तामणिः, **अहम्** - मदात्मा, **इति निश्चयी** - कृतनिर्णयः, **कैवल्यमिव सम्प्राप्तः** - जीवन्मुक्तः सन्, **अकृतम्** - इदं मया कर्तव्यत्वेन परिशिष्टम्, **कृतम्** - इदं तु मया विहितमिति **न स्मरति**,

अनुभूतस्यैव स्मरणसम्भवात्, तस्य च कथञ्चित् कर्तृत्वेऽपि कृत्यनुभूतिविरहात् । किञ्च -

**आब्रह्मस्तम्बपर्यन्तमहमेवेति निश्चयी ।**
**निर्विकल्पः शुचिः शान्तः प्राप्ताप्राप्तविनिर्वृतः ॥७॥**
**नानाश्चर्यमिदं विश्वं न किञ्चिदिति निश्चयी ।**
**निर्वासनः स्फूर्तिमात्रो न किञ्चिदिव शाम्यति ॥८॥**

**( युग्मम् )**

**( इति ज्ञानाष्टकम् । )**

पूर्वोदितानुसारेण सुगमम् । एतदुपदेशेनोपशमनाभिमुखभावमभियातत्वेन निवृत्त्येकनिलीनान्तरनयन उवाच जनकः -

**[ गुरुणोदीरितं ज्ञानं न किञ्चिदिव शाम्यति ।**
**तत्स्वस्मिन्नप्यभिज्ञातुं शिष्यो वदति साम्प्रतम् ॥ ]**

## प्रकरण-१२

**कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः ।**
**अथ चिन्तासहस्तस्मादेवमेवाहमास्थितः ॥१॥**

**कायेत्यादि** । कायादिप्रवृत्तिपरिणामप्रेक्षणप्रोद्भूतपरिनिर्वेदेन तदसहिष्णुरित्यर्थः । **तस्मादेवमेव** - त्रिधापि प्रवृत्तिनिवृत्तः, **अहमास्थितः** - सर्वोपसंहारेण सर्वात्मनात्मनि प्रतिपन्नप्रतिष्ठः । किञ्च -

**प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः ।**
**विक्षेपैकाग्रहृदय एवमेवाहमास्थितः ॥२॥**

**शब्दादेरिन्द्रियगोचरस्य** सम्बन्धिनः प्रीतेरभावेन, एतच्च विषवद्विषयत्यागोपदेशश्रवणेनावगन्तव्यम् (अष्टावक्रगीतायाम् १-२) । इतश्च शब्दादिसम्बन्धिप्रीत्यभावः, जडत्वात्तेषाम्, प्रसादनार्थत्वात्प्रीणनस्य जडं प्रति तस्य क्रियमाणत्व औचित्यायोगात्, अत एव तत्राप्रीतेरप्यभाव इत्यपि बोध्यम् ।

स्यादेतत्, आत्मा तु न जडः, अपि तु चेतनः, अतस्तं प्रति प्रीतिरप्रीतिश्चास्तु, न्यायानपेतत्वादिति चेत् ? अत्राह - **आत्मनश्चादृश्यत्वेन** तं प्रत्यपि तदभाव एव न्याय्यः, अन्यथोन्मत्तचेष्टितप्रसक्तेः ।

अतो **विगतः क्षेपः** - निन्दा, रागादिमदेतदित्यात्मकापवाद इति यावत्, यस्मात्तद् **विक्षेपम्**, **एक**मेवा**ग्रम्** -

उपयोगालम्बनं शुद्धात्मलक्षणं यस्य तत् - **एकाग्रम्**, विक्षेपं चैकाग्रं च हृदयं यस्य स **विक्षेपैकाग्रहृदयः**, सोऽ**हमेवमेव** - रोषाद्यभावेन माध्यस्थ्यं यथा स्यात्तथैव, **आस्थितः** - शुद्धात्मानं प्रतिपन्नः, उक्तं च - अचेतनमिदं दृश्यमदृश्यं चेतनं ततः । क्व रुष्यामि ? क्व तुष्यामि ? मध्यस्थोऽहं भवाम्यतः - इति (समाधितन्त्रे ४६) ।

ननु च तथापि न सर्वथा माध्यस्थ्यं न्यायोपपन्नम्, समाधिप्रभृतिसदनुष्ठानादरस्यावश्यकत्वादिति चेत् ? अत्रोत्तरयति -

**समाध्यासादिविक्षिप्तौ व्यवहारः समाधये ।**
**एवं विलोक्य नियममेवमेवाहमास्थितः ॥३॥**

**सम्** - अनन्यमनस्कतया, **आ** - समन्तात् **अध्यासः** - विषयगोचराप्रीत्यादिसंवेदनम् - **समाध्यासः**, स आदिर्यस्याऽऽध्यासादेः स **समाध्यासादिः**, तल्लक्षणायां **विक्षिप्तौ** सत्यामेव **समाधये** - समाधिसाधनार्थं **व्यवहारः** आसनप्राणायामाद्यनुष्ठानं क्रियते, **एवं नियमम्** - आपेक्षिकमावश्यकत्वं **विलोक्याहमेवमेव** - अविकारावस्थ एव, **आस्थितः** - औदासीन्यमङ्गीकृतवान्, तथा चोक्तम् - विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम । विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः - इति (अवधूतोपनिषदि २३) ।

इतश्चासनाद्यावश्यकताविरहः, निश्चयतस्तत्सद्भावात्, यथाभिहितम् - सर्ववस्तुन्युदासीनभावमासनमुत्तमम् ॥ जगत्सर्वमिदं मिथ्या - प्रतीतिः प्राणसंयमः । चित्तस्यान्तर्मुखीभावः, प्रत्याहारस्तु सत्तम ! ॥ चित्तस्य निश्चलीभावे धारणा धारणं विदुः । सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ॥ ध्यानस्य विस्मृतिः सम्यक् समाधिरभिधीयते - इति (त्रिशिखिब्राह्मणोपनिषदि २/२९-३२) । इत्थञ्च -

**हेयोपादेयविरहादेवं हर्षविषादयोः ।**
**अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः ॥४॥**

**हेयस्य** विक्षेपादे**रुपादेयस्य** च समाध्यादे**र्विरहात्, एवं हर्षविषादयोरप्यभावात्**, हेयादिबुद्धेरेव तन्मूलत्वान्मूलं नास्ति कुतः शाखेतिन्यायान्नास्य हर्षादिर्भवति । अतो **हे ब्रह्मन्** ! - हे ब्रह्मस्वरूपाष्टावक्रमुनिवर !, **एवमेव** - स्थिरबुद्धित्वेनैव, **अहमास्थितः**-ब्रह्मस्वरूपे मयि प्राप्तप्रतिष्ठः । इदमपि मन्माध्यस्थ्यालम्बनमित्याह -

**आश्रमानाश्रमं ध्यानं चित्तस्वीकृतवर्जनम् ।**
**विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः ॥५॥**

**आश्रमानाश्रमम्** - मयाऽऽश्रमे वस्तव्यमन्यथा वेत्याकारकचिन्तनम्, **ध्यानम्**-ध्यानविषयादिविमर्शः, एतच्च पदैकदेशे पदसमुदायोपचारात्तदुपयोगपरिणत्या तत्त्वविवक्षणाद्वा

द्रष्टव्यम् । तथाऽमुकं मम **चित्तेन स्वीकृतम्** - कर्तव्यादित्वेनाङ्गीकृतम्, अमुकस्य तु मया **वर्जनं** कृतम्, अत्रापि व्यपदेशबीजं प्राग्वत् । **एतैः** - अनन्तरोक्तैराश्रमादिनिवासादिकाध्यवसायैर्**मम विकल्पं वीक्ष्य** - अन्तर्जल्पप्रयुक्तं सूक्ष्ममपि चित्तक्षोभमालोच्य, **एवमेव** - तस्यापि परिहारपूर्वकमेव, **अहमास्थितः** - परम्पदं प्रतिपन्नवान्, विकल्पविसरस्यैव दुःखमूलत्वेन तन्नाशे परिशेषन्यायात् परमपदसिद्धेः, उक्तं च - यदन्तर्जल्पसम्पृक्तमुत्प्रेक्षाजालमात्मनः । मूलं दुःखस्य तन्नाशे शिष्टमिष्टं परं पदम् - इति (समाधितन्त्रे ८५) । एतेन बहिर्जल्पस्य तु नितरां निषेधो द्रष्टव्यः । तदाह - परब्रह्मण्यनुष्ठाननिरतानां मनीषिणाम् । अन्तरैरप्यलं जल्पैर्बहिर्जल्पैश्च किम्पुनः ? - इति (नियमसारवृत्तौ ८५) । तदेवं मनोवाग्विषयं कर्तव्यमुपदिश्य परिशिष्टं कायगोचरं तदाह -

**कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा ।**
**बुद्ध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः ॥६॥**

**यथैव कर्मानुष्ठानमज्ञानाद्** भवति, स्वकर्तृत्वमतेस्तद्योनित्वात्, तस्याश्च मिथ्यात्वेन प्रागुपपादितत्वात् (दृश्यतामष्टावक्रगीतायाम् ११तमं प्रकरणम्) । **तथा** कर्मानुष्ठान**स्योपरमो**ऽप्यज्ञानादेव भवति, उपरममतेरेव प्राक्कालीनकर्तृत्वमतेराक्षेपकत्वात्, तदविनाभावित्वाच्च । **तदिदं तत्त्वं सम्यग्**

**बुद्ध्वा**-आरम्भानारम्भोभयोरप्यज्ञानानतिशयितामवगम्य, **एवमेव** - पञ्चभूतात्मककायव्यापारं विलोकयन्नेव, **अहमास्थितः** - साक्षितामात्रं समालम्ब्य बद्धस्थितिः ।

अथाऽस्तु सर्वयोगोपसंहारः, परमात्मचिन्तनं त्वत्याज्यमेव, तस्यैव तत्समापत्तिनिदानत्वादिति चेत् ? सत्यम्, तथापि दशाविशेषे तदेव तद्बाधकमपि भवति, एतदेवावगमयन्नाह -

**अचिन्त्यं चिन्त्यमानोऽपि चिन्तारूपं भजत्यसौ ।**
**त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः ॥७॥**

**अचिन्त्यम्** - सव्वे सरा नियट्टंति, तक्का जत्थ न विज्जइ, मइ तत्थ न गाहिया (आचाराङ्गे १-५-६) - इत्यागमोदितस्वरूपम्, **चिन्त्यमानोऽपि** - उपयोगगोचरीकुर्वाणोऽपि, **असौ** - चिन्तकः, **चिन्तारूपम्** - विकल्पविग्रहम्, **भजति** - प्रतिपद्यते । परमात्मा तु निर्विकल्प इति तत्तापत्तौ तथाविधानां तद्विकल्पोऽपि बाधक एव, सौधावाप्तिसाधकस्यापि तुरगारोहणस्य चन्द्रशालाप्राप्तिबाधकत्ववत् । **तस्माद् तद्भावनम्** - अचिन्त्यचिन्तनमपि **त्यक्त्वा एवमेव** - सर्वसङ्कल्पशून्यतयैव, **अहमास्थितः** - निश्चयसमाधिना पारम्यं प्रपन्नः, यथोक्तम् - यत् समत्वं तयोरत्र जीवात्मपरमात्मनोः । समस्तनष्टसङ्कल्पः समाधिरभिधीयते - इति (सौभाग्यलक्ष्म्युपनिषदि १४-१८) । पर्यवसितमाह -

**एकमेव कृतं येन स कृतार्थो भवेदसौ ।**
**एवमेव स्वभावो यः स कृतार्थो भवेदसौ ॥८॥**

**एकमेव** - प्रस्तुताध्ययनोदितमास्थिततत्वमेव **येन कृतम्, सोऽसौ कृतार्थः** - साधितसिषाधयिषित - प्रयोजनो **भवेत्,** अत्रावधारणेनान्यबहुकृतिषु कृतास्वपि कृतार्थताविरह आवेदितः, मोक्षस्य सर्वोपरमः (मूलम्) - इति वचनात् । **एवमेव स्वभावः** - आस्थित्यात्मकः, शिष्टमुक्तार्थम् । एतेन योगत्रय-विनिवृत्तिनिर्मितं सुखमभिधायाधुनाऽकिञ्चनत्वादिभवं तदाह-

**[ एवमेवेत्यवस्थायाः फलीभूतां सुखस्थितिम् ।**
**प्राह शिष्यः स्फुटीकर्तुमहमासे यथासुखम् ॥]**

## प्रकरण-१३

**अकिञ्चनभवं स्वास्थ्यं कौपीनत्वेऽपि दुर्लभम् ।**
**त्यागादाने विहायास्मादहमासे यथासुखम् ॥१॥**

**अकिञ्चने**त्यादि कण्ठ्यम् । ननु चार्थात् कौपीनस्यापि त्यागमुपादेयतयोक्त्वा त्यागविहानोक्तिर्व्याहतेति चेत् ? न, त्यागस्यापि सकिञ्चनमतिमूलत्वात्, तामन्तरेण तदसम्भवात्, करणोपरमस्य कर्तृत्वाभिमानमूलकत्ववत्, अतो निश्चयनयेन त्यागादानमतिविरह एवाकिञ्चनत्वसामग्र्यं सम्भवति । तथापि कौपीनत्यागतात्पर्यकपूर्वार्धस्यासङ्गतिर्दुर्निवारा स्यात्, न च तद् व्यवहारनयाभिप्रायेण समाधेयमिति वाच्यम्, इत्थं वृत्तबन्धौचित्यायोगात्, उत्तरार्धस्थ-**अस्मात्** - पदाक्षिप्तैकवाक्यताया अनुपपत्तेश्च । न चार्षत्वात्क्षम्यमेतदिति वाच्यम्, एतद्वाक्योच्चारस्य वृत्तिकृतोऽक्षम्यापराधरूपत्वात्, ग्रन्थकृद्गभीराभिप्रायान्वेषणस्यैव तत्कर्तव्यत्वात्, तदन्वेषणवैफल्यसंवरणाय मूलकृत एवात्र क्षतिरित्यभिधानस्यातिदुष्टत्वाच्च । अतो व्याख्यैवेयं विसंस्थुलेति स्थितम् ।

अत्रोच्यते । पूर्वार्धमपि निश्चयनयेनापि समाधीयत एव । तथाहि यस्य 'किल ममेदं कौपीनम्' इत्येतदाकारोऽपि ममकारो विद्यते, तस्याकिञ्चनभवं स्वास्थ्यं दुर्लभमेव, ममकारस्यैव परिग्रहरूपत्वात्, तद्भावेऽकिञ्चनत्वासम्भवात्, तथा च पारमर्षम्

- मुच्छा परिग्गहो वुत्तो-इति (दशवैकालिके ६ - २१) । अत एव त्यागादानविहानलक्षणवक्ष्यमाणग्रन्थोऽप्युपपद्यते, अन्यथा तूभयथाऽपि तदनुपपत्तिरेव स्यात्, दिगम्बरस्यापि देहमूर्च्छासद्भावेऽकिञ्चनत्वाभावात्, अत एवोक्तम् - मूर्च्छाछन्नधियां सर्वं जगदेव परिग्रहः । मूर्च्छया रहितानां तु जगदेवापरिग्रहः-इति (ज्ञानसारे २५-८) । सुखोपायान्तरमाह -

**कुत्रापि खेदः कायस्य जिह्वा कुत्रापि खिद्यते ।**
**मनः कुत्रापि तत्त्यक्त्वा पुरुषार्थे स्थितः सुखम् ॥२॥**

सुगमम् । नवरं **पुरुषार्थे** इति सर्वोपरमसाध्ये मोक्षलक्षण-प्रयोजन इत्यर्थः । ननु सिद्धिगतिप्राप्तेः प्राक्तनकाले संसार-वर्त्तित्वेन विविधव्यवहारोऽकामेनापि करणीय इत्यशक्य एव सर्वोपरम इति चेत् ? सत्यम्, तथाप्यत्र निश्चयनयाधिकारेण भावोपरमस्य विवक्षितत्वाददोषः, एतदेव स्फुटयति -

**कृतं किमपि नैव स्यादिति सञ्चिन्त्य तत्त्वतः ।**
**यदा यत्कर्तुमायाति तत्कृत्वाऽऽसे यथासुखम् ॥३॥**

**कृत**मित्यादि । कर्तृत्वाभिमानविरहे कृतत्वादिबुद्धेरप्य-भावस्यावश्यकत्वात्, तत्सापेक्षत्वात्तस्याः । व्यवहारस्तु यथाऽस्योपपद्यते तथाऽऽह - **यदा** - अवसरविशेषे, **यत्** - प्राप्तकालं कर्तव्यं **कर्तुमायाति, तत् कृत्वा** - अकर्तृस्वस्व-रूपानुसन्धानसहितमेव विधाय, **यथासुखमासे** - तत्त्व-

संवेदनानुभावेनाक्रियाप्रतिबद्धसुखेनावियुक्त एव वर्त्ते, उक्तं च- नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् । पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् - इति (भगवद्गीतायाम् ५-८) । ननु कथमेतत् सम्भवति यत्कर्तृत्वेऽप्यकर्तृतेति चेत् ? शुद्धोपयोगानुभावेन साक्षितामात्रानुसन्धानानपायादिति गृहाण, यदाह-आत्मशुद्धोपयोगेन साक्षीभूतो मनस्यपि । अक्रियः सर्वकर्ताऽपि मुक्तः स बन्धनेष्वपि - इति (अध्यात्मगीतायाम् ७८) । ततश्चोचानोऽप्यसौ मौनी, प्रस्थितोऽपि स्थितः, दृष्टाऽप्यदृष्टैवेति न किञ्चिदनुपपन्नम्, तदुक्तम् - ब्रुवन्नपि हि न ब्रूते, गच्छन्नपि न गच्छति । स्थिरीकृतात्मतत्त्वस्तु पश्यन्नपि न पश्यति - इति (इष्टोपदेशे ४१) । एतदेव व्यतिरेकतो व्याचष्टे -

**कर्मनैष्कर्म्यनिर्बन्धभावा देहस्थयोगिनः ।**
**संयोगायोगविरहादहमासे यथासुखम् ॥४॥**

**कर्म**योग एव तत्त्वम्, **नैष्कर्म्या**ख्यज्ञानयोग एव तत्त्वमेवंलक्षणाः, यद्वा प्रवृत्तिरेव श्रेयसी निवृत्तिरेव वेत्येवंरूपा **निर्बन्धभावाः** - आग्रहाः, देहं विषयीकृत्य तिष्ठतीति **देहस्थः** - शरीरमेवाहमित्याकारकः शरीरात्माभिमानः, तस्य **योगः** - तदुपयुक्तता, सोऽस्त्यस्येति **देहस्थयोगी**, तस्य भवन्ति, क्रियायाः शरीराश्रयत्वात्, यथोक्तम् - कर्ता बहिरकर्ताऽन्तः - इति (योगवाशिष्ठे) । अतो ममात्मस्थयोगिनस्तु क्रियायाः

**संयोगस्यायोगस्य च विरहादहं यथासुखम्** - औदासीन्यानन्दानुवृत्त्याबाधया, **आसे** - पुष्करपलाशवदलिप्त एव वर्त्ते, उक्तं च - कर्मनैष्कर्म्यवैषम्यमुदासीनो विभावयन् । ज्ञानी न लिप्यते भोगैः, पद्मपत्रमिवाम्भसा - इति (अध्यात्मसारे १५-३५) । इतश्च ममोक्तनिर्बन्धाभाव इत्याह-

**अर्थानर्थौ न मे स्थित्या गत्या न शयने न वा ।**
**तिष्ठत् गच्छन् स्वपंस्तस्मादहमासे यथासुखम् ॥५॥**

**अर्थः** - प्रयोजनम्, **अनर्थः** - अप्रयोजनम्, तौ **मे स्थित्यादिभिर्न** स्तः, तैः कृतैरकृतैश्च मदुपकाराद्यभावात्, उक्तं च-नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन - इति (अध्यात्मसारे १५-९) । सत्यामपि प्रवृत्तौ सर्वथा प्रवृत्तिप्रच्युतत्वेनौदासीन्यसमासीनस्योपपद्यत एवार्थादिविरहः, उक्तं च - रूपं कान्तं पश्यन्नपि शृण्वन्नपि गिरं कलमनोज्ञाम् । जिघ्रन्नपि च सुगन्धीन्यपि भुञ्जानो रसान् स्वादून् ॥ भावान् स्पृशन्नपि मृदूनवारयन्नपि चेतसो वृत्तिम् । परिकलितौदासीन्यः प्रणष्टविषयभ्रमो नित्यम् ॥ बहिरन्तश्च समन्तात् चिन्ताचेष्टापरिच्युतो योगी - इति (योगशास्त्रे १२/२३-२५) । स्थित्यादिभिरुपकाराभावमेव साक्षादाचष्टे -

**स्वपतो नास्ति मे हानिः सिद्धिर्यत्नवतो न वा ।**
**नाशोल्लासौ विहायास्मादहमासे यथासुखम् ॥६॥**

सुगमम्, नवरं नाश इति चित्तनाशो विषाद इति यावत्। किञ्च -

**सुखादिरूपानियमां भावेष्वालोक्य भूरिशः ।**
**शुभाशुभे विहायास्मादहमासे यथासुखम् ॥७॥**

**(इति यथासुखसप्तकम् ॥)**

अयं भावः-सुखहेतुत्वेन सुखरूप एव, स तु दुःख-हेतुतया दुःखरूप एवेत्येतदाकारो नियमो भावेषु न वर्तते, अत एतां **सुखादिरूपानियमां** वृत्तिं **भावेषु भूरिश आलोक्य** - तत्त्वज्ञानचक्षुषा साक्षात्कृत्य, इदं **शुभम्** - सुन्दरं वस्तु, अदस्त्व**शुभम्** - अशोभनमित्येवंविधे **शुभाशुभे** संवेदने **विहाय, अस्मात्** - उक्तानियमालोकनात्, **अहं यथासुखम्** - इष्टानिष्टपरिहारप्रादुर्भूतसमतासुखसागरोन्मज्जनमन्तरेण, **आसे** - रागादिविरहितावस्थामुपभुञ्जे ।

ननूक्तानियम एवास्माकं विप्रतिपत्तिः, मनोज्ञाहारादेरिष्ट-त्वस्येतरस्यानिष्टत्वस्य चानुभवसिद्धत्वेन सुखादिरूपनियमस्य दुरपह्नवत्वादिति चेत् ? न, इष्टत्वादेरेवानियमितत्वात्, कालाद्यधीनपरावर्तनत्वात्, कल्पनामात्रत्वात्, पुरुषान्तराभिप्रायतो विपर्यस्तत्वाच्च, तदिदमुदितम् - न हि सोऽस्तीन्द्रियविषयो येनाभ्यस्तेन नित्यतृषितानि । तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्ग-प्रलीनानि ॥ कश्चिच्छुभोऽपि विषयः परिणामवशात्पुनर्भव-त्यशुभः । कश्चिदशुभोऽपि भूत्वा कालेन पुनः शुभीभवति ॥

कारणवशेन यद्यत् प्रयोजनं जायते यथा यत्र । तेन तथा तं विषयं शुभमशुभं वा प्रकल्पयति ॥ अन्येषां यो विषयः स्वाभिप्रायेण भवन्ति तुष्टिकरः । स्वमतिविकल्पाभिरतास्तमेव भूयो द्विषन्त्यन्ये ॥ तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य। निश्चयतोऽस्यानिष्टं न विद्यते किञ्चिदिष्टं वा-इति (प्रशमरतौ ४८-५२) । ननु तथापि यत्काले यत्कल्पनया यं प्रत्यमुकं वस्तु शुभम्, तत्तु तत्कालाद्यपेक्षया शुभमेवेति कथं तन्नियमविरह इति चेत् ? न, तस्यापि काल्पनिकत्वानतिक्रमाद्वस्तुस्वरूप-चिन्तायां तादृशशुभत्वस्यानधिकृतत्वात् । ननु भवतु तच्छुभत्वं काल्पनिकम्, तथापि यदि तेन सुखपरिस्पन्दस्तदा को दोष इति चेत् ? रागादिप्रयुक्तकर्मबन्धाख्य इति गृहाण, तदुक्तम्- रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य। नान्यः स्वल्पोऽपि गुणोऽस्ति यः परत्रेह च श्रेयान् ॥ यस्मिन्निन्द्रियविषये शुभमशुभं वा निवेशयति भावम् । रक्तो वा द्विष्टो वा स बन्धहेतुर्भवति तस्य ॥ स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् । रागद्वेषक्लिन्नस्य कर्मबन्धो भवत्येवम्-इति (प्रशमरतौ ५३-५५) ।

अनन्तरप्रकरणप्रतिपादितं यथासुखमासनमेव प्रकारान्तरेण प्रस्तौति -

**[ उदीरितां सुखावस्थां समर्थयितुमात्मनि ।**
**प्राह शिष्यः समावस्थां चतुःश्लोक्या गुरुं प्रति ॥ ]**

## प्रकरण-१४

**प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः ।**
**निद्रितो बोधित इव क्षीणसंसरणो हि सः ॥१॥**

**यः** - समतासमाहितात्मा, **प्रकृत्या** - निसर्गेणैव, **शून्यचित्तः** - उक्तनीत्या शुभत्वादिविकल्पवर्जितान्तःकरणः । ननु सर्वथा तादृशत्वे मुक्त एवासौ भवितुमर्हतीत्यारेकायामाह- **प्रमादाद् भावः** - शब्दादिविषयः संसारो वा, तस्य **भावना** - तद्गोचरो विकल्पो यस्य सः- **भावभावनः** । अयमाशयः, निसर्गतस्तु तन्मनो विषयविकल्पविरहितमेव, तथापि भवस्थतया कदाचिदनाभोगादेरेव क्षणप्रभावदस्योत्तिष्ठति विषयभावनोपशाम्यति च । एतावदेव तस्य मुक्तस्य चान्तरम्, अन्यदा शून्यचित्तत्वस्योभयत्र तुल्यत्वात्, तावन्मात्रविकल्पोऽपि तस्यानुतापानुहततया निरनुबन्ध इति न तेन शून्यचित्तत्वव्याहतिः, उक्तं च-गत्वाऽन्यत्रानुतप्यते-इति (इष्टोपदेशे ४०) । तमेव विशेषयति-**बोधित इव निद्रितः**- निद्रायामपि जाग्रद्दशावच्छिन्नपरिणामप्रतियोगिकभेदाभाववानेव, यद्वा स्वभावजागृतिप्रयुक्तपरभावशयनशालीत्यर्थः, यतो ह्यसौ स्वभावबोधितः, अत एव परभावनिद्रित इत्याशयः ।

नन्वेतदर्थपक्ष इवार्थानुपपत्तिः, पञ्चम्या एव घट्यमानत्वादिति चेत् ? न, अभिप्रायापरिज्ञानात्, शुद्धनयेन ह्यात्मा

बोधयितुमेव न शक्यते, निद्राणं प्रत्येव बोधनाभियोगदर्शनात्, आत्मनि निद्राया एवाभावाच्च, अतो मुख्यवृत्त्या बोधितत्वं न घटामटाट्यते, नित्यजागृतत्वात्, अत इवपदेनोपचाराश्रयणं कृतमिति न कश्चिद्दोषः । तदिदमाह-जाग्रत्यात्मनि ते नित्यं बहिर्भावेषु शेरते । उदासते परद्रव्ये लीयन्ते स्वगुणामृते - इति (परमज्योतिःपञ्चविंशतिकायाम्-१६) तथा च पारमर्षम्- सुत्ता अमुणी सया मुणिणो जागरंति - इति (आचाराङ्गे १-३-१/१०५) **स हि** - उक्तलक्षणत्रितयसमन्वयास्पदमेव, **क्षीणसंसरणः** - सततमप्यपनीयमानभवभावनतया रिक्तप्राय-संसारः ।

उक्तमपनयनप्रकारमेव प्रस्तौति -

**क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः ।**
**क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा ॥२॥**

सुगमम् । नवरं दसन्ति उपक्षण्वन्त्यात्मशरीरमिति **दस्यवः**। स्पृहाविरहे धनादिगोचरविकल्पगन्धोऽपि मे नेति हृदयम् । ननु मा भूद्धनादिस्पृहा, शास्त्रादिस्पृहा तु स्पृहाविष-वल्लीकृपाणीकल्पतयोपादेयैवेति चेत् ? सत्यम्, तथापि प्रकृते तु तृष्णाविरहदशाया एवाधिकृतत्वेन शास्त्रसिषाधयिषितस्य सिद्धत्वात्तत्प्रयोजनाभावो बोध्यः, उक्तं च - अमृतेन तृप्तस्य पयसा किं प्रयोजनम् ? एवं स्वात्मानं ज्ञात्वा वेदैः प्रयोजनं

किं भवति ? - इति (पैङ्गलोपनिषदि ४-९) । ननु तथापि विज्ञानस्यात्मपर्यायरूपत्वेनावर्जनीयतैवेति चेत् ? सत्यम्, तथाप्यत्र **विज्ञान**मिति विविधशास्त्राणि, फले हेतूपचारात्, स्पृहाव्यतिरेके हि स्वरूपानुसन्धानमात्रमेव कर्तव्यतयाऽवशिष्यते, इतरयत्नस्य व्यर्थत्वात्, तदुक्तम्-स्वरूपानुसन्धानव्यतिरिक्ता-न्यशास्त्राभ्यास उष्ट्रकुङ्कुमभारवद् व्यर्थः, न योगशास्त्रप्रवृत्तिः न साङ्ख्यशास्त्राभ्यासः, न मन्त्रतन्त्रव्यापारः, नेतरशास्त्र-प्रवृत्तिर्यतेरस्ति - इति (संन्यासोपनिषदि १-५९) । आस्तां शास्त्रादिवार्त्ता, न मोक्षगोचरोऽपि विकल्पो मां गोचरीकुरुत इत्याह -

**विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे ।**
**नैराश्ये बन्धमोक्षे च न चिन्ता मुक्तये मम ॥३॥**

स्पष्टम्, नवरं **साक्षिपुरुष** इति स्वात्मविशेषणम् । ननु च चिन्त्योऽयं मुक्तिचिन्ताविरह इति चेत् ? न, इत्थमेव मुक्तियोग्यतासामग्र्ययोगात्, तावन्मात्रस्पृहायामपि सत्यां परिपूर्णनैराश्यव्याहतेः, अत एवोक्तम् - मोक्षे भवे च सर्वत्र निःस्पृहोऽयं सदाशयः । प्रकृत्यभ्यासयोगेन तथाशुद्धेर्नियोगतः -इति । अन्यत्रापि-भवमोक्खापडिबद्धो-इति (योगशतके २०)।

ननु किमप्यस्मादृशामगम्यमेतत्तत्त्वमिति चेत् ? ओमित्य-भिप्रायेणात्राह -

**अन्तर्विकल्पशून्यस्य बहिः स्वच्छन्दचारिणः ।**
**भ्रान्तस्येव दशास्तास्तास्तादृशा एव जानते ॥४॥**

(इति शान्तिचतुष्कम् ।)

**अन्तः** - मनसि, **विकल्पशून्यस्य** - इदं कुर्व इदं तु नेत्यादिविमर्शविमुक्तस्य, **बहिस्तु** कायचेष्टापेक्षया, स्वच्छन्दा इव चरन्तीति **स्वच्छन्दचारिणः**, अयम्भावः, वस्तुतस्तु विकल्पशून्यतानुभावेन तेषां छन्दस्यैवाभावः, किन्तु प्रकृत्या यदा यत्कर्तव्यमुपतिष्ठते, तदलिप्तभावेन कुर्वते, तदपि लोकानुवर्तनाद्यन्तरेणैव, लोकैषणाविरहात्, अतस्ते स्वच्छन्द-चारिण इव प्रतिभासन्ते । अत एव **भ्रान्तस्येव तास्ता दशाः**, वस्तुतोऽभ्रान्तस्याप्ययं नूनं भ्रान्त इतिप्रतीतिसवित्री-तत्तत्प्रवृत्तिविशिष्टा अवस्थितयः, **तादृशा एव**- उक्तावस्थित्य-वस्थिता एव, **जानते** - परमार्थतः प्रतीतिपथविषयीविदधते, मादृशानामस्य प्रयासस्य वचनजालमात्रत्वेन वस्तुतो तद्विषय-कत्वविरहादिति भावः । तास्ता दशा एव तेषामुक्ता अन्यत्र प्रकारान्तरेण-अनुन्मत्ता उन्मत्तवदाचरन्ति - इति (आश्रमो-पनिषदि), बुधो बालकवत् क्रीडेत्, कुशलो जडवच्चरेत् । वदेदुन्मत्तवद् विद्वान् गोचर्यां नैगमश्चरेत् - इति (नारद-परिव्राजकोपनिषदि) । अन्यत्र तु स्वशक्तिगुप्तिप्रयुक्तसन्माना-दिपरिहाराय भ्रान्तचरणमुपदिष्टम्, यदुक्तम् - यथा मूढो यथा

मूर्खो यथा बधिर एव वा । तथा वर्तेत लोकस्य स्वसामर्थ्यस्य गुप्तये - इति (योगतत्त्वोपनिषदि ७७), तत्रोपेत्य तादृक्प्रवृत्तिः, प्रकृते तु प्रकृत्या सेति विशेषः ।

नाहमुपादेयदशा जान इत्यनुशयमुपयातं जनकं बोधयन्नाहाष्टावक्रः -

**[ दुर्लक्ष्यमात्मनस्तत्त्वं प्रबोधयितुमञ्जसा ।**
**मुहुस्तत्त्वोपदेशार्थं गुरुराह दयोदधिः ॥ ]**

## प्रकरण-१५

**यथातथोपदेशेन कृतार्थः सत्त्वबुद्धिमान् ।**
**आजीवमपि जिज्ञासुः परस्तत्र विमुह्यति ॥१॥**

**सत्त्वबुद्धिमान्** - सिषाधयिषितसाधनशक्तिसदुपाय-सञ्ज्ञानशाली, **यथातथोपदेशेन** - सङ्क्षिप्तत्वादिविशिष्टत्वे-नाप्रत्यलत्वेन प्रतिभासमानेनापि प्रतिपादनेन **कृतार्थः** - महत्त्वादिविशिष्टोपदेशसाध्यसाधको भवति, चिलातिपुत्रवत्, स ह्युपशमविवेकसंवरलक्षणपदत्रितयश्रुतेरेव कृतकृत्यो बभूवेति । **परः** - सत्त्वबुद्धिविकलः, स तु **तत्र**- साध्यसाधने, **आजी-वमपि जिज्ञासुः**- मरणपर्यन्तमप्यविनिवृत्तजिज्ञासः, एतद्विशेषणं तस्य बोधानवाप्तेराक्षेपकम्, अत एव **विमुह्यति** - किङ्कर्तव्यविमूढो भवति, अतः सत्त्वादिमवलम्ब्याल्पेनाऽप्य-वबोद्धव्यं साध्यसाधने यतितव्यं चेत्याशयः ।

सारभूतमल्पमुपदेशमेवोपदेष्टि -

**मोक्षो विषयवैरस्यं बन्धो वैषयिको रसः ।**
**एतावदेव विज्ञानं यथेच्छसि तथा कुरु ॥२॥**

विषयवैरस्यादेरेव मोक्षादिहेतुत्वादिति भावः । सारभूततामेवास्य स्पष्टयति -

**वाग्मिप्राज्ञमहोद्योगं जनं मूकजडालसम् ।**
**करोति तत्त्वबोधोऽयमतस्त्यक्तो बुभुक्षुभिः ॥३॥**

किल भोगाभिलाषिणां तत्त्वमार्गे मूकत्वाद्येवेष्टं भवतीति तद्विहिततत्त्याग उपपन्न एव, शिष्टं स्पष्टम् । किञ्च -

**न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान् ।**
**चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखं चर ॥४॥**

उक्तार्थम् । कायव्यतिरेकं व्याख्याय मनोव्यतिरेकमपि व्यनक्ति -

**रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन ।**
**निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर ॥५॥**

इत्थमेव समाधिसिद्धेः, तदाह-निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः । वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञान-सञ्ज्ञकः - इति (अपरोक्षानुभूतौ १२४) । सुखविचारस्यैवो-पायान्तरमुपदर्शयति-

**सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।**
**विज्ञाय निरहङ्कारो निर्ममस्त्वं सुखी भव ॥६॥**

अभिहितव्याख्यम्, उक्तं चान्यत्रापि-सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम् - इति (कपिलदेवहूतिसंवादे ४-४२) । परापेक्षया स्वोत्कृष्ट-त्वदृशः परस्माच्च स्वभेदावलोकनस्याहङ्कारममकारहेतुत्वेन उक्तविज्ञानस्य सुखोपायत्वं सिद्धमेव, अहन्ताद्यात्मकमोह-मथनस्यैव दुःखविदारणहेतुत्वात्, तथा चार्षम् - दुक्खं हयं

जस्स न होइ मोहो - इति (उत्तराध्ययने ३२-८) । उक्तमेव प्रकारान्तरेण प्रतिपादयन्नाह -

**विश्वं स्फुरति यत्रेदं तरङ्गा इव सागरे ।**
**तत्त्वमेव न सन्देहश्चिन्मूर्त्ते ! विज्वरो भव ॥७॥**

उक्तार्थम्, नवरं **विज्वर** इत्यहङ्कारादिजनितसन्तापविमुक्तः । प्रोक्तमेव प्रावधारयति -

**श्रद्धत्स्व तात ! श्रद्धत्स्व नात्र मोहं कुरुष्व भोः ।**
**ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः ॥८॥**

**अत्र** - सागरतरङ्गनीत्या स्वविश्वाभेदे, **प्रकृतेः परः** - ज्ञानावरणीयादिपर्यायपरिणतकार्मणपुद्गलद्रव्यतस्तदापादितविकारतश्चात्यन्तभिन्नः, शेषं सुगमम् । प्रकृतिविकारपरत्वमेवोपपादयति -

**गुणैः संवेष्टितो देहस्तिष्ठत्यायाति याति च ।**
**आत्मा न गन्ता नागन्ता किमेनमनुशोचसि ॥९॥**

**गुणैः** - सत्त्वादिभिः, कर्मराजसत्कनियन्त्रणरज्जूभिर्वा, **देहः संवेष्टितः**- दृढं नियन्त्रितः, अतः स **तिष्ठति** - कञ्चन कालं यावत्स्थितिं बध्नाति, **आयाति** - तत्तद्भवीयत्वविशिष्टतयोपभोगगोचरीभवति, **याति च** - शीर्यत इति शरीरमिति स्वान्वर्थतां चरितार्थयन् वियोगविषयीभवति ।

**आत्मा** तु **न गन्ता**, **नाप्यागन्ता**, तस्य स्वस्वरूपत्वेन

नित्यसन्निहिततया स्वावधिकगमनाद्यसम्भवात्, अतः **किमेनम्** - आत्मानं देहं वा, **अनुशोचसि** ? ध्रुवाध्रुवोभयानुशोचनस्य निरर्थकत्वादयुक्तमेव तदिति हृदयम् । एतदेव स्फुटयति -

**देहस्तिष्ठतु कल्पान्तं गच्छत्वद्यैव वा पुनः ।**
**क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः ।१०।**

यथा हि परशरीरस्थित्यादिप्रयुक्तत्वद्वृद्ध्यादिविरहः, तथा स्वकीयत्वेन सम्प्रधारितस्यापि शरीरस्य स्थित्यादिना तव वृद्ध्यादिविरह एव, परमार्थतस्तत्रापि परत्वस्य तुल्यत्वात्, विज्ञानैककायत्वात्तवेत्याशयः । प्रकारान्तरेण वृद्ध्यादिविरहं व्याचष्टे-

**त्वय्यनन्तमहाम्भोधौ विश्ववीचिः स्वभावतः ।**
**उदेतु वास्तमायातु न ते वृद्धिर्न वा क्षतिः ।।११।।**

उक्तप्रायम् । इत्थञ्च -

**तात ! चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत् ।**
**अतः कस्य कथं कुत्र हेयोपादेयकल्पना ।।१२।।**

व्याख्यातप्रायम् । तस्मात् -

**एकस्मिन्नव्यये शान्ते चिदाकाशेऽमले त्वयि ।**
**कुतो जन्म कुतः कर्म कुतोऽहङ्कार एव च ।।१३।।**

प्रयोजकोपाध्यभावादेतज् जन्मादि नैव सम्भवतीत्यभिप्रायः । किञ्च -

**यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे ।**
**किं पृथक् भासते स्वर्णात्कटकाङ्गदनूपुरम् ॥१४॥**

अतः -

**अयं सोऽहमयं नाहं विभागमिति सन्त्यज ।**
**सर्वमात्मेति निश्चित्य निःसङ्कल्पः सुखी भव ॥१५॥**

विभागविकल्परूपमोहस्यैव दुःखयोनित्वेन सौख्य-प्रतिबन्धकत्वादित्याशयः, उक्तं च - यस्मिन् सर्वभूतान्यात्मैवाभूद् विजानतः । तत्र को मोहः कः शोक एकत्व-मनुपश्यतः - इति (ईशावास्योपनिषदि ७) ।

ननु च कथं भिन्नत्वेन प्रतिभासमानस्यापि विश्वस्याप-लापः कर्तुं शक्यत इति चेत् ? अत्राह -

**तवैवाज्ञानतो विश्वं त्वमेकः परमार्थतः ।**
**त्वत्तोऽन्यो नास्ति संसारी नासंसारी च कश्चन ॥१६॥**

**तवाज्ञानत एव** - प्रागुक्तयुक्त्यलङ्कृतज्ञानाभावत एव, **विश्वं** प्रतिभासते । **परमार्थतस्तु त्वमेक** एव, यथा चैतत्तत्त्वं तथा प्राक् प्रमाणितमिति न पुनः प्रतन्यते । अतस्**त्वत्त** इत्यादि स्पष्टम् । एवञ्च -

**भ्रान्तिमात्रमिदं विश्वं न किञ्चिदितिनिश्चयः ।**
**निर्वासनः स्फूर्तिमात्रो न किञ्चिदिव शाम्यति ॥१७॥**

अशान्तिबीजाभावादित्याकूतम् । तस्मात्-

**एक एव भवाम्भोधावासीदस्ति भविष्यति ।**
**न ते बन्धोऽस्ति मोक्षो वा कृतकृत्यः सुखं चर ॥१८॥**

कृतकृत्य इव **कृतकृत्यः**, कृत्यस्यैव विरहान्मुख्यार्थासम्भवात्, आसीदितिपूर्वग्रन्थविरोधप्रसक्तेश्च । अतः -

**मा सङ्कल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय ! ।**
**उपशाम्य सुखं तिष्ठ स्वात्मन्यानन्दविग्रहे ॥१९॥**

सुगमम् । उक्तमेवावधार्योपसंहरति -

**त्यजैव ध्यानं सर्वत्र मा किञ्चिद्धृदि धारय ।**
**आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि?।२०।**
**( इति तत्त्वोपदेशविंशतिकं प्रकरणं पञ्चदशं समाप्तम् ।)**

सर्वथा कृतकृत्यस्य तव करणाकरणोभयोरपि मुक्तत्वाव्याहतेर्न करणविषयविकल्पोऽपि तव कल्पते, अत एव ध्यानस्पृहापि न न्याय्या, शून्याशयादपि परस्योत्तमाशयस्य विरहादित्याशयः, उक्तं च - समाधिमथ कर्माणि मा करोतु करोतु वा । हृदयेऽनात्तसर्वेहो मुक्त एवोत्तमाशयः - इति (रामगीतायाम् ६-४०) ।

ननु च मा कार्षं ध्यानादि, शास्त्रश्रवणादि त्वत्याज्यमेव, शासनत्राणलक्षणसाध्यसिद्ध्यै शास्त्रमन्तरेण साधनाभावादिति चेत् ? अत्राह -

**[ पृथक् सत्त्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनम् ।**
**तृष्णाद्यनर्थविच्छेदद्वारेणेत्यत्र वर्ण्यते ॥ ]**

## प्रकरण-१६

**आचक्ष्व शृणु वा तात ! नानाशास्त्राण्यनेकशः ।**
**तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥१॥**

**स्वास्थ्यमिति** सम्पूर्णतया स्वस्वरूपे स्थैर्यम् । शास्त्रोपयुक्तस्य तदतिक्रान्तविषयप्रकाशनासम्भवाद्दशाविशेषे तदनुपयोगात्मकविस्मरणमप्यावश्यकमित्याशयः । ननु च तदतिक्रान्तगोचरस्यैवासम्भवः, चक्षुः सर्वत्रगं शास्त्रं शास्त्रं सर्वार्थसाधनम् (योगबिन्दौ २२५) - इत्युक्तेरिति चेत् ? न, अस्या आपेक्षिकत्वात्, प्रज्ञापनीयभावानामनन्तभागस्यैव शास्त्रविषयीभूतत्वात्, उक्तं च - पण्णवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं । पण्णवणिज्जाणं पुण अणंतभागो सुयनिबद्धो-इति (निशीथभाष्ये ४८२३) । अतः परिशिष्टस्य सुराणामप्यनिर्वाच्यतया शास्त्रागोचरत्वं प्रत्येयम्, तदुक्तम् - अनिर्वाच्यं पदं वक्तुं न शक्यं तैः सुरैरपि । स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रकाश्यते - इति (योगतत्त्वोपनिषदि ७)

यदि तु सर्वमपि शास्त्रगम्यमेवेत्याऽऽग्रहः सेव्यते, तदा तदधिगममात्रत एव सिद्धिसिद्धेर्योगाभ्यासवैयर्थ्यप्रसङ्गः, उक्तं च - सिद्ध्याख्यपदसम्प्राप्तिहेतुभेदा न तत्त्वतः । शास्त्रादेवावगम्यन्ते, सर्वथैवेह योगिभिः ॥ सर्वथा तत्परिच्छेदात्साक्षात्कारित्वयोगतः । तत्सर्वज्ञत्वसंसिद्धेस्तदा सिद्धिपदाप्तितः

- इति (योगदृष्टिसमुच्चये ६, ७) । न चैवं शास्त्रमात्रनैरर्थ्यम्, प्रकृतशास्त्राभियोगोऽपि जलताडनवद्विफल इति वाच्यम्, दशाविशेषमधिकृत्यैवैतदभिधानात्, तद्दशाप्राप्त्यै च शास्त्रस्यावश्यकत्वादिति ।

सर्वविस्मरणमेव प्रकारान्तरत आह -

**भोगं कर्म समाधिं वा कुरु विज्ञ ! तथापि ते ।**
**चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति ॥२॥**

मुक्त्याशाया अपि दशाविशेषे हेयत्वाद्भोगादेस्तु कथैव केत्याकूतम् । नैराश्यस्यात्यन्तरोचनविषयता तु परमसुखरूपत्वात्, एतदपि प्रतिपक्षहानात्, उक्तं च - आशा हि परमं दुःखं, नैराश्यं परमं सुखम् - इति (भागवते ११-८-४४) । दुःखरूपत्वमेवाशायाः स्फुटयति -

**आयासात्सकलो दुःखी नैनं जानाति कश्चन ।**
**अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिम् ॥३॥**

**आयासात्** - आशासुतसन्निभात् परिश्रमात्, **सकलः** - कीटादारभ्येन्द्रपर्यन्तः समस्तसत्त्वगणः, **दुःखी** भवति, यां यां करोति चेष्टां तया तया दुःखमादत्ते-इत्युक्तेः (प्रशमरतौ) । किन्तु **कश्चन** - आयासकर्ता **एनम्** - आयासम्, **न जानाति** - आशाजन्मायमिति तत्स्वरूपं न संवेत्ति । **अनेनैवा**नन्तरोक्ते**नोपदेशेन धन्यः** - नैराश्यधनलब्धैव कश्चिन् **निर्वृतिम्**

- परमाह्लादात्मिकां मुक्तिं **प्राप्नोति**, तथा चोक्तम् - आशापत्नीं त्यजेद् यावत् तावन्मुक्तो न संशयः - इति (मैत्रेय्युपनिषदि २-१२) । ततः सूक्ष्मोऽपि व्यापारोऽस्य निर्वेदहेतुतां प्रतिपद्यते, ततश्च स्वाधीनमेव सुखसर्वस्वम्, एतदेव साक्षादाचष्टे -

**व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि ।**
**तस्यालस्यधुरीणस्य सुखं नान्यस्य कस्यचित् ॥४॥**

सुगमम्, नवर**मालस्यधुरीणस्ये**ति व्यपदेशो बहिस्तात्तुल्यवृत्तित्वात् । सर्वोपरम एव सुखोपनिषत् परेत्यत्र निष्कर्षः ।

इतश्च व्यापारोपरमः श्रेयान्, साशस्यापि नैराश्यसम्पादकत्वात्, एतदेव निर्वर्णयन्नाह -

**इदं कृतमिदं नेति द्वन्द्वैर्मुक्तं यदा मनः ।**
**धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत् ॥५॥**

स्पष्टम्, अत्र धर्ममोक्षापेक्षाविरहविषयं वादस्थलं प्राग्वदनुसन्धातव्यम् । इतश्चोपरम उपादेयः, माध्यस्थ्यापादकत्वादित्याह -

**विरक्तो विषयद्वेष्टा रागी विषयलोलुपः ।**
**ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान् ॥६॥**

**ग्रहमोक्षविहीनः** - प्रवृत्तिमात्रोपरतत्वेन विषयग्रहणादिपरिणतिशून्यः, शिष्टं स्पष्टम् ।

ननु च विषयप्रवृत्तेर्निषिद्धतया तत्र द्वेषो न दुष्ट इति चेत् ? सत्यम्, तथाप्युत्तरोत्तरशुद्धसामायिकसम्प्राप्त्यै स्वभ्यस्तविरागस्य सर्वत्र समतासमाधिरेवोचितः, उक्तं च - पडिसिद्धेसु च देसे विहिएसु य ईसिरागभावे वि । सामाइयं असुद्धं सुद्धं समयाए दोसुं पि - इति (योगशतके १७) । अन्यत्रापि - विषयेषु न रागी वा द्वेषी वा मौन-मश्नुते । समं रूपं विदंस्तेषु ज्ञानयोगी न लिप्यते - इति (अध्यात्मसारे १५-३७) । किञ्च यावद् विरागस्तावद् हेयत्वादिमतिसद्भावः, तदुक्तं वैराग्यवादिभिरपि-विरक्तस्य हेयहानमुपादेयोपादानं हंसक्षीरवत् - इति (साङ्ख्यसूत्रे ४-२३) । सेयं मतिरेव संसरणयोनिरिति नैषैकान्तन्याय्या, एतदेवाह -

**हेयोपादेयता तावत्संसारविटपाङ्कुरः ।**
**स्पृहा जीवति यावद्वै निर्विचारदशास्पदम् ॥७॥**

**यावद्वै निर्विचारदशास्पदं** प्रत्यपि **स्पृहा जीवति**, मुक्तिविषयोऽप्यभिलाषो यावन्न विनिवर्तत इत्यर्थः, यावच्चेदं हेयमिदं तूपादेयमित्याकारको भावः **हेयोपादेयता** जीवति, **तावत् संसारविटपाङ्कुरः** - भवद्रुमप्ररोहोऽक्षत एवाऽऽस्ते, स्पृहातज्जनितहेयोपादेयताद्वयस्यैव तद्रूपत्वात् । किञ्च -

**प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि ।**
**निर्द्वन्द्वो बालवद्धीमानेवमेव व्यवस्थितः ॥८॥**

**निर्द्वन्द्वः** - प्रवृत्तीतरद्वयगोचरविकल्पविरहितः, **धीमान्** - माध्यस्थ्यप्रयुक्तस्वास्थ्यसम्पन्नप्रेक्षाशाली, **एवमेव** - रागद्वेषावन्तरेणैव, **व्यवस्थितः** - स्वभावसुखासनसमासीनो भवति । अत्र दृष्टान्तमाह - **बालवत्** - नवजातशिशुरिव, यथा ह्यसौ करोमीदमिदं तु नेतिप्रवृत्तिनिवृत्तियत्नमुक्त एव दृश्यते, साक्षिमात्रत्वेनैव प्रायः सर्वदोपलभ्यते, तथैव धीमानप्यवतिष्ठत इति । शेषं सुगमम् । उक्तं च - सर्वत्र यः सदोदास्ते, न च द्वेष्टि न रज्यते । प्रत्याख्यानादतिक्रान्तः स दोषाणामशेषतः - इति (योगसारप्राभृते ९-७२) । किञ्च-

**हातुमिच्छति संसारं रागी दुःखजिहासया ।**
**वीतरागो हि निर्मुक्तस्तस्मिन्नपि न खिद्यति ॥९॥**

सुखरागतो हि दुःखजिहासा भवति, ततश्च दुःखगर्भो भवनिर्वेदः । वीतरागस्य तु तदभावाज् ज्ञानगर्भवैराग्य-पारम्यानुभावाच्च न संसारविषयोऽपि खेदः सम्भवति । इत्थञ्च सर्वथापि सुखितो वीतराग इति तत्त्व (वीतरागत्व) एव यतितव्यमिति हृदयम् । एतदेवापरथा समर्थयन्नाह -

**यस्याभिमानो मोक्षेऽपि देहेऽपि ममता तथा ।**
**न च ज्ञानी न वा योगी केवलं दुःखभागसौ ॥१०॥**

**यस्य** - मुमुक्षुत्वेनाप्यभिमतस्य **मोक्षेऽपि** - मुक्ति-विषयोऽपि, **अभिमानः** - मत्सत्कोऽयमस्त्वित्याकारकमभिम-

ननमाकाङ्क्षणमिति यावत्, **तथा** यावद् **देहेऽपि** - निज-शरीरेऽपि, **ममता** - ममायं देह इत्येतन्मात्रमपि संवेदनम् । **न च ज्ञानी** - मोक्षेऽपि मोहादभिलाषदोषो, विशेषतो धर्मनिषेधकारी (पद्मनन्दिपञ्चविंशतिकायाम् १-५५) - इति नैवासौ विजानाति । **न वा योगी** - अवेदनं विदुर्योगम् (अक्ष्युपनिषदि २) - इति स्वदेहसंवेदनागोचरतालक्षण-योगलक्षणसंयोग्यप्यसौ नैव भवति । कस्तर्ह्यसावित्यत्राह - **केवलं दुःखभागसौ**, उक्तज्ञानित्वयोगित्वानधिगतौ दुःख-विनिवृत्त्यसम्भवात् । ज्ञानप्रकर्षप्राप्यावेदनावधिसमधिगतिं प्रत्येव प्रोत्साहयति -

**हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा ।**
**तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥११॥**

**(इति श्रीअष्टावक्रे विशेषोपदेशप्रकरणं समाप्तम् ।)**

**यदि ते हरः** - शङ्करः, **हरिः** - विष्णुः, **कमलजोऽपि वा** - ब्रह्मा, **उपदेष्टा** - शास्त्रसन्देशकः स्यात्, **तथापीत्यादि** प्राग्वत् (१६-१) ।

प्रकारान्तरेण ज्ञानित्वाद्युपपादयति -

**[अथातः श्लोकविंशत्या तत्त्वज्ञस्य दशोच्यते ।**
**विद्या तज्जप्रकर्षस्य व्यक्तये गुरुणा स्फुटम् ॥]**

## प्रकरण-१७

**तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा ।**
**तृप्तः स्वच्छेन्द्रियो नित्यमेकाकी रमते तु यः ॥१॥**

**तेन** - वक्ष्यमाणलक्षणेन, **ज्ञानफलं प्राप्तम्** - यत्र ज्ञानं परमार्थतः पर्यवस्यति, स दशाविशेषोऽवाप्तः, **तथा योगाभ्यासफलम**प्यवाप्तम् - यदवाप्त्याभ्यस्यमानो योगः सफलीभवति तदधिगतम्, केनेत्याह - **यः नित्यं तृप्तः** - ज्ञानसुधोद्गारपरम्पराप्रकटीभवत्तृप्तिगुणालङ्कृतः, यतः **स्वच्छेन्द्रियः** - विषयतृष्णाकालुष्याकलङ्कितेन्द्रियः, अत्रोपयोगेन्द्रियविवक्षया भावविशुद्धिरभिहिता, **एकाकी तु रमते** - अद्वितीय एवात्मनाऽऽत्मनि रमणं कुरुते, परकीयग्रहस्वकीयपरिहाणद्वयाभाव आत्मरमणताया एवावशिष्टत्वात्, उक्तं च - आत्मानमात्मनि निजात्मगुणाढ्यमात्मा, जानाति पश्यति च पञ्चमभावमेकम् । तत्याज नैव सहजं परभावमन्यं, गृह्णाति नैव खलु पौद्गलिकं विकारम् - इति (नियमसारवृत्तौ १२९)। किञ्च -

**न कदाचिज्जगत्यस्मिंस्तत्त्वज्ञो हन्त खिद्यति ।**
**यत एकेन तेनेदं पूर्णं ब्रह्माण्डमण्डलम् ॥२॥**

हेयहानादिसाध्यासिद्धौ हि खेदो विजृम्भते, यदा हि स्वातिरिक्तवस्तुविरहाद्धेयादेरेवाभावस्तदा कः खलु खेदावकाश

इत्येतत्तत्त्वं जानानस्य खेदो न भवतीत्यभिप्रायः । यथा च स्वातिरिक्तवस्तुविरह आत्मनैव च ब्रह्माण्डमण्डलपूरणं तथा प्राक् प्रपञ्चितमिति न पुनः प्रतन्यते । खेदाभावोपपत्त्यै हि हर्षाभाव आवश्यकः, स च यच्चिन्तनेनोपपद्यते तदेव चिन्तयति -

**न जातु विषयाः केऽपि स्वारामं हर्षयन्त्यमी ।**
**शल्लकीपल्लवप्रीतमिवेभं निम्बपल्लवाः ॥३॥**

**केऽपि** मनोज्ञा अपि शब्दादिलक्षणा **अमी विषया जातु**-कदाचिदपि, **स्वारामम्** - आत्मरमणतैकाक्षणिकचित्तम्, **न हर्षयन्ति**-अहोऽनुपमान्येतानि सुखसाधनानि मयावाप्तान्ये-तदात्मकं हर्षमुत्पादयन्ति, एतदेव दृष्टान्तालङ्कारतः स्फुटयति - **शल्लकी** - गजप्रियाऽपराभिधाना यथार्थनाम्नी वनस्पतिः, तस्याः **पल्लवाः** - कोमलाः किसलयाः, तैः **प्रीतम्** - सञ्जातानभिलाप्यानन्दम्, **इभम्** - गजम्, **निम्बपल्लवा इव**, पिचुमन्दकिसला इव । उत्कृष्टानन्दास्वादमात्रस्यापि सचेतसो निकृष्टनिर्वेदनिबन्धनत्वादित्याशयः, उक्तं च-तावत्सुखेच्छा विषयार्थभोगे, यावन्मनः स्वास्थ्यसुखं न वेत्ति । लब्धे मनः-स्वास्थ्यसुखैकलेशे, त्रैलोक्यराज्येऽपि न तस्य वाञ्छा - इति (हृदयप्रदीपे-३३) । अन्यत्रापि-ब्रह्मानन्दे निमग्नस्य विषयाशा न तद् भवेत् । विषं दृष्ट्वाऽमृतं दृष्ट्वा विषं त्यजति बुद्धिमान् इति-(आत्मबोधोपनिषदि ) । किञ्च -

**यस्तु भोगेषु भुक्तेषु न भवत्यधिवासितः ।**
**अभुक्तेषु निराकाङ्क्षी तादृशो भवदुर्लभः ॥४॥**
**बुभुक्षुरिह संसारे मुमुक्षुरपि दृश्यते ।**
**भोगमोक्षनिराकाङ्क्षी विरलो हि महाशयः ॥५॥**
**धर्मार्थकाममोक्षेषु जीविते मरणे तथा ।**
**कस्याप्युदारचित्तस्य हेयोपादेयता न हि ॥६॥**
**वाञ्छा न विश्वविलये न द्वेषस्तस्य च स्थितौ ।**
**यथाजीविकया तस्माद्धन्य आस्ते यथासुखम् ॥७॥**

सुगमम् । नवरं **यथाजीविकया** - हाठिकयोगमन्तरेणैव प्रकृत्योपनतेन जीवनेन, **धन्यः** - निर्मनस्कताधनाधिगन्ता, उक्तं च - कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः । तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षतिः - इति (महोपनिषदि ४-९६) ।

यद्वा **विश्वविलयः** - चातुरन्तसंसारोच्छेदः स्वस्य मुक्तिरिति यावत्, शिष्टं स्पष्टम्, उक्तं च - भवे च मोक्षे समतां श्रयन्तः ० समाधिभाजः सुखिता भवन्ति - इति (समाधिसाम्यद्वात्रिंशिकायाम्-१७) । ततश्च -

**कृतार्थोऽनेन ज्ञानेनेत्येवं गलितधीः कृती ।**
**पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्नास्ते यथासुखम् ॥८॥**

व्याख्यातप्रायम्, केवलं **गलितधीः** - अन्ने खलु कामभोगा, अन्नो अहमंसि (सूत्रकृताङ्गे २-१-१३) - इत्यागमावगमापगतविषयव्यासक्तमतिः, **कृती** - व्यावृत्तभोगाभीप्सतया भुक्तभोक्तव्य इव ।

ननु च पश्यत्तादिसद्भावेऽपि कथमुक्तकृतिता सङ्गतिमङ्गतीति चेत् ? दृक्शून्यताद्यनुभावादिति गृहाण, एतदेव स्पष्टयन्नाह -

**शून्या दृष्टिर्वृथा चेष्टा विकलानीन्द्रियाणि च ।**
**न स्पृहा न विरक्तिर्वा क्षीणसंसारसागरे ॥९॥**

**शून्या दृष्टिः** रागादिक्षयत आत्मातिरिक्तविषयविरहात्, उक्तं च - रागद्वेषक्षयादेति ज्ञानी विषयशून्यताम् - इति (अध्यात्मसारे १५-४७) ।

तथा **वृथा चेष्टा**, फलतृष्णाविरहात्, वस्तुतोऽचेष्टत्वाच्च, तदाह-फलतृष्णां विहाय स्यात् सदा तृप्तो विसाधनः । उद्युक्तोऽपि क्रियां कर्तुं किञ्चिन्नैव करोति सः - इति (गणेशगीतायाम् ३-२६) ।

**विकलानीन्द्रियाणि च**, प्रत्याहारप्रकर्षप्रभावात्क्षीणेन्द्रियत्वात्, तदुक्तम्-इन्द्रियाणि समाहृत्य कूर्मोऽङ्गानीव सर्वशः । क्षीणेन्द्रियमनोवृत्तिर्निराशीर्निष्परिग्रहः - इति (रामगीतायाम् १५-५२) ।

**न स्पृहा न वा विरक्तिः**, रागविरागद्वन्द्वातिक्रान्तेः । ननु कुत्रैतान्यत्यद्भुतानि वैशिष्ट्यानि सम्भवन्तीत्यत्राह - **क्षीणः** - औदासीन्यादित्यप्रतापप्रभावात्परिशुष्कः **संसार-सागरः** - भवावारपारो यस्य सः - **क्षीणसंसारसागरः**, तस्मिन् । तस्यैवाद्भुततरामवस्थामवगमयति -

**न जागर्ति न निद्राति नोन्मीलति न मीलति ।**
**अहो परदशा कापि वर्तते मुक्तचेतसः ॥१०॥**

**न जागर्ति**, स्वापस्यैवाभावात्स्वापबोधात्मकजागृतेरनुपपत्तेः । स्वापस्तर्ह्यस्यास्त्वित्यत्राह - **न निद्राति**, हेत्वभावात् । **नोन्मीलति न मीलति** - उन्मेषनिमेषप्रयुक्तखेदासहत्वात्, प्रागुक्तयुक्त्याऽऽलस्यधुरीणसधर्मत्वात्, इत्थञ्च **अहो - मुक्तचेतसः** - रागादिबन्धनविश्लेषविशिष्टचित्तस्य, **कापि** अवर्णनीया **परदशा** - प्रकृष्टावस्था तर्कातिक्रान्तकाष्ठा वा, **वर्तत** इति गम्यते । किञ्च-

**सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः ।**
**समस्तवासनामुक्तो मुक्तः सर्वत्र राजते ॥११॥**

**सर्वत्र** - पूजापरीषहादिकाशेषदशाविशेषे, **स्वस्थः** - आत्मोपयोगैकस्थिरः, **दृश्यते** - प्रमातृभिः स्वप्राप्तप्रमाणैरुपलभ्यते । यतः स **सर्वत्र विमलाशयः** - तत्तद्दशाविशेषेऽहन्ताममतादिमलामलिनहृदयः, अत एव **समस्तवासनामुक्तः**

- स्वभावसंलीनतयोत्सृष्टशस्ताशस्तसंस्कारः, किमुक्तं भवति - **मुक्तः** - सर्वोपाधिशून्यः, **सर्वत्र राजते** - ग्रामनगरारण्यादिसर्वस्थले स्वभावविभूषाविभूषित एवाऽऽस्ते ।

ननु कथमेतत्सम्भवी भवी च मुक्तश्चेति चेत् ? अत्राह -

**पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गृह्णन्वदन्व्रजन् ।**
**ईहितानीहितैर्मुक्तो मुक्त एव महाशयः ॥१२॥**

**ईहितं** हि रागव्यञ्जकम्, **अनीहितं** च द्वेषव्यञ्जकम्, ताभ्यां कषायचतुष्टयसङ्ग्रहः, यदाह - माया लोभो रागो कोहो माणो य वण्णिओ देसो-इति (पुष्पमालायाम्  ) । ततश्च त**न्मुक्तो मुक्त एवे**ति व्यपदेशो न दुष्यति, परमार्थस्तत्रैव मुक्तेरुपपद्यमानत्वात्, पाश्चात्यप्रक्रियायाः सार्वज्ञ्यादिसमधिगतिरूपायाः स्वतः साध्यत्वात्, तदिदमुक्तम् - कषायमुक्तिः किल मुक्तिरेव - इति । किञ्च -

**न निन्दति न च स्तौति न हृष्यति न कुप्यति ।**
**न ददाति न गृह्णाति मुक्तः सर्वत्र नीरसः ॥१३॥**

**न निन्दती**त्यादि । परमौदासीन्यप्रतिष्ठितत्वादित्याशयः, तदुक्तम् - रुष्टैर्जनैः किं यदि चित्तशान्ति - स्तुष्टैर्जनैः किं यदि चित्ततापः । प्रीणाति नो नैव दुनोति चान्यान् स्वस्थः सदोदासपरो हि योगी - इति (हृदयप्रीदीपे-२६) । न हि स्वारस्यविरहे निन्दादि सङ्गतिमङ्गति, स्वरसानुसारित्वाद्वीर्य-

स्येति। किञ्च -

**सानुरागां स्त्रियं दृष्ट्वा मृत्युं वा समुपस्थितम् ।**
**अविह्वलमनाः स्वस्थो मुक्त एव महाशयः ॥१४॥**
**सुखे दुःखे नरे नार्यां सम्पत्सु च विपत्सु च ।**
**विशेषो नैव धीरस्य सर्वत्र समदर्शिनः ॥१५॥**
**न हिंसा नैव कारुण्यं नौद्धत्यं न च दीनता ।**
**नाश्चर्यं नैव च क्षोभः क्षीणसंसरणे नरे ॥१६॥**
**न मुक्तो विषयद्वेष्टा न वा विषयलोलुपः ।**
**असंसक्तमना नित्यं प्राप्ताप्राप्तमुपाश्नुते ॥१७॥**

व्याख्यातप्रायम् । सर्वत्र स्वभावसम्मग्नताप्रयुक्तविभावविमुक्तेर्हेतुता द्रष्टव्या ।

ननु च प्राप्तोपभोगस्तु प्रतीतिपथमवतरति, न त्वप्राप्तोपभोग इति चेत् ? अनभिज्ञाताभिप्रायाणामेवमेव । अयमत्राशयः, नित्यमसंसक्तमना हि प्राप्तोपभोगोपभोग्यप्यसंसक्त्यनुभावादभोग्येव भवति, यदि तु तत्रासौ भोगीति व्यपदिश्यते, तदाऽप्राप्तसम्बन्धिन्यपि स व्यपदेशोऽस्तु, तुल्यन्यायात्, नो चेत् ? पूर्वस्मिन्नपि मा भूत्, तत एवेत्यालोचनीयं सूक्ष्मचक्षुषा ।

ननु च संयोगेऽप्यसंसक्तिरिति दुःसम्भवमिति चेत् ? सत्यम्, तथापि शून्यचित्तताऽनुभावेन तत्सम्भवोऽस्त्येव, एतदेवाचष्टे -

**समाधानासमाधानहिताहितविकल्पनाः ।**
**शून्यचित्तो न जानाति कैवल्यमिव संस्थितः ॥१८॥**

**समाधानम्** - सर्वेन्द्रियसंह्लादसञ्जनकविषयसंयोग-समुत्पन्नचित्तसमाधिः, **असमाधानम्** - तद्विपरीतम्, यद्वा समाधिस्तु तदेवार्थमात्राभासनरूपकम् (अभिधानचिन्तामणौ ) इतिलक्षणलक्षिता भावसमाधिः **समाधानम्**, तदितरद-**समाधानम्** । तथा **हितम्** - सुखसंवित्त्यनुगुणम्, **अहितम्** - तद्विपरीतम्, यद्वा **हितम्** - मित्रम्, **अहितम्** - रिपुः, यद्वा **हितम्** - गुर्वादि, **अहितम्** - स्त्र्यादि ।

तदेता **विशेषण**-शुद्धस्वभावे विजातीयप्रक्षेपेण कल्प्यन्त इति **विकल्पनाः**, **शून्यचित्तः** - वासनावियोगयोगितया-ऽचित्तप्रायचित्तः, **न जानाति**, आस्तामनुभूतिः, परिचयोऽप्यासां तस्य न भवतीति भावः, यतः स **कैवल्यमिव संस्थितः**, सर्वोपाधिशून्यत्वेनात्मकेवलभावं प्रतिपन्न इव, तद्भावासन्न-त्वात्तस्य, नगराद्यासन्नपान्थवत्, उक्तं च - वासना-सम्परित्यागाच्चितं गच्छत्यचित्तताम् । अवासनत्वात् सततं यदा न मनुते मनः ॥ अमनस्ता तदोदेति परमोपशमप्रदा । विज्ञानञ्च प्रवर्धेत सद्यः कैवल्यकारणम् - इति (रामगीतायाम् ६/५३-५४) । इत्थञ्च -

**निर्ममो निरहङ्कारो न किञ्चिदिति निश्चितः ।**
**अन्तर्गलितसर्वाशः कुर्वन्नपि करोति न ॥१९॥**

व्याख्यातव्याख्यम्, उक्तं चान्यत्रापि-कर्तापि नैव कर्ताहम् - इति (आत्मदर्शनगीतायाम् ८८) । ततश्च -

**मनःप्रकाशसम्मोहस्वप्नजाड्यविवर्जितः ।**
**दशां कामपि सम्प्राप्तो भवेद् गलितमानसः ॥२०॥**

**[ इति तत्त्वज्ञस्वरूपविंशतिकम् ]**

**मनःप्रकाशः** - साध्यसिद्धिसञ्जातस्वान्तसमुल्लासः, **तद्विवर्जित** इत्यग्रेण योगः, साध्यस्यैवाभावात्, **सम्** - विपक्षलेशेनाप्यसंवलितो **मोहः** - अतत्तन्मतिः **सम्मोहः** तद्रहितः, वासनाविरहे तदुदयस्याशक्यत्वात्, **स्वप्नम्** - स्वापज्ञेयम्, तदभावस्तदभावात्, तथा जडस्य मूर्खस्य भावः- **जाड्यम्**, चिन्मात्रचिन्तामणित्वात्तेनापि **विवर्जितः**, किमुक्तं भवति - **गलितमानसः** आमूलात्क्षीणचेतस्कः, सोऽयं **कामपि** शब्दातीतां **दशां सम्प्राप्तो भवेत्**, उक्तं च - आमूलान्मनसि क्षीणे सङ्कल्पस्य कथा च का ? - इति (संन्यासगीतायाम् १०-७६) ।

पुनरप्यर्थादिभ्रममपाकर्तुमाह -

**[ तत्त्वाभिज्ञे फलीभूतसामस्यैव प्रधानता ।**
**व्याख्यातुं वर्ण्यते शान्तिः शतश्लोकैः पुनः स्फुटम् ॥ ]**

# प्रकरण-१८

**यस्य बोधोदये तावत्स्वप्नवद् भवति भ्रमः ।**
**तस्मै सुखैकरूपाय नमः शान्ताय तेजसे ॥१॥**

**यस्य** - वक्ष्यमाणरूपस्य, **बोधोदये** - ज्ञानाविर्भावे, यत्सम्बन्ध्यधिगमोत्पादे सतीत्यर्थः, **भ्रमस्तावत् स्वप्नवद् भवति**, यन्मया दृष्टं तत्तु स्वप्नमेवाभूत्, न सत्यमिति संवेदनस्य प्रबोधोदयभावित्ववत्, न हि स्वप्नायमानः स्वप्नं स्वप्नत्वेन संवेत्तीति तदर्थमावश्यको सद्बोधोदयः, उक्तं च - स्वप्नेन्द्रजालसदृशं संसारं मन्यते हि सद्बुद्धिः - इति (वैराग्यकल्पलतायाम् २-२२०) ।

एवमुद्देश्यमभिधाय विधेयमाह - **तस्मै सुखैकरूपाय** - दुःखांशमात्रास्पृष्टानन्दाद्वैतात्मकाय, **शान्ताय** - क्रोधादि-बाधानुबद्धव्याक्षोभविकलाय, तदुक्तम् - क्रोधाद्यबाधितः शान्तः - इति (योगबिन्दौ १९३), **तेजसे** - सम्मुक्तसन्तमसत्वेन प्रकाशैकप्रतिरूपाय, **नमः** - भावप्रणामोऽस्तु ।

एतावता मङ्गलमुक्त्वा भ्रमभञ्जनमेव वितन्वन्नाहाष्टा-वक्रः -

**अर्जयित्वाऽखिलानर्थान् भोगानाप्नोति पुष्कलान् ।**
**न हि सर्वपरित्यागमन्तरेण सुखी भवेत् ॥२॥**

अर्थानामनर्थानुबन्धित्वाद् भोगानां च भुजङ्गभोगाति-

शायित्वान्न तत्त्यागाभावसुखयोः सामानाधिकरण्यं सम्भवतीत्याशयः । किञ्च -

**कर्तव्यदुःखमार्तण्डज्वालादग्धान्तरात्मनः ।**
**कुतः प्रशमपीयूषधारासारमृते सुखम् ॥३॥**

मयाऽर्थोपार्जनं कर्तव्यम्, मया स्त्र्यादिसम्भोगः कर्तव्यः, मया पीडापरिहारः कर्तव्यः, मया सुखसाधनसंयोगः कर्तव्य इत्येवं '**कर्तव्य**'गोचरा या मतिः सैव **दुःखम्**, तन्मयत्वात्, तद्धेतुत्वाच्च, तदेव **मार्तण्डः** - सूर्यः, सुदुःषहसन्तापसञ्जनकत्वसाधर्म्यात्, तस्य या **ज्वालाः** - तत्तत्प्रयोजनप्रयत्नस्थानीया अर्चिषः, दाहकतरत्वसादृश्यात्, ताभि**र्दग्धः** - परिप्लुष्टसुखसंवेदनः, **अन्तरात्मा** यस्य सः - **कर्तव्यदुःखमार्तण्डज्वालादग्धान्तरात्मा**, तस्य, **प्रशमः** - ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । न चास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् (जाबालदर्शनोपनिषदि १-२३) - इतिप्रतिभासप्रसूतसर्वोपरमयोनिः प्रशान्तिः, स एव **पीयूषधारासारः** - सुधास्तनयित्नुः, अर्पितामरत्वत्वात्, त**मृते** - विना, **कुतः सुखम्** ? स्वहेतुमन्तरेणापि समुत्पत्तौ तस्याहेतुकत्वप्रसक्तेर्नित्यभावाभावापत्तेर्नैव तद्विना तत्सुखं घटामटाट्यत इत्याशयः, तदाह-नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः - इति (प्रमाणवार्त्तिके ३-३) ।

ननु मा भूदर्थाद्यासक्तिप्रयुक्तकर्तव्याकूतम्, इतरत्तु तत् स्यादेव, संसारवर्तिनस्तस्याशक्यपरिहारत्वादिति चेत् ? अत्राह -

**भवोऽयं भावनामात्रो न किञ्चित्परमार्थतः ।**
**नास्त्यभावः स्वभावानां भावाभावविभाविनाम् ।४।**

**अयम्** - प्रत्यक्षमीक्ष्यमाणः, **भवः** - संसारः, **भावनामात्रः** - वासनानतिरिक्तविग्रहः, तदभावे तदभावदर्शनात्, अत एवोक्तं प्राक् - वासना एव संसार इति सर्वा विमुञ्चत । तत्त्यागो वासनात्यागात् स्थितिरद्य यथा तथा- इति (अष्टावक्रगीतायाम् ९-८) । तस्मा**न्न किञ्चित् परमार्थतो** विद्यते ।

नन्वेवमात्मनामप्यभावापत्तिरित्यत्राह-**भावाभावविभाविनाम्**-अयम्भावः स त्वभाव इतिविवेचयितृणाम्, **स्वभावानाम्** - आत्मनाम्, **अभावो नास्ति**, प्रत्यक्षसिद्धत्वात्तेषाम् । ननूभयोः प्रत्यक्षत्वेऽपि भव एव भावनामात्रः, न त्वात्मेति किमत्र नियामकमिति चेत् ? प्रागुपपादितमसत्प्रायत्वमेव भवस्येति गृहाण, ननु चात्मनोऽपि तत्त्वमस्त्विति चेत् ? अत्राह -

**न दूरं न च सङ्कोचाल्लब्धमेवात्मनः पदम् ।**
**निर्विकल्पं निरायासं निर्विकारं निरञ्जनम् ॥५॥**

**आत्मनः पदम्** - सद्भूतमवस्थानम्, **न दूरम्**, अन्तः स्फुरायमानत्वात्, **न च सङ्कोचात्** स्थितम्, अनुपचरितावभासविषयत्वात्, किमुक्तं भवति ? तल् **लब्धमेव** - अभ्रान्तप्रत्यक्षेक्षितमेव, यत्स्वरूपमिदमीक्षितं तदेव वर्णयति, दृढतरप्रत्ययहेतुत्वात्, **निर्विकल्प**मित्यादि प्राग्वत् । न च भवस्यापीदृगवभास इति स्फुट एव तदाग्रहे व्यामोहः, त्याज्यश्चासौ, तत्त्यागस्य शोकत्यागसमानत्वात्, एतदेवाभिदधन्नाह -

**व्यामोहमात्रविरतौ स्वरूपादानमात्रतः ।**
**वीतशोका विराजन्ते निरावरणदृष्टयः ॥६॥**

**व्यामोहमात्रविरतौ** - भवभावाभिनिवेशमात्रविनिवृत्तौ, **स्वरूपादानमात्रतः**-आत्मलक्षणोपलब्ध्यैव, **निरावरणदृष्टयः** -सज्ज्ञानाञ्जनवितिमिरदृशः, **वीतशोकाः सन्तः विराजन्ते**, शोकनिमित्तापगमात् । मात्रपदद्वयमेतावदेव दुःखमुक्तिप्रयोजकम्, अन्यत्तु सर्वमप्यस्यैव विस्तर इत्यर्थस्य ज्ञापकम् । अतो नैतज्ज्ञानोदये किमपि कर्तव्यतयावशिष्यत इत्याह -

**समस्तं कल्पनामात्रमात्मा मुक्तः सनातनः ।**
**इति विज्ञाय धीरो हि किमभ्यस्यति बालवत् ॥७॥**
**आत्मा ब्रह्मेति निश्चित्य भावाभावौ च कल्पितौ ।**
**निष्कामः किं विजानाति किं ब्रूते च करोति किम् ।८।**

**अयं सोऽहमयं नाहमिति क्षीणा विकल्पना: ।**
**सर्वमात्मेति निश्चित्य तूष्णींभूतस्य योगिन: ॥९॥**

सर्वथाऽपि कृतकृत्यस्य सतस्तस्य स्तिमितोदधिसङ्काशस्य विकल्पकल्लोललोलताविरहान्न कृत्यादिगोचर: सङ्कल्प: सम्भवतीति हृदयम्, उक्तं च - नाकृतेन कृतेनार्थो, न श्रुतिस्मृतिविभ्रमै: । निर्मन्दर इवाम्भोधि:, स तिष्ठति यथास्थित: - इति (महोपनिषदि ४-४१) । इत्थञ्च -

**न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता ।**
**न सुखं न च वा दु:खमुपशान्तस्य योगिन: ॥१०॥**

विकारोपशमस्य विक्षेपादेश्च सामानाधिकरण्यासम्भवादित्याशय:, यथोक्तम्-विक्षेपो नास्ति यस्मान्मे, न समाधिस्ततो मम । विक्षेपो वा समाधिर्वा मनस: स्याद्विकारिण: - इति (अध्यात्मोपनिषदि २३) । अत: -

**स्वाराज्ये भैक्ष्यवृत्तौ च लाभालाभे जने वने ।**
**निर्विकल्पस्वभावस्य न विशेषोऽस्ति योगिन: ॥११॥**
**क्व धर्म: क्व च वा काम: क्व चार्थ: क्व विवेकिता ।**
**इदं कृतमिदं नेति द्वन्द्वैर्मुक्तस्य योगिन: ॥१२॥**
**कृत्यं किमपि नैवास्ति न कापि हृदि रञ्जना ।**
**यथाजीवनमेवेह जीवन्मुक्तस्य योगिन: ॥१३॥**

उक्तार्थम् । नवरं **विवेकिते**ति कृत्याकृत्यविवेक:, योऽनुपदमेव स्पष्टीकृत: । **यथाजीवनमि**ति यथारब्धप्रवृत्त्यप्रतिकूलभावेन साक्षितया जीवनम्, परमार्थत: कृतकृत्यत्वात्, यदुक्तम् - कृतं कृत्यं प्राप्तं प्रापणीयमित्येव नित्यश: । व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा ॥ ममाकर्तुरलेपस्य यथारब्धं प्रवर्तताम्-इति (अवधूतोपनिषदि २२, २३) ।

**क्व मोह: क्व च वा विश्वं क्व तद्ध्यानं क्व मुक्तता ।**
**सर्वसङ्कल्पसीमायां विश्रान्तस्य महात्मन: ॥१४॥**

यथोक्तस्याहम्मुक्तोऽस्मीत्याद्याकारोऽपि सङ्कल्पो नैवोत्तिष्ठति, अन्यथा यथोक्तत्वस्यैवानुपपत्तेरित्याकूतम् । इत्थञ्च -

**येन विश्वमिदं दृष्टं स नास्तीति करोतु वै ।**
**निर्वासन: किं कुरुते पश्यन्नपि न पश्यति ॥१५॥**

**करोतु** - वासनावशाद्विकल्पं विदधातु । आजन्मादृष्टघटस्य तदभावज्ञानायोगवन्न निर्वासनस्य भवाभावोऽपि विषयतामवतरतीति भाव: । निर्वासनतामेवापरथा प्रतिपादयति -

**येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिन्तयेत् ।**
**किं चिन्तयति निश्चिन्तो द्वितीयं यो न पश्यति ॥१६॥**

**दृष्टो येनात्मविक्षेपो निरोधं कुरुते त्वसौ ।**
**उदारस्तु न विक्षिप्त: साध्याभावात्करोति किम् ।१७।**

**साध्याभावादिति** विक्षेपापगमात्मकप्रयोजनविरहात्, अज्ञातचौरागमनस्य तद्विगमप्रयोजनविरहवत् । तस्मात् -

**धीरो लोकविपर्यस्तो वर्त्तमानोऽपि लोकवत् ।**
**न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति ॥१८॥**

**लोके**त्यादि, यथोक्तं परमहंसवक्तव्यतायाम् - अनुन्मत्ता उन्मत्तवदाचरन्तीति (आश्रमोपनिषदि)। शिष्टं स्पष्टम् । एवञ्च -

**भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः ।**
**नैव किञ्चित्कृतं तेन लोकदृष्ट्या विकुर्वता ॥१९॥**
**प्रवृत्तौ वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः ।**
**यदा यत्कर्त्तुमायाति तत्कृत्वा तिष्ठतः सुखम् ॥२०॥**

व्याख्यातप्रायम्, नवरं **धीरस्ये**त्यात्मरमणमात्रप्रवृत्त-प्रतिभस्य, अन्वाह च-व्यवहारमिदं सर्वं मा करोतु करोतु वा। अकुर्वन् वाऽपि कुर्वन् वा जीवः स्वात्मरतिक्रियः - इति (अन्नपूर्णोपनिषदि २-१०) । किञ्च -

**निर्वासनो निरालम्बः स्वच्छन्दो मुक्तबन्धनः ।**
**क्षिप्तः संसारवातेन चेष्टते शुष्कपर्णवत् ॥२१॥**

यथा हि शुष्कं पर्णं प्रवृत्त्याद्यभिप्रायमन्तरेणैव वातवशाद् गमनादिपरिणतिमनुभवति, तथासावपि संसारवर्त्तितया तदात्मकपवनवशादित्यर्थः । वस्तुतस्त्वयमसंसार एव, हर्षादि-विरहलक्षणतल्लक्षणलक्षितत्वादित्याह -

**असंसारस्य तु क्वापि न हर्षो न विषादिता ।**
**स शीतलमना नित्यं विदेह इव राजते ॥२२॥**
**कुत्रापि न जिहासाऽस्ति नाशा वाऽपि न कुत्रचित् ।**
**आत्मारामस्य धीरस्य शान्तस्वच्छान्तरात्मनः ॥२३॥**
**प्रकृत्या शून्यचित्तस्य कुर्वतोऽस्य यदृच्छया ।**
**प्राकृतस्येव धीरस्य न मानो नावमानिता ॥२४॥**

यत्किञ्चिद्विषयपरिणतेरेव चित्तविक्षेपभूतत्वेन विषय-शून्यस्य तस्य तदभावान्नापमानादयः सम्भवन्तीति हृदयम्, उक्तं च - अपमानादयस्तस्य विक्षेपो यस्य चेतसः । नापमानादयस्तस्य न क्षेपो यस्य चेतसः - इति (समाधितन्त्रे ३८) । किञ्च -

**कृतं देहेन कर्मेदं न मया शुद्धरूपिणा ।**
**इति चिन्तानुरोधी यः कुर्वन्नपि करोति न ॥२५॥**

सुगमम् । नन्वधिकृतस्यापि करणवैसादृश्यानुपलम्भात् कथमस्य करणेऽप्यकरणं प्रत्येयमिति चेत् ? अत्राह -

**अतद्वादीव कुरुते न भवेदपि बालिशः ।**
**जीवन्मुक्तः सुखी श्रीमान् संसरन्नपि शोभते ॥२६॥**

**तत्** - कृतमित्याद्यनन्तरवृत्तोदितं वदतीति तद्वादी, नासौ-**अतद्वादी**, देहात्माभिमानीत्यर्थः, स **इव** तद्वादी **कुरुते**, पूर्वोक्तरीत्या (१८-१८) तस्य लोकवद्वर्त्तितया प्रवृत्तिस्तु

तस्यापीतरसमानैवेति भावः, **तथापि स बालिशो न भवेत्**, उक्तसंवेदनेन बालिशताप्रयोजकस्याततदाग्रहस्यापगमात्, स्थाणौ पुरुषाग्रहवत्, उक्तं च - उत्पन्नपुरुषभ्रान्तेः स्थाणौ यद्वद्विचेष्टितम् । तद्वन्मे चेष्टितं पूर्वं देहादिष्वात्मविभ्रमात् ॥ यथासौ चेष्टते स्थाणौ निवृत्ते पुरुषाग्रहे । तथा चेष्टोऽस्मि देहादौ विनिवृत्तात्मविभ्रमः - इति (समाधितन्त्रे २१, २२) । इत्थञ्च देहाश्रित-क्रियाकर्तृत्वानभिमानमेव तदकर्तृत्वे प्रमाणम् । ततश्चासौ **संसरन्नपि**-तत्तत्पर्यायसंसृतिस्वरूपसंसारस्थोऽपि, **जीवन्मुक्तः सुखी, श्रीः**-अखण्डानन्दलक्ष्मीः, तद्वान् - अनुपचरिततत्स्वामित्वसम्पन्नः सन् **शोभते**-विराजते । किञ्च-

**नानाविचारसुश्रान्तो धीरो विश्रान्तिमागतः ।**
**न कल्पते न जानाति न शृणोति न पश्यति ॥२७॥**
**असमाधेरविक्षेपान्न मुमुक्षुर्न चेतरः ।**
**निश्चित्य कल्पितं पश्यन्ब्रह्मैवास्ते महाशयः ॥२८॥**

साक्षितामेवास्य समर्थयति -

**यस्यान्तः स्यादहङ्कारो न करोति करोति सः ।**
**निरहङ्कारधीरेण न किञ्चिदकृतं कृतम् ॥२९॥**

अहस्मीत्येतन्मात्राहङ्कारस्य विलये न करणाकरणकल्पना भवति, सति हि धर्मिणि तद्धर्मा चिन्त्यन्त इति न्यायात् । तस्मात् -

**नोद्विग्नं न च सन्तुष्टमकर्तृ स्पन्दवर्जितम् ।**
**निराशं गतसन्देहं चित्तं मुक्तस्य राजते ॥३०॥**
**निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्तते ।**
**निर्निमित्तमिदं किन्तु निर्ध्यायति विचेष्टते ॥३१॥**

उक्तार्थम् । ननु च सोन्मादभावसम्पादक एष उपदेशः प्राकृतानामिति चेत् ? सत्यम्, अत एव ते प्रकृतश्रवणेऽनधिकारिण एव, इतरेषामेव तत्तात्पर्यपरिणतेरनुन्मत्तत्वाधिगतावप्युन्मत्तानुवृत्तियोगाद् व्यवहारनिर्वाहकत्वात्, एतदेव गमयति -

**तत्त्वं यथार्थमाकर्ण्य मन्दः प्राप्नोति मूढताम् ।**
**अथवा याति सङ्कोचममूढः कोऽपि मूढवत् ॥३२॥**

अवतारावतीर्णार्थम्, नवरं **सङ्कोच**मिति तत्त्वानुरूपचेष्टने मुकुलितभावम् । इत्थञ्च -

**एकाग्रता निरोधो वा मूढैरभ्यस्यते भृशम् ।**
**धीराः कृत्यं न पश्यन्ति सुप्तवत्स्वपदे स्थिताः ॥३३॥**

**एकाग्रतेत्यादि** । योगारम्भोऽथ विक्षिप्ते, व्युत्थानं क्षिप्तमूढयोः । एकाग्रे च निरोधे च समाधिः (द्वात्रिंशद् द्वात्रिंशिकायाम् ११-३१), एकाग्रता चेद् बाह्यादौ, निरोधश्चेच्चिदात्मनि । क्षिप्तादित्रिभुवस्त्यागात्कस्य मोक्षोऽत्र दूरतः - इत्यादिवचनश्रवणान्मम चित्तं क्षिप्तमूढविक्षिप्तभावं

परिहायैकाग्रताद्युपयात्विति सम्प्रधार्य **मूढैः** - सदातनसहज-समाधिसम्पन्न एव मदात्मेति तत्त्वानभिज्ञैः, शिष्टं स्पष्टम् । तथा च -

**अप्रयत्नात्प्रयत्नाद्वा मूढो नाप्नोति निर्वृतिम् ।**
**तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ॥३४॥**
**शुद्धं बुद्धं प्रियं पूर्णं निष्प्रपञ्चं निरामयम् ।**
**आत्मानं तं न जानन्ति तत्राभ्यासपरा जनाः ॥३५॥**

तदभ्यासस्याप्यशुद्धत्वाद्यभिमानमन्तरेणासम्भवात्तद्भावे शुद्धत्वादिविशिष्टात्मज्ञानाभाव एवेति भावः । एवञ्च -

**नाप्नोति कर्मणा मोक्षं विमूढोऽभ्यासरूपिणा ।**
**धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्यविक्रियः ॥३६॥**

उक्तार्थम् । ननु न विज्ञानं मुक्तिनिमित्तं भवितुमर्हति, फलस्य क्रियानुसारित्वदर्शनात्, तदुक्तम्-क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्यभोगज्ञो न ज्ञानात् सुखितो भवेत् - इति (नयोपदेशे १२९) । न च - ज्ञानेनैव हि संसारविनाशो नैव कर्मणा (रुद्रहृदयोपनिषदि ३५) - इतिवचसा तद्बाधयोगान्न क्रियापि तु ज्ञानमेव मुक्तिदमिति वाच्यम्, बाध्यबाधकविनिगमनाविरहाद्वचनमात्रस्य नियामकत्वा-योगात्, क्रियापक्षे युक्तिसद्भावस्योपदर्शितत्वाच्च । अतः कर्मणा मोक्षं नाप्नोतीति वाक्यमयुक्ततयावस्थितमिति चेत्, न, वस्तुतो

ज्ञानक्रियासमुच्चयस्यैव सिद्धिसम्पादकत्वात्, पक्षद्वयस्यैव पक्षिणोऽम्बरगतिसम्पादकत्ववत्, यथोक्तम् - उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् - इति (हारितस्मृतौ) । नन्वेवम् - ज्ञानान्मुक्तिः (साङ्ख्यसूत्रे ३-२३) - इत्यादिवचोऽनुपपत्तिरिति चेत् ? को वा किमाह ? एकान्तवादे तथैव, स्याद्वादे तु तादृशवचसोऽपि ज्ञानक्रियासमुच्चय एव तात्पर्यभावात्-चरण-गुणविप्पहीणो बुड्डइ सुबहुं पि याणंतो (आवश्यकनिर्युक्तौ ९७), नाणाहिओ वरतरं हीणो वि हु पवयणं पभावंतो । न य दुक्करं करंतो सुट्ठु वि अप्पागमो पुरिसो (उपदेशमालायाम् ४२३) - इत्याद्युक्तावपि न काचित् क्षतिरित्यलम्प्रसङ्गेन । प्रकृतं प्रस्तुवन्नाह -

**मूढो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति ।**
**अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक् ॥३७॥**

**निराधाराग्रहव्यग्रा मूढाः संसारपोषकाः ।**
**एतस्यानर्थमूलस्य मूलच्छेदः कृतो बुधैः ॥३८॥**

**न शान्तिं लभते मूढो यतः शमितुमिच्छति ।**
**धीरस्तत्त्वं विनिश्चित्य सर्वदा शान्तमानसः ॥३९॥**

**क्वात्मनो दर्शनं तस्य यद्दृष्टमवलम्बते ।**
**धीरास्तु तं न पश्यन्ति पश्यन्त्यात्मानमव्ययम् ॥४०॥**

**क्व निरोधो विमूढस्य यो निर्बन्धं करोति वै ।**
**स्वारामस्यैव धीरस्य सर्वदाऽसावकृत्रिमः ॥४१॥**

व्याख्यातप्रायम् । तथा च -

**भावस्य भावकः कश्चिन्न किञ्चिद्भावकोऽपरः ।**
**उभयाभावकः कश्चिदेवमेव निराकुलः ॥४२॥**

**कश्चिन्मूढो भावस्य भावकः** - अस्तित्वपरिभावयिता, **अपरस्त्वमूढमानी न किञ्चिदस्तीति भावकः** - नास्तित्वचिन्तकः, **कश्चित्तु** विनिवृत्तव्यामोहत्वे**नोभयाभावकः** - अस्तितादिद्वयसंवेदनशून्यः, अत एव **एवमेव** - स्वभावत एव, **निराकुलः** - अस्तिताद्याग्रहग्रहिसुलभाऽऽकुलतामुक्तस्तिष्ठति । किञ्च -

**शुद्धमद्वयमात्मानं भावयन्ति कुबुद्धयः ।**
**न तु जानन्ति सम्मोहाद्यावज्जीवमनिर्वृताः ॥४३॥**

अभावनमेव शुद्धात्मभावनमितितत्त्वबोधविकलत्वेन कुत्सिता **बुद्धिर्येषां** ते **कुबुद्धयः**, शेषं सुज्ञेयम् । किञ्च -

**मुमुक्षोर्बुद्धिरालम्बमन्तरेण न विद्यते ।**
**निरालम्बैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ॥४४॥**

मुमुक्षाया एवालम्बनभूतत्वेन तद्भावे निरालम्बभावानुपपत्तेर्मुक्तम्मन्यस्यैव तद्भावसम्भव इति हृदयम् । मुमुक्षुमुक्तयोरन्तरमेवोपमयाभिदधन्नाह -

**विषयद्विपिनो वीक्ष्य चकिताः शरणार्थिनः ।**
**विशन्ति झटिति क्रोडं निरोधैकाग्र्यसिद्धये ॥४५॥**
**निर्वासनं हरिं दृष्ट्वा तूष्णीं विषयदन्तिनः ।**
**पलायन्ते न शक्तास्ते सेवन्ते कृतचाटवः ॥४६॥**

**द्विपिनः** - हस्तिनः, **क्रोडम्** - गुहाम्, **हरिम्** - सिंहम्, **ते** - शरणार्थिनो मूढाः, शेषं सुगमम् । अत्र 'पलायने' इत्यपि पाठः सम्भाव्यते, तत्र च विषयगजकृतनिश्चिन्तपञ्चानन-सेवनं बोद्धव्यम्, तथाविधस्य विषयवशीकारदर्शनात्, यथोक्तम् - ऋतुनामिन्द्रियार्थानामनुकूलत्वम् - इति (अभिधानचिन्ता-मणौ) । किञ्च -

**न मुक्तिकारिकां धत्ते निःशङ्को युक्तमानसः ।**
**पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्नास्ते यथासुखम् ।४७।**
**वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः ।**
**नैवाचारमनाचारमौदास्यं वापि पश्यति ॥४८॥**

**वस्तु** - यथार्थं तत्त्वम्, शेषं सुगमम् । ततश्च -

**यदा यत्कर्त्तुमायाति तदा तत्कुरुते ऋजुः ।**
**शुभं वाऽप्यशुभं वाऽपि तस्य चेष्टा हि बालवत् ।४९।**
**स्वातन्त्र्यात्सुखमाप्नोति स्वातन्त्र्याल्लभते परम् ।**
**स्वातन्त्र्यान्निवृतिं गच्छेत्स्वातन्त्र्यात्परमं पदम् ॥५०॥**

**अकर्तृत्वमभोक्तृत्वं स्वात्मनो मन्यते यदा ।**
**तदा क्षीणा भवन्त्येव समस्ताश्चित्तवृत्तयः ॥५१॥**
**उच्छृङ्खलाऽप्यकृतिका स्थितिर्धीरस्य राजते ।**
**न तु सस्पृहचित्तस्य शान्तिर्मूढस्य कृत्रिमा ॥५२॥**
**विलसन्ति महाभोगैर्विशन्ति गिरिगह्वरान् ।**
**निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ॥५३॥**
**श्रोत्रियं देवतां तीर्थमङ्गनां भूपतिं प्रियम् ।**
**दृष्ट्वा सम्पूज्य धीरस्य न काऽपि हृदि वासना ॥५४॥**
**भृत्यैः पुत्रैः कलत्रैश्च दौहित्रैश्चापि गोत्रजैः ।**
**विहस्य धिक्कृतो योगी न याति विकृतिं मनाक् ॥५५॥**

व्याख्यातप्रायम् । नवरमत्रापि स्वातन्त्र्यभोगोपभोगादि यथास्योपपद्यते तत्प्राग्वदनुसन्धातव्यम्, न तु वाममार्गाऽऽरेका विधेया, तादृशस्वातन्त्र्यादेर्व्यवहारनिश्चयोभयोत्तीर्णतयोन्मार्गमात्रपर्यवसितत्वात् । सोऽयम् -

**सन्तुष्टोऽपि न सन्तुष्टः खिन्नोऽपि न च खिद्यते ।**
**तस्याश्चर्यदशां तां तां तादृशा एव जानते ॥५६॥**

तत्तत्सन्तोषाद्यभिव्यक्तेर्लोकानुवर्तनमात्रत्वान्नासौ परमार्थतस्तादृशो भवतीत्याशयः । किञ्च -

**कर्तव्यतैव संसारो न तां पश्यन्ति सूरयः ।**
**शून्याकारा निराकारा निर्विकारा निरामयाः ॥५७॥**

अकुर्वन्नपि सङ्क्षोभाद्व्यग्रः सर्वत्र मूढधीः ।
कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः ॥५८॥
सुखमास्ते सुखं शेते सुखमायाति याति च ।
सुखं वक्ति सुखं भुङ्क्ते व्यवहारेऽपि शान्तधीः ॥५९॥
स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः ।
महाहृद इवाक्षोभ्यो गतक्लेशः स शोभते ॥६०॥
निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते ।
प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी ॥६१॥
परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते ।
देहे विगलिताशस्य क्व रागः क्व विरागिता ॥६२॥
भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा ।
भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी ॥६३॥
सर्वारम्भेषु निष्कामो यश्चरेद्बालवन्मुनिः ।
न लेपस्तस्य शुद्धस्य क्रियमाणेऽपि कर्मणि ॥६४॥
स एव धन्य आत्मज्ञः सर्वभावेषु यः समः ।
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्निस्तर्षमानसः ॥६५॥

व्याख्यातप्रायम्, नवरं निस्तर्षमानसः – वितृष्णचेताः ।

किञ्च –

**क्व संसारः क्व चाभासः क्व साध्यं क्व च साधनम् ।**
**आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा ॥६६॥**

यद्यस्यापि संसारादि, तदाऽऽकाशस्याप्यस्तु, तुल्यन्यायात्, निर्विकल्पत्वस्योभयत्र समानत्वात्, नो चेत्तदाऽस्यापि मा भूत्, तत एवेति भावः । इत्थञ्च –

**स जयत्यर्थसन्न्यासी पूर्णस्वरसविग्रहः ।**
**अकृत्रिमोऽनवच्छिन्ने समाधिर्यस्य वर्त्तते ॥६७॥**

**अर्थ**विषयाणां सर्वसंविदां **न्यासः** – त्यागोऽस्त्यस्येत्य**र्थ-सन्न्यासी**, सर्वसंविन्न्यासं संन्यासम् (निर्वाणोपनिषदि) – इत्युक्तेः । तमेव विशेषयति – **पूर्णस्वरसविग्रहः** – अन्यूनात्मानुरागमात्रमूर्त्तिः, तमेव विशेषयति – **यस्यानवच्छिन्ने** – अवच्छेदकोपाधिशून्ये शुद्धात्मनि **अकृत्रिमः** प्रवृत्त्यादि-निर्बन्धमन्तरेणोत्पन्नत्वेन प्राकृतिकः, **समाधिः वर्तते** – स्वातिरिक्तानाधानप्रयोजकत्वेन समीचीनमाधानं वर्तते, यथोक्तम् – नान्यत् पश्यति यत्रात्मा न शृणोति च किञ्चन । स्वस्मादन्यन्न जानाति समाधिरभिधीयते – इति (रामगीतायाम् ८-३८), **स जयति** – इत्थम्भूत एव व्यामोहविजयी भवति ।

**बहुनाऽत्र किमुक्तेन ज्ञाततत्त्वो महाशयः ।**
**भोगमोक्षनिराकाङ्क्षी सदा सर्वत्र नीरसः ॥६८॥**

**महदादि जगद्द्वैतं नाममात्रविजृम्भितम् ।**
**विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते ॥६९॥**

**महदित्यादि**, यथोक्तम् - प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि - इति (साङ्ख्यकारिकायाम् २२) । यथा चैतन्न सङ्गतिमङ्गति, यथा च घटामटाट्यते तथोपपादितमन्यत्र विस्तरत इति नात्र प्रतन्यते । साङ्गत्येऽप्याह **नामेत्यादि**, अभिहितार्थम् । अतः -

**भ्रमभूतमिदं सर्वं किञ्चिन्नास्तीति निश्चयी ।**
**अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति ॥७०॥**
**शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः ।**
**क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोऽपि वा ॥७१॥**
**स्फुरन्तोऽनन्तरूपेण प्रकृतिं च न पश्यतः ।**
**क्व बन्धः क्व च वा मोक्षः क्व हर्षः क्व विषादिता ॥७२॥**

प्रागनुसारेण सुगमम्, नवरं **प्रकृतिः** कर्मणो ज्ञानावरणादिस्वभावः, ननु च तददर्शनेऽस्य मिथ्यामतित्वमापद्येतेति चेत् ? न, शुद्धनयाभिप्रायतस्तत्तत्स्वाभावस्यैव विरहात् । तस्मात् -

**बुद्धिपर्यन्तसंसारे मायामात्रं विवर्तते ।**
**निर्ममो निरहङ्कारो निष्कामः शोभते बुधः ॥७३॥**

**बुद्धिः** - अध्यवसायो मतिरिति यावत्, तदुक्तम् - अध्यवसायलक्षणो महान् बुद्धिर्मतिरुपलब्धिरित्यनर्थान्तरम् - इति (देवलस्मृतौ ६-५२) । **बुधः** - कूटस्थं सत्त्वरूपम् (गोपालोत्तरतापिन्युपनिषदि २-३३) इतिवचस्तात्पर्यबोध-विभूषितः, शिष्टं स्पष्टम् । किञ्च -

**अक्षयं गतसन्तापमात्मानं पश्यतो मुनेः ।**
**क्व विद्या क्व च वा विश्वं क्व देहोऽहं ममेति वा ॥७४॥**

उक्तार्थम् । व्यतिरेकव्याक्रोशेन प्रस्तुतप्रकर्षमवग-मयन्नाह -

**निरोधादीनि कर्माणि जहाति जडधीर्यदि ।**
**मनोरथान्प्रलापांश्च कर्तुमाप्नोत्यतत्क्षणात् ॥७५॥**

**जडधीः** - निरोधादिनिर्बन्धमात्रं निर्वृतिनिबन्धन-मित्यभिनिवेशी, स **यदि निरोधादीनि** एकाग्र्यमुख्यानि **कर्माणि जहाति**, तदा **तत्** - निरोधकालावच्छिन्नः **क्षणः** - समयविशेषः, **तत्क्षणः**, नासौ - **अतत्क्षणः** - निरोधानन्तरकालः, तत एवारभ्यः **मनोरथान्** - अभिलाषा-भिधान् चित्तविक्षेपान्, **प्रलापाँश्च**-यत्तज्जल्पनाख्यान् मौन-विक्षेपान् **कर्तुमाप्नोति** - विदधाति, न तस्य निरोधाद्युपलब्धो

गुणो क्षणमप्यवतिष्ठते, परमार्थतो जडधीलक्षणप्रतिबन्धकयोगाद्, गुणोपलब्धेरेवाभावादित्यभिप्रायः । न च निरोधमात्रमपि तस्य वास्तवमित्याह -

**मन्दः श्रुत्वाऽपि तद्वस्तु न जहाति विमूढताम् ।**
**निर्विकल्पो बहिर्यत्नादन्तर्विषयलालसः ॥७६॥**
**ज्ञानाद्गलितकर्मा यो लोकदृष्ट्याऽपि कर्मकृत् ।**
**नाप्नोत्यवसरं कर्तुं वक्तुमेव न किञ्चन ॥७७॥**
**क्व तमः क्व प्रकाशो वा हानं क्व च न किञ्चन ।**
**निर्विकारस्य धीरस्य निरातङ्कस्य सर्वदा ॥७८॥**
